पूर्णप्रज्ञग्रन्थमाला-५

श्रीजयतीर्थभिक्षुविरचिता

प्रमाणपद्धतिः

श्रीराघवेन्द्रतीर्थविरचितभावबोधटिप्पण्या

तथा

श्रीवेदेशतीर्थविरचितभावविवरणटिप्पण्या च भूषिता

सम्पादकः

प्रा. ए. हरिदास भट्टः

प्रांशुपालः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

पूर्णप्रज्ञविद्यापीठम्

पूर्णप्रज्ञनगरम्, बेङ्गलूरु - २८

२००४

Poornaprajna Grantamālā -5

PRAMĀṆAPADDHATIḤ

of

Śri Jayatīrtha

with the Bhāvabodha of Śri Raghavendratīrtha and Bhāvavivaraṇa of Śri Vedeśatīrtha

Editor

Prof. A. Haridasa Bhat
Principal, Poornaprajna Vidyapeetha, Bangalore-28

Publisher :
Poornaprajna Vidyapeetha
Poornaprajna Vidyapeetha,
Bangalore - 560 028

2004

PRAMĀṆAPADDHATIḤ of Ṡri Jayatīrtha
with the Bhāvabodha of Ṡri Raghavendratīrtha and
Bhāvavivaraṇa Ṡri Vedeṡatīrtha

Editor : **Prof. A. Haridasa Bhat**

Published by :.
Poornaprajna Vidyapeetha
Bangalore - 560 028.

First Edition : 2004

Copies : 1000

Price : Rs. 100/-

Type setting :
Poornaprajna Samshodhana Mandiram
Bangalore

Printed by :
Lavanya Mudrana
Bangalore.

3

पूर्णप्रज्ञग्रन्थमाला-५

श्रीजयतीर्थभिक्षुविरचिता

प्रमाणपद्धतिः

श्रीराघवेन्द्रतीर्थविरचितभावबोधटिप्पण्या तथा
श्रीवेदेशतीर्थविरचितभावविवरणटिप्पण्या च
भूषिता

सम्पादकः
प्रा. ए. हरिदास भट्टः
प्रांशुपालः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

पूर्णप्रज्ञविद्यापीठम्
पूर्णप्रज्ञविद्यापीठम्
बेङ्गलूरु - २८

२००४

श्रीजयतीर्थभिक्षुविरचिता

प्रमाणपद्धतिः

श्रीराघवेन्द्रतीर्थविरचितभाववोधटिप्पण्या तथा

श्रीवेदेशतीर्थविरचितभावविवरणटिप्पण्या च

भूषिता

सम्पादकः- प्रा. ए. हरिदास भट्टः

पूर्णप्रज्ञविद्यापीठम्

बेङ्गलूरु - २८

प्रथममुद्रणम् - २००४

मुद्रितपुस्तकसङ्ख्या - १०००

मूल्यम् - १०० रूप्यकाणि

पूर्णप्रज्ञसंशोधनमन्दिरस्य

सङ्गणकयन्त्रे टङ्कितम् ।

लावण्यमुद्रणद्वारा मुद्रितम् ।

H.H. SRI VISHVESHA TIRTHA SWAMIJI
SRI PEJAVARA ADHOKSHAJA MATHA
JAGADGURU SRI MADHWACHARYA MAHA SAMSTHANA
UDUPI - 576 101, Karnataka
✆ : 091-820-2524198, 2526598

Date : 04.04.04

ಅನುಗ್ರಹ ಸಂದೇಶ

ಪ್ರಮಾಣಪದ್ಧತಿ ದ್ವೈತದರ್ಶನದ ರೀತಿಯಿಂದ ಪ್ರಮಾಣಗಳ ಬಗ್ಗೆ ಸಂಕ್ಷಿಪ್ತವಾಗಿ ತಿಳಿಸಿರುವ ಶ್ರೀಜಯತೀರ್ಥರ ಒಂದು ಸಂಗ್ರಹಾತ್ಮಕವಾದ ಕೃತಿ. 'ಮಾನಾಧೀನಾ ಮೇಯಸಿದ್ಧಿಃ' ಎನ್ನುವಂತೆ ಪ್ರಮೇಯಗಳ ಸರಿಯಾದ ನಿರ್ಣಯಕ್ಕೆ ಪ್ರಮಾಣಗಳ ಸ್ವರೂಪ ವಿಮರ್ಶೆ ಅತ್ಯಂತ ಅಗತ್ಯವಾದುದು. ಆದ್ದರಿಂದ ಈ ಗ್ರಂಥದ ಅಧ್ಯಯನ ಅನಿವಾರ್ಯವಾದುದು.

ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠವು ಅನೇಕ ವರ್ಷಗಳಿಂದ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಉಚಿತವಾಗಿ ದ್ವೈತವೇದಾಂತದ ಶಿಕ್ಷಣವನ್ನು ನೀಡುತ್ತಾ ಬಂದಿದೆ. ಸುಲಭ ಬೆಲೆಯಲ್ಲಿ ಪುಸ್ತಕಗಳು ದೊರಕುವಂತಾದರೆ ವಿದ್ಯಾರ್ಥಿಗಳ ಅಧ್ಯಯನಕ್ಕೆ ಅನುಕೂಲವಾಗುತ್ತದೆ ಎನ್ನುವ ದೃಷ್ಟಿಯಿಂದ ಈ ಪುಸ್ತಕವನ್ನು ಪ್ರಕಾಶಪಡಿಸಲಾಗಿದೆ. ಜೊತೆಯಲ್ಲಿ ದ್ವೈತದರ್ಶನದ ಪ್ರಾರಂಭಿಕ ಅಧ್ಯಯನವನ್ನು ನಡೆಸುವ ಎಲ್ಲಾ ಜಿಜ್ಞಾಸುಗಳಿಗೂ ಉಪಯುಕ್ತವಾಗುವಂತೆ ಇದನ್ನು ಸಿದ್ಧಪಡಿಸಲಾಗಿದೆ.

ಎಲ್ಲ ಅಭಿಮಾನಿಗಳೂ ಇದರ ಸದುಪಯೋಗವನ್ನು ಪಡೆದುಕೊಳ್ಳಲಿ ಎಂದು ನಾವು ಆಶಿಸುತ್ತೇವೆ.

ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದರು
ಕುಲಪತಿಗಳು,
ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠ, ಬೆಂಗಳೂರು

ಪ್ರಕಾಶಕರ ನುಡಿ

ತತ್ತ್ವಜ್ಞಾನ ಸಂಪಾದನೆಯಲ್ಲಿ ಪುಸ್ತಕದ ಸ್ಥಾನ ಅತ್ಯಂತ ಮಹತ್ವವಾದುದು. ಪ್ರಾಚೀನ ಕಾಲದಲ್ಲಿ ಪುಸ್ತಕ ನಿರಪೇಕ್ಷವಾದ ಪಾಠಪದ್ಧತಿಯು ಬೆಳೆದು ಬಂದಿದ್ದರೂ ಇಂದು ಅದು ಅಸಾಧ್ಯದ ಮಾತು. ಆದ್ದರಿಂದ ಅಮುದ್ರಿತ ಟಿಪ್ಪಣಿಗಳೊಂದಿಗೆ ಪುಸ್ತಕದ ಪ್ರಕಾಶನದ ಜೊತೆಗೆ ಮುದ್ರಿತವಾಗಿದ್ದು ಇಂದು ದೊರಕದ ಪುಸ್ತಕಗಳ ಪುನರ್ಮುದ್ರಣವೂ ಅಗತ್ಯವಾದ ಕೆಲಸ.

ಪ್ರಮಾಣಪದ್ಧತಿಯು ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳ ಅಧ್ಯಯನಕ್ಕೆ ಪೂರಕವಾಗುವ ಶ್ರೀಜಯತೀರ್ಥರ ಸ್ವತಂತ್ರ ಗ್ರಂಥ. ಪ್ರಮಾಣಗಳ ಬಗ್ಗೆ ಮತಾಂತರಗಳ ಪರಿಶೀಲನೆಯ ಜೊತೆಗೆ ದ್ವೈತದರ್ಶನದ ವಿಚಾರಗಳನ್ನು ಇದರಲ್ಲಿ ನಿರೂಪಿಸಲಾಗಿದೆ.

ಅನೇಕ ವಿಸ್ತೃತ ವ್ಯಾಖ್ಯಾನಗಳ ಜೊತೆ ಪ್ರಮಾಣಪದ್ಧಿ ಪುಸ್ತಕವು ಲಭ್ಯವಿದೆ. ಆದರೆ ವಿಶೇಷ ವಿಮರ್ಶೆಗೆ ಸಹಕಾರಿಯಾಗುವ ಅಂತಹ ಪುಸ್ತಕ ವಿದ್ವಾಂಸರಿಗೆ ಉಪಯುಕ್ತವಾಗುತ್ತದೆ. ಸಾಮಾನ್ಯ ಜಿಜ್ಞಾಸುಗಳಿಗೆ, ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಮೂಲಕ್ಕೆ ಅರ್ಥವಾಗುವಂತಹ ವ್ಯಾಖ್ಯಾನಗಳನ್ನಷ್ಟೇ ಒಳಗೊಂಡ ಪುಸ್ತಕವು ಅಗತ್ಯವಾಗಿದ್ದು ಆ ದೃಷ್ಟಿಯಲ್ಲಿ ಈ ಪುಸ್ತಕವನ್ನು ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರ ಆದೇಶದಂತೆ ಹೊರತರಲಾಗಿದೆ.

ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠದಿಂದ ಗೀತಾಭಾಷ್ಯ, ಉಪನಿಷತ್‌ಖಂಡಾರ್ಥ ಮತ್ತು ಗೀತಾತಾತ್ಪರ್ಯ ಪುಸ್ತಕಗಳು ಮುದ್ರಣಗೊಂಡಿವೆ. ಇತ್ತೀಚೆಗೆ ವಿದ್ಯಾಪೀಠದ ಪ್ರಕಟಣೆಗಳು ಹೊರಬಂದಿಲ್ಲ. ಶ್ರೀವಿದ್ಯಾಮಾನ್ಯತೀರ್ಥರು ದಶಪ್ರಕರಣಗಳ ಪುನರ್ಮುದ್ರಣಕ್ಕಾಗಿ ನೀಡಿರುವ ಮೊತ್ತದಿಂದ ವಿಷ್ಣುತತ್ತ್ವವಿನಿರ್ಣಯವನ್ನು ಎರಡು ಸಂಪುಟಗಳಲ್ಲಿ ಹೊರತರಲಾಯಿತು. ಅದರ ಮಾರಾಟದಿಂದ ಬಂದ ಹಣದಲ್ಲಿ ಈ ಪುಸ್ತಕವನ್ನು ಪ್ರಕಾಶಪಡಿಸಲಾಗಿದೆ. ಈ ಸಂದರ್ಭದಲ್ಲಿ ವಿದ್ಯಾಪೀಠದ ಸ್ಥಾಪನೆಯಲ್ಲಿ ವಿಶೇಷ ಆಸಕ್ತಿಯನ್ನು ತಾಳಿದ್ದ ಶ್ರೀವಿದ್ಯಾಮಾನ್ಯತೀರ್ಥ ಶ್ರೀಪಾದರನ್ನು ಭಕ್ತಿ ಗೌರವಗಳಿಂದ ಸ್ಮರಿಸುತ್ತೇವೆ.

ಈ ಪುಸ್ತಕದ ಮುದ್ರಣಕ್ಕಾಗಿ ಪ್ರೇರಣೆ ನೀಡಿ ಅನುಗ್ರಹಿಸಿದ ವಿದ್ಯಾಪೀಠದ ಕುಲಪತಿಗಳಾದ ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದರಿಗೂ ಭಕ್ತಿಪೂರ್ವಕ ಪ್ರಣಾಮಗಳು.

ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ಬಂದಿರುವ ದ್ವೈತಸಿದ್ಧಾಂತದ ವಿಶೇಷ ಕೊಡುಗೆಗಳನ್ನು ಪೀಠಿಕೆಯಲ್ಲಿ ಕನ್ನಡೀಕರಿಸಿ ಕೊಡಲಾಗಿದೆ. ಅದನ್ನು ಬರೆದುಕೊಟ್ಟ ಹಾಗೂ ಈ ಪುಸ್ತಕದ ಮುದ್ರಣದ ಸಂಪಾದಕತ್ವವನ್ನು ನಿರ್ವಹಿಸಿದ ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠದ ಪ್ರಾಚಾರ್ಯರಾದ ವಿದ್ವಾನ್ ಎ. ಹರಿದಾಸ ಭಟ್ಟರಿಗೆ ಕೃತಜ್ಞತೆಗಳು.

ಅದರಂತೆ ಕರಡುಪ್ರತಿಯನ್ನು ತಿದ್ದಿ ಸಹಕರಿಸಿರುವ ವಿದ್ವಾಂಸರಿಗೂ, ಅಕ್ಷರಜೋಡಣೆಯನ್ನು ಮಾಡಿರುವ ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ಅಧಿಕಾರಿವರ್ಗಕ್ಕೂ ಕೃತಜ್ಞತೆಗಳು.

ಪ್ರಕಾಶಕರು

ಪ್ರಮಾಣಪದ್ಧತಿಯ ವಿಶೇಷಾಂಶಗಳು

ಪ್ರಮಾಣಪದ್ಧತಿ ಗ್ರಂಥವು ದ್ವೈತದರ್ಶನದಲ್ಲಿ ಅಂಗೀಕರಿಸಲಾದ ಪ್ರತ್ಯಕ್ಷ, ಅನುಮಾನ, ಆಗಮ ಪ್ರಮಾಣಗಳ ಬಗ್ಗೆ ಸಂಕ್ಷಿಪ್ತ ವಿವರಣೆಯನ್ನು ನೀಡುವ ಒಂದು ಚಿಕ್ಕ ಕೃತಿ. ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಪ್ರಮಾಣಗಳ ಸ್ವರೂಪ ನಿರೂಪಣೆಗಾಗಿಯೇ ಪ್ರಮಾಣಲಕ್ಷಣ ಎನ್ನುವ ಕೃತಿಯನ್ನು ರಚಿಸಿದ್ದರೂ ಆಚಾರ್ಯರು ಅನುವ್ಯಾಖ್ಯಾನ, ವಿಷ್ಣುತತ್ತ್ವವಿನಿರ್ಣಯಗಳಲ್ಲಿ ಹೇಳಿರುವ ಅನೇಕ ವಿಷಯಗಳನ್ನು ಇಲ್ಲಿ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಅಷ್ಟೇ ಅಲ್ಲದೆ ಪ್ರಮಾಣಗಳ ಕುರಿತು ಇತರ ದಾರ್ಶನಿಕರು ಹೇಳುವ ಅಭಿಪ್ರಾಯಗಳನ್ನು ಒಂದೊಂದೇ ವಾಕ್ಯದಲ್ಲಿ ಅನುವಾದಿಸಿ ಅದರ ಸಂಕ್ಷಿಪ್ತ ವಿಮರ್ಶೆಯನ್ನು ಇಲ್ಲಿ ನಡೆಸಲಾಗಿದೆ. ಈ ಕೃತಿ ಟೀಕಾಕೃತ್ಪಾದಂದೇ ಖ್ಯಾತರಾದ ಶ್ರೀಮಜ್ಜಯತೀರ್ಥರ ಸ್ವತಂತ್ರ ಗ್ರಂಥ. ಗ್ರಂಥದ ಕೊನೆಯಲ್ಲಿ-

ಜಯತೀರ್ಥಮುನೀಂದ್ರೇಣ ಬಾಲಬೋಧಾಯ ನಿರ್ಮಿತಾ ।

ಎಂದು ಶ್ರೀಜಯತೀರ್ಥರು ಬಾಲಬೋಧೆಗಾಗಿ ಎನ್ನುವ ಮೂಲಕ ಈ ಗ್ರಂಥದ ಉದ್ದೇಶವನ್ನು ಸ್ಪಷ್ಟಪಡಿಸಿದ್ದಾರೆ.

ಪ್ರಮಾಣಲಕ್ಷಣ :

'ಪ್ರಮಾಣ' ಎಂಬ ಶಬ್ದವನ್ನು ಅನೇಕ ದಾರ್ಶನಿಕರು ಜ್ಞಾನಸಾಧನಗಳಿಗೆ ಮಾತ್ರ ಅನ್ವಯಿಸದೆ ಜ್ಞಾನಕ್ಕೂ ಅನ್ವಯಿಸಿ 'ಯಾಥಾರ್ಥ್ಯಂ ಪ್ರಮಾಣಂ' ಎಂಬ ಲಕ್ಷಣವನ್ನು ಇಲ್ಲಿ ನೀಡಿರುವುದು ಒಂದು ವಿಶೇಷ. ಮೀಮಾಂಸಕರು ಜ್ಞಾನವನ್ನು ಪ್ರಮಾಣ ಎಂದರೆ ನೈಯಾಯಿಕರು ಜ್ಞಾನಸಾಧನವನ್ನು ಪ್ರಮಾಣ ಎಂದು ಕರೆದಿದ್ದಾರೆ. ದ್ವೈತದರ್ಶನದಲ್ಲಿ ಇವೆರಡನ್ನೂ 'ಪ್ರಮಾಣ' ಎಂದು ಒಪ್ಪಿಕೊಳ್ಳಲಾಗಿದೆ.

ಈ ಸಂದರ್ಭದಲ್ಲಿ ಬಂದಿರುವ ಇನ್ನೊಂದು ವಿಶೇಷ- ಜ್ಞಾನದಂತೆ ಜ್ಞಾನಕರಣಗಳೂ ಸವಿಷಯಕವಾಗಿವೆ, ಎನ್ನುವುದು. ರೂಪವು ಜ್ಞಾನಕ್ಕೆ ವಿಷಯವಾದಂತೆ ಜ್ಞಾನಸಾಧನವಾದ ಕಣ್ಣಿಗೂ ವಿಷಯವಾಗಿದೆ ಎಂದು ಇದರ ಅರ್ಥ.

ಜ್ಞೇಯವಿಷಯೀಕಾರಿತ್ವಂ ಚ ಸಾಕ್ಷಾದ್ವಾ ಸಾಕ್ಷಾತ್-ಜ್ಞೇಯವಿಷಯೀಕಾರಿ-ಸಾಧನತ್ವೇನ ವಾ ವಿವಕ್ಷಿತಮ್। (ಪ್ರ.ಪ.)

ಮೇಲಿನ ವಾಕ್ಯದಿಂದ, ಜ್ಞಾನಕ್ಕೆ ವಸ್ತುಗಳು ನೇರವಾಗಿ ವಿಷಯವಾಗುತ್ತವೆ, ಇಂದ್ರಿಯಗಳಿಗೆ ಮಾತ್ರ ಜ್ಞಾನದ ಮೂಲಕ ವಿಷಯವಾಗುತ್ತವೆ, ಎನ್ನುವಂತೆ ತೋರುತ್ತದೆ. ಆದರೆ ಈ ವ್ಯತ್ಯಾಸವಿಲ್ಲದೆ ಎರಡಕ್ಕೂ ವಸ್ತುಗಳು ನೇರವಾಗಿಯೇ ವಿಷಯವಾಗುತ್ತವೆ. ಇಂದ್ರಿಯಗಳು ವಸ್ತುಗಳ ಸಂಪರ್ಕವಿಲ್ಲದೆ ಜ್ಞಾನವನ್ನು ಉಂಟುಮಾಡಲಾರವು. ಹೀಗಿರುವಾಗ ಜ್ಞಾನಕ್ಕಿಂತಲೂ ಮೊದಲೇ ಇಂದ್ರಿಯಗಳಿಗೆ ವಸ್ತುಗಳು ವಿಷಯಗಳಾಗಬೇಕಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿರುವ 'ಸಾಕ್ಷಾತ್' 'ಸಾಧನತ್ವೇನ ವಾ' ಎಂಬ ಪದದ ಅಭಿಪ್ರಾಯವನ್ನು ಶ್ರೀರಾಘವೇಂದ್ರ ಸ್ವಾಮಿಗಳ ಟಿಪ್ಪಣಿಯಲ್ಲಿ ಹೀಗೆ ವಿಷದೀಕರಿಸಲಾಗಿದೆ- ವಸ್ತುಗಳಲ್ಲಿ 'ಜ್ಞೇಯತ್ವ' ಎಂಬ ಧರ್ಮವು ಕರಣಗಳಿಂದ ಹುಟ್ಟುವುದಿಲ್ಲ. ಅದು ಜ್ಞಾನದಿಂದು ಹುಟ್ಟುವ ಧರ್ಮ. ಜ್ಞಾನ ಬಂದ ಮೇಲಷ್ಟೇ ವಸ್ತು 'ಜ್ಞೇಯ'ವೆನಿಸುತ್ತದೆ. ಈ ದೃಷ್ಟಿಯಿಂದಷ್ಟೇ ಟೀಕಾಚಾರ್ಯರು 'ಸಾಕ್ಷಾತ್‌ಜ್ಞೇಯವಿಷಯಕತ್ವ' ಜ್ಞಾನಕ್ಕೆ ಮಾತ್ರ ಎಂದಿದ್ದಾರೆ. ಸುಧಾದಲ್ಲಿ 'ಯಥಾವಸ್ಥಿತ-ಅರ್ಥವಿಷಯತ್ವಸ್ಯ ಉಭಯತ್ರ ತುಲ್ಯತ್ವಾತ್' ಎಂದು ಟೀಕಾಚಾರ್ಯರೇ ಇಂದ್ರಿಯ ಮತ್ತು ಜ್ಞಾನ ಎರಡರಲ್ಲೂ ಸವಿಷಯಕತ್ವ ಸಮಾನವಾಗಿದೆ ಎನ್ನುವುದನ್ನು ಸ್ಪಷ್ಟಪಡಿಸಿದ್ದಾರೆ. ಆದ್ದರಿಂದ 'ಜ್ಞೇಯವಿಷಯಕತ್ವ' ಜ್ಞಾನದಲ್ಲಿದ್ದಂತೆಯೇ ಕರಣಗಳಲ್ಲೂ ಸಮಾನವಾದುದು.

'ಅತೋ ಜ್ಞೇಯವಿಷಯೀಕಾರೀತ್ಯತ್ರ ಜ್ಞೇಯತ್ವಾಂಶೇ ಅನನ್ಯಾಪೇಕ್ಷತ್ವ-ಅನ್ಯಾಪೇಕ್ಷತ್ವರೂಪಭೇದಮಾತ್ರೇಣ ಸಾಕ್ಷಾತ್-ತತ್ಸಾಧನತ್ವವ್ಯವಹಾರಃ ।' *(ರಾ.ಟಿ.)*

ಹೀಗೆ ಜ್ಞಾನ ಮತ್ತು ಕರಣ ಇವೆರಡನ್ನೂ ಪ್ರಮಾಣ ಎಂದು ಹೇಳಿ ಕರಣಗಳು ಸವಿಷಯಕ ಎಂದು ಹೇಳಿರುವುದು ದ್ವೈತದರ್ಶನದ ವೈಶಿಷ್ಟ್ಯ.

ಅಭಿನವಾನ್ಯಥಾಖ್ಯಾತಿ :

ಭ್ರಾಂತಿಯ ಬಗ್ಗೆ ಭಾರತೀಯ ದಾರ್ಶನಿಕರಲ್ಲಿ ವಿವಾದವಿದೆ. ಪ್ರಾಭಾಕರ ಮೀಮಾಂಸಕರು ಭ್ರಾಂತಿಯೇ ಇಲ್ಲವೆಂದರೆ ನೈಯಾಯಿಕರು ಭ್ರಾಂತಿ ಎಂಬ ಜ್ಞಾನಪ್ರಭೇದವನ್ನು ಸ್ವೀಕರಿಸಿದ್ದಾರೆ. ಆದರೆ ಹಗ್ಗವು ಹಾವಾಗಿ ಕಂಡಾಗ ಆ ಹಾವು ಅಸತ್ಯವಲ್ಲ, ಇನ್ನೆಲ್ಲೋ ಇದೆ. ಸತ್ಯವಾದ ಹಿಂದೆಂದೋ ಹಾವು ನಮ್ಮ ಮುಂದಿರುವ ಹಗ್ಗದಲ್ಲಿ ಕಾಣುತ್ತದೆ ಎಂದು ಅವರ ವಾದ. ಅದ್ವೈತವಾದವಂತೂ ಭ್ರಮೆಯ ಕಾಲದಲ್ಲಿ

ನಮ್ಮೊಳಗಿರುವ ಅಜ್ಞಾನವೇ ಹಾವಿನ ಆಕಾರವನ್ನು ತಾಳಿ, ಅದು ಹಗ್ಗದಲ್ಲಿ ಕಾಣುತ್ತದೆ ಎನ್ನುತ್ತದೆ. ಇದು ಅನಿರ್ವಚನೀಯಖ್ಯಾತಿ. ಈ ಮೂರಕ್ಕಿಂತಲೂ ವಿಲಕ್ಷಣವಾದ ನಿಲುವು ದ್ವೈತದರ್ಶನದ್ದಾಗಿದೆ. ಹಾವು ಸತ್ಯವಾದರೆ 'ಇಲ್ಲಿ ಹಾವೇ ಇರಲಿಲ್ಲ; ನಾನು ಸುಮ್ಮನೆ ಹೆದರಿದೆ' ಎಂಬ ಅನುಭವ ಬರಲಾರದು. ಅಥವಾ ತಾರ್ಕಿಕರು ಹೇಳುವಂತೆ ಅದು ಇನ್ನೆಲ್ಲೋ ಇರುವುದಾದರೆ ಇಲ್ಲಿ ತೋರುವುದು ಸಾಧ್ಯವಿಲ್ಲ. ಅಷ್ಟೇ ಅಲ್ಲ, 'ನಾನು ಅಂದು ನೋಡಿದ ಹಾವೇ ಇದು' ಎಂದೇನೂ ನಮಗೆ ಭ್ರಾಂತಿ ಬರುವುದಿಲ್ಲ. 'ಇದುವರೆಗೆ ನೋಡಿದ ಹಾವಿನಂತಿರುವ, ಇಂದೇ ಕಾಣಿಸಿಕೊಂಡ ಇದೊಂದು ಬೇರೆಯೇ ಹಾವು' ಎಂದೇ ನಮ್ಮ ಅನುಭವ. ಅಂದರೆ ಇಲ್ಲಿ ನಾವು ನೋಡಿದ ಹಾವು ಇನ್ನೆಲ್ಲೂ ಇಲ್ಲ; ಅದು ಸರ್ವಥಾ ಅಸತ್ಯ. ಹೀಗೆ ಭ್ರಾಂತಿಯಲ್ಲಿ ತೋರುವ ವಸ್ತು ಅತ್ಯಂತ ಅಸತ್ಯವಾದುದು ಎನ್ನುವ ಹೊಸದೊಂದು ವಾದವನ್ನೇ ದ್ವೈತದರ್ಶನವು ಸಮರ್ಥಿಸುತ್ತದೆ.

'ಅಸದೇವ ರಜತಂ ಪ್ರತ್ಯಭಾತ್' ಇತ್ಯುತ್ತರಕಾಲೀನಾನುಭವಾತ್ ಶುಕ್ತಿರೇವ ಅತ್ಯಂತಾಸದ್ರಜತಾತ್ಮನಾ ಪ್ರತಿಭಾತೀತ್ಯಾಚಾರ್ಯಾಃ' *(ಪ್ರ.ಪ.)*

ಸ್ಮೃತಿಪ್ರಾಮಾಣ್ಯ :

ನಾವು ಎಂದೋ ನೋಡಿದ ವಸ್ತುವನ್ನು ಇಂದು ಸ್ಮರಿಸಿಕೊಳ್ಳುತ್ತೇವೆ. ಸ್ಮರಣೆ ಬರುವಾಗ ಆ ವಸ್ತು ಇರಬೇಕಾಗಿಲ್ಲ. ಹೀಗೆ ವಸ್ತು ಇಲ್ಲದೆಯೂ ಸ್ಮರಣೆ ಬರುವುದರಿಂದ 'ಸ್ಮರಣೆಯು' ಭ್ರಾಂತಿ ಎಂದು ನ್ಯಾಯದರ್ಶನದಲ್ಲಿ ಸಮರ್ಥಿಸಲಾಗಿದೆ. ಆದರೆ ಇದು ಸರಿಯಲ್ಲ. ನಾವು ನೆನೆಪಿಸಿಕೊಳ್ಳುವಾಗ 'ಹಿಂದೆ ನೋಡಿದ ವಸ್ತುವು ಈಗಲೂ ಹಾಗೆಯೇ ಇದೆ' ಎಂದು ತಿಳಿಯುವುದಿಲ್ಲ. 'ಅದು ಅಂದು ಹಾಗಿತ್ತು' ಎಂದಿಷ್ಟೇ ತಿಳಿಯುತ್ತೇವೆ. ಅಂದು ಅದು ಹಾಗಿಲ್ಲದಿದ್ದರೆ ಮಾತ್ರ ಸ್ಮೃತಿಯು ತಪ್ಪೆನಿಸುತ್ತದೆ. ಇಲ್ಲದಿದ್ದರೆ ಸ್ಮೃತಿಯೂ ಯಥಾರ್ಥವೇ ಆಗುತ್ತದೆ.

ಇಲ್ಲಿ ಒಂದು ಮುಖ್ಯವಾದ ಪ್ರಶ್ನೆ ಇದೆ- ಹಿಂದೆ ನೋಡಿದ ಅಂಶವನ್ನಷ್ಟೇ ನಾವು ನೆನೆಪಿಸಿಕೊಳ್ಳುತ್ತೇವೆ. ನಾವು ನೋಡಿದಾಗ 'ಈ ಪುಸ್ತಕ ಇಲ್ಲಿದೆ' ಎಂದು ಜ್ಞಾನ ಬರುತ್ತದೆ. ಆದರೆ ಸ್ಮರಣೆಗೆ ಬರುವುದು ಹೀಗಲ್ಲ- 'ಪುಸ್ತಕ ಅಲ್ಲಿತ್ತು' ಎಂದು. ಇಂತಹ ಸ್ಮರಣೆಯಲ್ಲಿ 'ಇತ್ತು' ಎನ್ನುವ ಅಂಶವು ಹೊಸದಾಗಿ ಕಂಡಿದೆ. ಇದು ಹೇಗೆ ಸಾಧ್ಯ ? ಏಕೆಂದರೆ ಸ್ಮರಣೆ ಬರುವುದು ಸಂಸ್ಕಾರದಿಂದ. ಸಂಸ್ಕಾರ ಹುಟ್ಟುವುದು ಅನುಭವದಿಂದ. ಅನುಭವ

ವಸ್ತುವನ್ನು 'ಇದು' ಎನ್ನುತ್ತದೆ. ಆದರೆ, ಸ್ಮೃತಿಯು 'ಅದು' ಎನ್ನುತ್ತದೆ. ಈ ವ್ಯತ್ಯಾಸ ಹೇಗೆ ಸಾಧ್ಯ ? ಇದಕ್ಕೆ ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ನೀಡಿದ ಉತ್ತರ-

'ತತಶ್ಚ ಸಂಸ್ಕಾರಸಹಕೃತಂ ಮನಃ ಅನನುಭೂತಮಪಿ ನಿವೃತ್ತಪೂರ್ವಾವಸ್ಥಾಂ ವಿಷಯೀಕುರ್ವತ್ ಸ್ಮರಣಂ ಜನಯೇದಿತಿ ಕೋ ದೋಷಃ'

ಸ್ಮೃತಿಯು ಕೇವಲ ಸಂಸ್ಕಾರದಿಂದಷ್ಟೇ ಬರುವುದಿಲ್ಲ. ಮನಸ್ಸಿನಿಂದ ಬರುತ್ತದೆ. ಕಣ್ಣಿನಂತೆ ಮನಸ್ಸೂ ಒಂದು ಇಂದ್ರಿಯ. ಅದು ಸಂಸ್ಕಾರದ ಸಹಕಾರವನ್ನು ಪಡೆದು ಅನುಭವದಲ್ಲಿ ಕಾಣದ ಅಂಶವನ್ನು ಸ್ಮೃತಿಯಲ್ಲಿ ತೋರುವಂತೆ ಮಾಡುತ್ತದೆ. ಆದ್ದರಿಂದ 'ಅದು' (ಅತೀತತ್ವ) ಎನ್ನುವ ಅಂಶವೂ ಅನುಭವದಲ್ಲಿ ತೋರದಿದ್ದರೂ ಸ್ಮೃತಿಯಲ್ಲಿ ತೋರಬಹುದು. ಹೀಗೆ ಅನುಭವದಂತೆ ಸ್ಮೃತಿಯೂ ಪ್ರಮಾಣ ಎನ್ನಲು ಯಾವ ಬಾಧಕವೂ ಇಲ್ಲ.

ಪ್ರತ್ಯಕ್ಷ ಪ್ರಮಾಣ :

ಕಣ್ಣು, ಕಿವಿ ಮುಂತಾದ ಐದು ಜ್ಞಾನೇಂದ್ರಿಯಗಳಲ್ಲದೆ ಮನಸ್ಸು ಎಂಬ ಆಂತರ ಇಂದ್ರಿಯವೂ ಇದೆ ಎಂದು ನಮ್ಮಂತೆ ಇತರ ಕೆಲವು ದಾರ್ಶನಿಕರೂ ಹೇಳುತ್ತಾರೆ. ದ್ವೈತದರ್ಶನದಲ್ಲಿ ಈ ಮನಸ್ಸು ಅಲ್ಲದೆ 'ಸಾಕ್ಷಿ' ಎಂಬ ಇನ್ನೊಂದು ಇಂದ್ರಿಯವೂ ಇದೆ. ಹೀಗೆ ಒಟ್ಟು ಐದು ಬಾಹ್ಯೇಂದ್ರಿಯಗಳು, ಎರಡು ಆಂತರ ಇಂದ್ರಿಯಗಳು. ಒಟ್ಟು ಸೇರಿ ಏಳು ಇಂದ್ರಿಯಗಳನ್ನು ದ್ವೈತದರ್ಶನವು ಸಮರ್ಥಿಸಿದೆ. ಇತರ ಆರು ಇಂದ್ರಿಯಗಳು ಜ್ಞಾನಕ್ಕೆ ಸಾಧನಗಳಷ್ಟೇ ಆದರೆ ಸಾಕ್ಷಿಯು ಜ್ಞಾನಸಾಧನವೂ ಆಗಿ ಸ್ವತಃ ತಾನು ಜ್ಞಾನರೂಪವೂ ಆಗಿದೆ. ಕಣ್ಣು ಮೊದಲಾದ ಇಂದ್ರಿಯಗಳಿಂದ ಬಂದ ಬಾಹ್ಯವಿಷಯಗಳ ಜ್ಞಾನವು ಅಂತಃಕರಣದ ಧರ್ಮವಾಗಿದೆ. ಅವುಗಳಿಗೆ ವೃತ್ತಿಜ್ಞಾನಗಳೆಂದು ಹೆಸರು. ಅಂತಹ ಜ್ಞಾನವನ್ನು ಆತ್ಮನು ಸ್ವತಃ ತಾನೇ ಒಬ್ಬ ಇಂದ್ರಿಯನಾಗಿ ನೋಡುತ್ತಾನೆ. ಅದೇ ಸಾಕ್ಷಿಜ್ಞಾನ. ಹೀಗೆ ಪ್ರತ್ಯಕ್ಷವನ್ನು ವೃತ್ತಿಜ್ಞಾನ, ಸಾಕ್ಷಿಜ್ಞಾನ ಎಂದು ವಿಂಗಡಿಸಲಾಗಿದೆ. ಈ ಸಾಕ್ಷಿಯು ಆತ್ಮರೂಪವಾದುದರಿಂದ ಆತ್ಮಸ್ವಭಾವಕ್ಕೆ ಅನುಗುಣವಾಗಿ ಅದೂ ವಿಭಿನ್ನವಾಗುತ್ತದೆ. ಅದನ್ನು ಈಶಜ್ಞಾನ, ಲಕ್ಷ್ಮೀಜ್ಞಾನ ಎಂದು ಮುಂತಾಗಿ ವಿಭಾಗ ಮಾಡಿ ಆ ಮೂಲಕ ಪ್ರತ್ಯಕ್ಷದ ವಿಭಾಗವನ್ನು ತಿಳಿಸುವ ಸಂದರ್ಭದಲ್ಲಿ ಆತ್ಮರ ವೈಚಿತ್ರ್ಯವನ್ನು ಇಲ್ಲಿ ತಿಳಿಸಲಾಗಿದೆ. ಈ ರೀತಿಯ ವಿಭಾಗಕ್ಕೆ ಆಚಾರ್ಯರ ಪ್ರಮಾಣಲಕ್ಷಣವೇ ಆಧಾರ.

ಕಣ್ಣು ಮೊದಲಾದ ಬಾಹ್ಯೇಂದ್ರಿಯಗಳು, ನೈಯಾಯಿಕರು ಹೇಳುವಂತೆ, ಕೇವಲ ಭೌತವಸ್ತುಗಳಲ್ಲ. ಜೀವಾತ್ಮನ ಜೊತೆಗೆ ಅನಾದಿಕಾಲದಿಂದ ಅವುಗಳು ಇರುತ್ತವೆ. ಸೃಷ್ಟಿಕಾಲದಲ್ಲಿ ಪಂಚಭೂತಗಳ ಅಂಶದಿಂದ ಕೂಡಿ ಕ್ರಿಯಾಶೀಲವಾಗುತ್ತವೆ-

ಸೂಕ್ಷ್ಮೇಂದ್ರಿಯಾಣಿ ಸಂತ್ಯೇವ ಸ್ಯುಃ ಸ್ಥೂಲಾನ್ಯಪ್ಯಹಂಕೃತೇಃ ।
ತೇಷಾಂ ಭೂತೈರುಪಚಯಃ ಸೃಷ್ಟಿಕಾಲೇ ವಿಧೀಯತೇ ॥

ಇದು ದ್ವೈತದರ್ಶನದ ಸಮರ್ಥನೆ.

ಸನ್ನಿಕರ್ಷ :

ಇಂದ್ರಿಯಗಳಿಗೆ ವಸ್ತುಗಳೊಂದಿಗೆ ಸಂಪರ್ಕ (ಸನ್ನಿಕರ್ಷ) ಹೇಗೆ? ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ಹೀಗೆ ಹೇಳಲಾಗಿದೆ-

ಅತಃ ಸರ್ವೇಂದ್ರಿಯಾಣಾಂ ಸ್ವಸ್ವವಿಷಯೈಃ .....ಸಾಕ್ಷಾದೇವ ರಶ್ಮಿದ್ವಾರಾ ಸನ್ನಿಕರ್ಷಃ।

ಇಂದ್ರಿಯಗಳೂ ತಮ್ಮ ರಶ್ಮಿಗಳ ಮೂಲಕ ತಮಗೆ ಯೋಗ್ಯವಾಗಿರುವ ವಸ್ತುಗಳೊಂದಿಗೆ ಸಂಪರ್ಕವನ್ನು ಹೊಂದುತ್ತವೆ. ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ಹೇಳಿದ ಈ ವಿಷಯ ಅಪೂರ್ವವಾದಂತೆ ತೋರುತ್ತದೆ. ಕಣ್ಣು ತೈಜಸವಾದುದರಿಂದ ಅದಕ್ಕೆ ರಶ್ಮಿಯ ಮೂಲಕ ಸಂಬಂಧವೆನ್ನುವುದೇನೋ ಸರಿ. ಆದರೆ ಮೂಗು, ನಾಲಿಗೆ ಮುಂತಾದ ಇಂದ್ರಿಯಗಳಿಗೆ ಪರಿಮಳ, ರುಚಿ ಮುಂತಾದ ವಿಷಯಗಳೊಂದಿಗೆ ನೇರವಾದ ಸಂಪರ್ಕವೇ ಇದೆ; ಕಿರಣಗಳ ಮೂಲಕವಲ್ಲ. ಆದ್ದರಿಂದ 'ರಶ್ಮಿದ್ವಾರಾ' ಎನ್ನುವುದು ಹೇಗೆ? ಈ ಜಿಜ್ಞಾಸೆಗೆ ರಾಯರು ಕೊಟ್ಟ ಮೊದಲ ವಿವರಣೆ-

'ಸರ್ವೇಂದ್ರಿಯಾಣಾಂ ತೈಜಸತ್ವಾಭಿಪ್ರಾಯೇಣೋಕ್ತಂ- ರಶ್ಮಿದ್ವಾರೇತಿ ।'

ಎಲ್ಲ ಇಂದ್ರಿಯಗಳಲ್ಲೂ ತೈಜಸ ಅಹಂಕಾರದ ಅಂಶವಿರುವುದರಿಂದ ರಶ್ಮಿ ಇದ್ದೇ ಇದೆ. ಆದ್ದರಿಂದ ಕಣ್ಣಿನಂತೆಯೇ ಅವುಗಳಿಗೂ ರಶ್ಮಿಯ ಮೂಲಕವೇ ಸಂಬಂಧ.

ಇದೇ ವಾಕ್ಯಕ್ಕೆ ರಾಯರದೇ ಇನ್ನೊಂದು ವಿವರಣೆ-

'ಯದ್ವಾ ಚಕ್ಷುರಭಿಪ್ರಾಯೇಣ- ರಶ್ಮಿದ್ವಾರೇತಿ । ತದಿತರೇಂದ್ರಿಯಾಭಿಪ್ರಾಯೇಣ- ಸಾಕ್ಷಾದ್ವೇತಿ ।'

ರಶ್ಮಿದ್ವಾರಾ ಸಂಬಂಧ ಕಣ್ಣಿಗೆ, ಇತರ ಇಂದ್ರಿಯಗಳಿಗೆ ಹಾಗಲ್ಲ; ನೇರವಾಗಿ ವಿಷಯದ ಸಂಬಂಧವೇ ಇದೆ.

ಹೀಗೆ ಜ್ಞಾನ-ಇಂದ್ರಿಯ-ಸನ್ನಿಕರ್ಷಗಳ ಬಗ್ಗೆ ದ್ವೈತದರ್ಶನದ್ದೇ ಆದ ಚಿಂತನೆಗಳಿವೆ.

ಅನುಮಾನ ಪ್ರಕರಣ :

ಅನುಮಾನ ಪ್ರಕರಣದಲ್ಲಿ ಬಂದಿರುವ ವಿಶೇಷಾಂಶ ಸಾಧ್ಯ-ಹೇತುಗಳ ವ್ಯಾಪ್ತಿನಿಶ್ಚಯ ಮಾಡುವ ಕ್ರಮ. ಇಂತಹ ವ್ಯಾಪ್ತಿಯನ್ನು ತಿಳಿಯಲು ಸಾಧ್ಯವಿಲ್ಲ ಎನ್ನುವ ಕಾರಣದಿಂದಲೇ ಬೌದ್ಧರು ಅನುಮಾನವು ಪ್ರಮಾಣವೇ ಅಲ್ಲವೆಂದು ನಿರಾಕರಿಸಿರುತ್ತಾರೆ. ಆದ್ದರಿಂದ ಈ ವಿಷಯಕ್ಕೆ ಮಹತ್ವವಿದೆ.

ಪ್ರತ್ಯಕ್ಷ, ಅನುಮಾನ, ಆಗಮ ಈ ಮೂರೂ ಪ್ರಮಾಣಗಳಿಂದಲೂ ಸಾಧ್ಯ-ಹೇತುಗಳಿಗೆ ವ್ಯಾಪ್ತಿಯನ್ನು ನಿಶ್ಚಯಿಸಬಹುದು. ಧೂಮ ಮತ್ತು ಅಗ್ನಿಗಳಿಗೆ ವ್ಯಾಪ್ತಿಯನ್ನು ನಿಶ್ಚಯಿಸುವ ಕ್ರಮವನ್ನು ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ಸರಳ-ಸುಂದರವಾಗಿ ನಿರೂಪಿಸಲಾಗಿದೆ.

'ಹೊಗೆ ಇದ್ದಲ್ಲೆಲ್ಲ ಬೆಂಕಿ ಇದೆ' ಎಂಬ ವ್ಯಾಪ್ತಿಯನ್ನು ನಿಶ್ಚಯಿಸುವಲ್ಲಿ ಬರುವ ತೊಡಕು ಹೀಗಿದೆ- ನಾವು ಕೆಲವು ಕಡೆ 'ಹೊಗೆ ಇದ್ದಲ್ಲಿ ಬೆಂಕಿ ಇದೆ' ಎಂದು ನೋಡಬಹುದು. ಆದರೆ, ಇದರಿಂದ 'ಹೊಗೆ ಇರುವಲ್ಲೆಲ್ಲ ಬೆಂಕಿ ಇರುತ್ತದೆ' ಎಂದು ಸಾರ್ವತ್ರಿಕ ನಿಯಮವನ್ನು ಸ್ಥಾಪಿಸುವುದು ಹೇಗೆ ? ಏಕೆಂದರೆ, 'ಬೆಂಕಿ ಇರುವಲ್ಲಿ ಹೊಗೆಯಾಡುತ್ತದೆ' ಎಂದು ಅನೇಕ ಕಡೆಗಳಲ್ಲಿ ಕಂಡರೂ ಕಾದ ಕಬ್ಬಿಣದಲ್ಲಿ ಬೆಂಕಿ ಇದ್ದರೂ ಹೊಗೆ ಏಳುವುದಿಲ್ಲ. ಹಾಗೆಯೇ ಹೊಗೆ ಇದ್ದರೂ ಬೆಂಕಿ ಇಲ್ಲದ ಸಂದರ್ಭಗಳು ಏಕೆ ಇರಬಾರದು ? ಎಂಬ ಸಂಶಯ ಬರುತ್ತದೆ. ಇದನ್ನು ನಿರಾಕರಿಸುವುದೆಂತು ?

ಈ ಜಿಜ್ಞಾಸೆಗೆ ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ಸಮಾಧಾನವನ್ನು ನೀಡಲಾಗಿದೆ- ಅನೇಕ ಕಡೆ ಬೆಂಕಿಯ ಜೊತೆ ಹೊಗೆಯನ್ನು ಕಂಡಿದ್ದರೂ ಕಾದ ಕಬ್ಬಿಣದಲ್ಲಿ ಬೆಂಕಿ ಇದ್ದರೂ ಹೊಗೆ ಕಾಣದೇ ಹೋದಾಗ ನಾವು ವಿಚಾರ ಮಾಡುತ್ತೇವೆ. ಎಲ್ಲ ಕಡೆ ಬೆಂಕಿಯ ಜೊತೆಗೆ ಹೊಗೆ ಇದ್ದರೂ ಇಲ್ಲೇಕೆ ಹೊಗೆ ಇಲ್ಲ ? ಹೀಗೆ ಚಿಂತಿಸಿ, ಆದ್ದರಿಂದ ಹೊಗೆ ಬರಲು ಬೆಂಕಿ ಮಾತ್ರ ಕಾರಣವಲ್ಲ ; ಒದ್ದೆ ಕಟ್ಟಿಗೆಯೂ ಬೇಕು, ಎಂದು ನಿರ್ಧರಿಸುತ್ತೇವೆ.

ಆದರೆ, ಇದರಂತೆ ಬೆಂಕಿ ಇಲ್ಲದೆ ಹೊಗೆ ಇರುವ ಒಂದು ಸಂದರ್ಭವೂ ಕಂಡಿಲ್ಲವಾದ ಕಾರಣ 'ಹೊಗೆ ಇದ್ದ ಮೇಲೆ ಬೆಂಕಿ ಇರಲೇಬೇಕು' ಎಂದು ತೀರ್ಮಾನಿಸುತ್ತೇವೆ.

ಹೀಗೆ ಭೂಯೋದರ್ಶನ, ವ್ಯಭಿಚಾರ ಅದರ್ಶನ, ಉಪಾಧ್ಯಭಾವನಿಶ್ಚಯ ಈ ಮೂರರ ಸಹಾಯದಿಂದ ಪ್ರತ್ಯಕ್ಷವೇ ಧೂಮ-ಅಗ್ನಿಗಳಿಗೆ ವ್ಯಾಪ್ತಿಯನ್ನು ನಿರ್ಧರಿಸುತ್ತದೆ. ನಾವು ನೋಡದ ಧೂಮ-ವಹ್ನಿಗಳೂ ನೋಡುತ್ತಿರುವ ಧೂಮ-ವಹ್ನಿಗಳಿಗೆ ಸದೃಶವಾಗಿರುವುದರಿಂದ ಅವೆಲ್ಲವನ್ನೂ ಮನಸ್ಸಿನಲ್ಲಿ ಕಲ್ಪಿಸಿಕೊಂಡು, ಪ್ರಪಂಚದ ಎಲ್ಲಾ ಕಾಲದ ವಹ್ನಿ-ಧೂಮಗಳಿಗೂ 'ವ್ಯಾಪ್ತಿ' ಇದೆ ಎಂದು ನಿರ್ಧರಿಸಬಹುದು.

'ವರ್ತಮಾನಸನ್ನಿಕೃಷ್ಟಮಾತ್ರಗ್ರಾಹಿಪ್ರತ್ಯಕ್ಷಂ ಕಥಂ ಅತೀತಾದ್ಯಾಸ್ಪದಾನಾಂ ವ್ಯಾಪ್ತಿಂ ಗೃಹ್ಣೀಯಾತ್ ಇತಿ ಚೇತ್ ನ, ಸಹಕಾರಿಸಾಮರ್ಥ್ಯೇನ ಕರಣಾನಾಂ ಶಕ್ತ್ಯಂತರಾವಿರ್ಭಾವಸ್ಯ ಬಹುಲಮುಪಲಂಭಾತ್ ।' (ಪ್ರ.ಪ.)

ಇದನ್ನು ಶ್ರೀರಾಘವೇಂದ್ರ ಸ್ವಾಮಿಗಳು ಟಿಪ್ಪಣಿಯಲ್ಲಿ ಹೀಗೆ ವಿವರಿಸಿದ್ದಾರೆ- ಅನೇಕ ಕಡೆ ವಹ್ನಿ-ಧೂಮಗಳನ್ನು ನೋಡಿ ಉಂಟಾದ ಸಂಸ್ಕಾರದ ಸಹಾಯದಿಂದ ಕಣ್ಣಿನಲ್ಲಿರುವ ವಿಶಿಷ್ಟ ಶಕ್ತಿಯು ಜಾಗೃತಗೊಳ್ಳುತ್ತದೆ. ಕಣ್ಣೆದುರಿಗಿರುವ ವಹ್ನಿ-ಧೂಮಗಳು ಪ್ರಪಂಚದ ಎಲ್ಲಾ ವಹ್ನಿ-ಧೂಮಗಳಿಗೆ ಸದೃಶವಾಗಿವೆ. ಈ ಸಾದೃಶ್ಯಕ್ಕೆ ಪ್ರತಿಯೋಗಿಗಳು ಆ ಎಲ್ಲಾ ವಹ್ನಿ-ಧೂಮಗಳಾಗಿವೆ. ಈ ಕಾರಣದಿಂದ ಎಲ್ಲಾ ವಹ್ನಿ-ಧೂಮಗಳನ್ನೂ ಕಣ್ಣಿನ ಸಹಾಯದಿಂದ ತಿಳಿದುಕೊಂಡು ಯಾವುದೇ ಧೂಮವಿರಲಿ ಅದು ವಹ್ನಿಗೆ ವ್ಯಾಪ್ತವಾಗಿದೆ, ಎಂಬ ನಿರ್ಧಾವನ್ನು ತಂದುಕೊಳ್ಳುತ್ತೇವೆ-

'ಭೂಯೋದರ್ಶನಜನಿತ-ಸಂಸ್ಕಾರಾವಿರ್ಭೂತಶಕ್ತಿಕಂ ಚಕ್ಷುಃ ಸ್ವಸನ್ನಿಕೃಷ್ಟವ್ಯಕ್ತಿ-ನಿಷ್ಠಸಾದೃಶ್ಯಪ್ರತಿಯೋಗಿ-ಅತೀತಾದಿಗ್ರಾಹಕಂ ಇತ್ಯತ್ರ ತಾತ್ಪರ್ಯಾತ್ ।' *(ರಾ.ಟಿ.)*

ಹೀಗೆ ಕೆಲವೆಡೆ ಪ್ರತ್ಯಕ್ಷದಿಂದಲೇ ವ್ಯಾಪ್ತಿಯು ತಿಳಿಯಲ್ಪಟ್ಟರೆ, ಮತ್ತೆ ಕೆಲವೆಡೆ ಅನುಮಾನದಿಂದ ವ್ಯಾಪ್ತಿಯು ತಿಳಿಯುತ್ತದೆ. ಕೇವಲವ್ಯತಿರೇಕಿ ಅನುಮಾನದಲ್ಲಿ ವ್ಯಾಪ್ತಿಯನ್ನು ತಿಳಿಯುವ ಬಗೆ ಇದು. ಅಲ್ಲಿ ಸಾಧ್ಯಾಭಾವ ಇದ್ದಲ್ಲಿ ಹೇತ್ವಭಾವ ಇದೆ ಎಂದು ನೋಡಿ ತಿಳಿದು, ಅದರ ಆಧಾರದಿಂದ ಹೇತು ಇದ್ದಲ್ಲಿ ಸಾಧ್ಯ ಇರುತ್ತದೆ, ಎಂದು ವ್ಯಾಪ್ತಿಯನ್ನು ಸಾಧಿಸಲಾಗುತ್ತದೆ.

'ಗೌಃ ನ ಪದಾ ಸ್ಪ್ರಷ್ಟವ್ಯಾ' ಎಂಬ ವೇದವಾಕ್ಯವು 'ಯಾವ ಹಸುವನ್ನೂ ಕಾಲಿನಿಂದ ತುಳಿಯಬಾರದು' ಈ ವ್ಯಾಪ್ತಿಯನ್ನು ತಿಳಿಸುತ್ತದೆ.

ಈ ರೀತಿಯಾಗಿ ಪ್ರತ್ಯಕ್ಷ, ಅನುಮಾನ, ಆಗಮಗಳು ವ್ಯಾಪ್ತಿಗೆ ಆಧಾರಗಳು.

ಪಕ್ಷಧರ್ಮತಾ ಅನುಮಾನಾಂಗವಲ್ಲ :

ಸಾಧ್ಯವನ್ನು ಸಾಧಿಸುವ ಹೇತುವು ಪಕ್ಷದಲ್ಲೇ ಇರಬೇಕು ಎನ್ನುವ ನಿಬಂಧನೆಯನ್ನು ನೈಯಾಯಿಕರು ವಿಧಿಸಿದ್ದಾರೆ. ಇದನ್ನೇ 'ಪಕ್ಷಧರ್ಮತಾ' ಎಂದು ಕರೆದು ವ್ಯಾಪ್ತಿ ಮತ್ತು ಪಕ್ಷಧರ್ಮತಾಗಳು ಅನುಮಾನದ ಅಂಗಗಳು ಎಂದು ಅವರು ಹೇಳುತ್ತಾರೆ. ಆದರೆ ಹೇತುವು ಪಕ್ಷದಲ್ಲೇ ಇರಬೇಕೆಂಬ ಆಗ್ರಹ ಸರಿಯಲ್ಲ. ಬೆಟ್ಟದ ಕೆಳಗೆ ನದಿಯ ಪ್ರವಾಹವನ್ನು ಕಂಡು ಬೆಟ್ಟದ ಮೇಲೆ ಮಳೆ ಬಂದಿದೆ ಎಂದು ನಾವು ಊಹೆ ಮಾಡುತ್ತೇವೆ. ಇಂತಹ ಸಂದರ್ಭದಲ್ಲಿ ಸಾಧ್ಯ-ಹೇತುಗಳು ಒಂದೇ ಅಧಿಕರಣದಲ್ಲಿ ಇರುವುದಿಲ್ಲ. ಇದನ್ನು ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ವಿವೇಚಿಸಿದ ಕ್ರಮ ಮನನೀಯವಾದುದು-ವಹ್ನಿ-ಧೂಮಗಳು ಸಮಾನದೇಶದಲ್ಲಿವೆ. ಆದರೆ, ಅವೆರಡೂ ಸಮಾನಕಾಲಿಕಗಳಲ್ಲ. ವಹ್ನಿ ಮೊದಲು, ಆಮೇಲೆ ಹೊಗೆ. ಅದರಂತೆ, ಆಕಾಶದಲ್ಲಿ ಕೃತ್ತಿಕಾ ನಕ್ಷತ್ರವು ಉದಯಿಸಿತೆಂದರೆ ರೋಹಿಣೀ ನಕ್ಷತ್ರವು ಉದಯಿಸುತ್ತದೆ ಎಂದು ಊಹೆ ಮಾಡುತ್ತೇವೆ. ಕೃತ್ತಿಕಾ ನಕ್ಷತ್ರದ ಅನಂತರ ಉದಯಿಸುವ ನಕ್ಷತ್ರ ರೋಹಿಣೀ. ಹೀಗಾಗಿ ಕೃತ್ತಿಕಾನಕ್ಷತ್ರವು ಉದಿಸಿತೆಂದರೆ ಮುಂದೆ ಸ್ವಲ್ಪ ಸಮಯದಲ್ಲೇ ರೋಹಿಣೀನಕ್ಷತ್ರವು ಉದಿಸುತ್ತದೆ ಎಂದು ನಿರ್ಣಯಿಸಬಹುದು. ಇಲ್ಲಿ ಕೃತ್ತಿಕಾನಕ್ಷತ್ರದ ಉದಯವೂ ರೋಹಿಣೀನಕ್ಷತ್ರದ ಉದಯಪೂರ್ವಕಾಲವೂ (ರೋಹಿಣ್ಯುದಯಾಸತ್ತಿ) ಸಮಾನಕಾಲಿಕವಾದರೂ ಒಂದೇ ದೇಶದಲ್ಲಿಲ್ಲ. ಆದ್ದರಿಂದ ಸಮಾನಕಾಲಿಕವಾದ ಭಿನ್ನ ದೇಶದಲ್ಲಿರುವ ಈ ಎರಡಕ್ಕೆ ವ್ಯಾಪ್ತಿ ಇದೆ. ಇದರಂತೆ ದೇಶವೂ ಕಾಲವೂ ಎರಡೂ ವಿಭಿನ್ನವಾಗಿದ್ದರೂ ವ್ಯಾಪ್ತಿ ಇರಬಹುದು. ದೊಡ್ಡ ಬೆಟ್ಟದ ಮೇಲೆ ಮಳೆಯಾದರೆ ಕೆಳಗಡೆ ರಭಸವಾಗಿ ರಾಡಿಯಾದ ನೀರಿನ ಪ್ರವಾಹ ಹರಿಯುತ್ತದೆ. ಇಂತಹ ತುಂಬಿದ ನದೀಪ್ರವಾಹವನ್ನು ನೋಡಿ ಬೆಟ್ಟದ ಮೇಲೆ ಮಳೆಯಾಗಿದೆ ಎಂದು ಊಹಿಸುತ್ತೇವೆ. ಇಲ್ಲಿ ನೀರಿನ ಪ್ರವಾಹ ಮಳೆಯಾದ ಸ್ವಲ್ಪ ಸಮಯದ ಅನಂತರ ಬೆಟ್ಟದ ಕೆಳಗಡೆ ಹರಿಯುತ್ತಿರುತ್ತದೆ. ಮಳೆ ಸ್ವಲ್ಪ ಸಮಯಕ್ಕೆ ಮೊದಲೇ ಬೆಟ್ಟದ ಮೇಲೆ ಬಿದ್ದಿರುತ್ತದೆ. ಹೀಗಾಗಿ ಇವೆರಡೂ ವಿಭಿನ್ನ ಕಾಲಿಕಗಳು. ವಿಭಿನ್ನದೈಶಿಕಗಳು ಎನ್ನುವುದಂತೂ ಸ್ಪಷ್ಟವಾಗಿದೆ. ಆದರೂ ಇವೆರಡಕ್ಕೆ ವ್ಯಾಪ್ತಿ ಇದೆ.

ಇಂತಹ ಸಂದರ್ಭದಲ್ಲಿ ಸಾಧ್ಯವನ್ನು ಸಾಧಿಸಲಾಗುವ ಧರ್ಮಿಯಲ್ಲೇ (ಪಕ್ಷದಲ್ಲೇ) ಹೇತುವು ಇರಬೇಕೆಂಬ ನಿರ್ಬಂಧವಿಲ್ಲ. ಆದ್ದರಿಂದ ಅನುಮಾನಕ್ಕೆ ವ್ಯಾಪ್ತಿಯು ಮಾತ್ರ ಅಂಗ; ಪಕ್ಷಧರ್ಮತಾದ ಅಗತ್ಯವಿಲ್ಲ. ಅದರ ಬದಲು 'ಸಮುಚಿತದೇಶವೃತ್ತಿತ್ವ' ಎನ್ನುವುದು ಅನುಮಾನದ ಅಂಗ ಎಂದು ದ್ವೈತದರ್ಶನದ ವಾದ.

ತರ್ಕವೂ ಅರ್ಥಸಾಧಕ :

ತರ್ಕಶಬ್ದಕ್ಕೆ ಅನುಮಾನ ಎಂಬ ಅರ್ಥವೂ ಇದೆ. ಆ ಅರ್ಥದಲ್ಲಿ ತರ್ಕವು ಪ್ರಮಾಣ. ಅದರಲ್ಲಿ ವಿವಾದವಿಲ್ಲ. 'ಅನಿಷ್ಟಾಪಾದನೆ' ಎನ್ನುವ ಅರ್ಥವೂ ತರ್ಕಶಬ್ದಕ್ಕೆ ಇದೆ. ಈ ಅರ್ಥದ ತರ್ಕವು ಪ್ರಮಾಣ ಹೌದೋ, ಅಲ್ಲವೋ ? ಎನ್ನುವ ಜಿಜ್ಞಾಸೆ ಇದೆ. ತಾರ್ಕಿಕರು ಅಂತಹ ತರ್ಕವು ಪ್ರಮಾಣವಲ್ಲ, ಎನ್ನುತ್ತಾರೆ. 'ಸರಿಯಾದ ಆಹಾರ ಸೇವಿಸಿದ್ದರೆ ಆರೋಗ್ಯ ಕೆಡುತ್ತಿರಲಿಲ್ಲ' ಎನ್ನುವ ತರ್ಕದಲ್ಲಿ ತಥ್ಯಾಂಶವಿಲ್ಲ. ಶುದ್ಧವಾದ ಆಹಾರವಿಲ್ಲದೆ, ಆರೋಗ್ಯ ಕೆಟ್ಟಾಗ ಈ ತರ್ಕವನ್ನು ಪ್ರಯೋಗಿಸಲಾಗುತ್ತದೆ. ಅಂದಮೇಲೆ ತರ್ಕ ಹೇಳುವ 'ಸೇವಿಸದಿದ್ದರೆ' 'ಕೆಡುತ್ತಿರಲಿಲ್ಲ' ಎನ್ನುವ ಎರಡೂ ಅಂಶಗಳು ತಪ್ಪು. ಹೀಗೆಂದು ತಾರ್ಕಿಕರ ವಾದ. ಆದರೆ, ಇದು ಸರಿಯಲ್ಲ. ಆ ತರ್ಕ ಇಲ್ಲಿಗೆ ನಿಲ್ಲುವುದಿಲ್ಲ. 'ನಿನ್ನ ಆರೋಗ್ಯ ಕೆಟ್ಟಿದೆ. ಹೀಗಾಗಿ ನೀನು ಸರಿಯಾದ ಆಹಾರ ಸೇವಿಸಿಲ್ಲ' ಎನ್ನುವಲ್ಲಿ ಪರ್ಯವಸಾನ ಹೊಂದುತ್ತದೆ. ಹೀಗೆ ಹೇಳುವುದರಲ್ಲಿ ತಪ್ಪೇನಿಲ್ಲ. ಆದ್ದರಿಂದ ತರ್ಕವೂ ಪ್ರಮಾಣ-

'ಯಥಾ ಸಾಧನಾನುಮಾನೇ ನ ವ್ಯಾಪ್ತಿಮಾತ್ರಂ ನಾಪಿ ಪಕ್ಷಧರ್ಮತಾಮಾತ್ರಂ ಸಾಧ್ಯಪ್ರಮಿತಿಸಾಧನಂ, ಕಿಂತು ಮಿಲಿತಮೇವ, ಏವಮನಿಷ್ಟಾಪಾದನಂ ವಿಪರ್ಯಯೇ ಪರ್ಯವಸಾನಂ ಚೋಭಯಂ ಮಿಲಿತಮೇವ ಅನುಮಿತಿಸಾಧನಂ ಭವತೀತಿ ತರ್ಕಸ್ಯ ಪ್ರಾಮಾಣ್ಯಂ ಉಪಪದ್ಯತೇ ।' *(ರಾ. ಟಿ.)*

ಇಂತಹ ತರ್ಕವು ಸಂಶಯ ಬಂದಾಗ ಕೆಲವೆಡೆ ತಾನೇ ಸ್ವತಂತ್ರವಾಗಿ ಸಾಧ್ಯವನ್ನು ಸಾಧಿಸುತ್ತದೆ. ಕೆಲವೆಡೆ ವಿರುದ್ಧವಾದ ಸಂಶಯಗಳನ್ನು ನಿರಾಕರಿಸುವ ಮೂಲಕ ಪ್ರಮಾಣಗಳಿಗೆ ಸಹಕಾರವನ್ನು ಕೊಡುತ್ತದೆ. 'ಬೆಟ್ಟದಲ್ಲಿ ಬೆಂಕಿ ಇದೆಯೋ ಇಲ್ಲವೋ?' ಎಂಬ ಸಂದೇಹ ಬಂದಾಗ 'ಬೆಂಕಿಯು ಇಲ್ಲದಿರುತ್ತಿದ್ದರೆ ಹೊಗೆ ಕಾಣಿಸುತ್ತಿದ್ದಿಲ್ಲ ; ಆದ್ದರಿಂದ ಬೆಂಕಿ ಇದೆ' ಈ ತರ್ಕವು ತಾನೇ ಸಾಧ್ಯವನ್ನು ಸಾಧಿಸಿ ಕೊಡುತ್ತದೆ. 'ಹೊಗೆ ಇದ್ದಲ್ಲೆಲ್ಲ ಬೆಂಕಿ ಏಕಿರಬೇಕು ?' ಎಂದು ಧೂಮಾಗ್ನಿಗಳ ವ್ಯಾಪ್ತಿಯ ಬಗ್ಗೆ ಸಂದೇಹ

ಬಂದಾಗ 'ಹೊಗೆ ಇರುವಲ್ಲಿ ಬೆಂಕಿಯು ಇರದಿದ್ದರೆ ಬೆಂಕಿಯಿಂದ ಹೊಗೆ ಹುಟ್ಟಲು ಸಾಧ್ಯವಿಲ್ಲ. ಆದ್ದರಿಂದ ಹೊಗೆ ಇದೆ ಎಂದ ಮೇಲೆ ಬೆಂಕಿ ಇರಲೇ ಬೇಕು.' ಈ ತರ್ಕವು ಬೆಂಕಿಯನ್ನು ತಾನೇ ಸಾಧನೆ ಮಾಡುವ ಬದಲು ವಹ್ನಿ-ಧೂಮಗಳಿಗೆ ವ್ಯಾಪ್ತಿಯನ್ನು ಸಮರ್ಥಿಸಿ, ಆ ವ್ಯಾಪ್ತಿಯ ಆಧಾರದಿಂದ ವಹ್ನಿಯನ್ನು ತಿಳಿಯಲು ಸಹಕಾರ ನೀಡುತ್ತದೆ.

ಸೋಽಯಂ ಕ್ವಚಿತ್ ವಿಪರೀತಶಂಕಾನಿರಸನದ್ವಾರೇಣ ಪ್ರಮಾಣಾನಾಂ ಅನುಗ್ರಾಹಕೋಽಪಿ ಭವತಿ ॥

ಹೇತ್ವಾಭಾಸ-ನಿಗ್ರಹಸ್ಥಾನಗಳು :

ಅನುಮಾನಕ್ಕೆ ಬರಬಹುದಾದ ದೋಷಗಳು ಹೇತ್ವಾಭಾಸಗಳು. ವಾದದಲ್ಲಿ ಹೇಳಬಹುದಾದ ದೋಷಗಳು ನಿಗ್ರಹಸ್ಥಾನಗಳು. ಅನುಮಾನದ ದೋಷಗಳು ವ್ಯಭಿಚಾರ, ವಿರೋಧ, ಅಸಿದ್ಧಿ, ಬಾಧ, ಸತ್ಪ್ರತಿಪಕ್ಷ ಎಂಬುದಾಗಿ ಐದು ವಿಧ. ನಿಗ್ರಹಸ್ಥಾನಗಳು ಒಟ್ಟು 21 ವಿಧ ಎನ್ನುತ್ತಾರೆ ತಾರ್ಕಿಕರು. ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ವಿರೋಧ, ಅಸಂಗತಿ, ನ್ಯೂನ, ಆಧಿಕ್ಯ ಎಂದು ನಾಲ್ಕೇ ವಿಧವಾಗಿ ಅನುಮಾನ ದೋಷಗಳನ್ನು ವಿಭಾಗ ಮಾಡಲಾಗಿದೆ. ಇವುಗಳ ಅವಾಂತರ ವಿಭಾಗಗಳಲ್ಲೇ ತಾರ್ಕಿಕರು ಹೇಳುವ ಐದೂ ವಿಧದ ಹೇತ್ವಾಭಾಸಗಳನ್ನು ಅಂತರ್ಭಾವ ಮಾಡಲಾಗಿದೆ. ಅದರಂತೆ ಈ ನಾಲ್ಕರ ಜೊತೆ ಸಂವಾದ, ಅನುಕ್ತಿ ಎಂಬ ಎರಡು ದೋಷಗಳನ್ನು ಸೇರಿಸಿ ಒಟ್ಟು ಆರು ನಿಗ್ರಹಸ್ಥಾನಗಳು. ತಾರ್ಕಿಕರು ಹೇಳುವ 21 ನಿಗ್ರಹಸ್ಥಾನಗಳೂ ಈ ಆರರಲ್ಲೇ ಸೇರುತ್ತವೆ. ಇದನ್ನು ಪ್ರಮಾಣಪದ್ಧತಿಯಲ್ಲಿ ಸಮರ್ಥಿಸಲಾಗಿದೆ. ಅನುಮಾನಪ್ರಕರಣದ ಬಹುತೇಕ ಭಾಗ ಈ ಚರ್ಚೆಗಾಗಿಯೇ ಮೀಸಲಾಗಿದೆ.

ಆಗಮ ಪ್ರಕರಣ :

ಪ್ರಮಾಣಪದ್ಧತಿಯ ಈ ಪ್ರಕರಣವು ಸಂಕ್ಷಿಪ್ತವಾದುದು. ವರ್ಣಗಳ ನಿತ್ಯತ್ವದ ಬಗ್ಗೆ ಇರುವ ವಿವಾದವನ್ನು ಇಲ್ಲಿ ಪ್ರಸ್ತಾಪಿಸಲಾಗಿಲ್ಲವಾದರೂ ತಿಳಿದು ಮರೆಯಾಗುವ ಅನೇಕ ವರ್ಣಗಳಲ್ಲಿ 'ಒಂದು ಪದ' ಎನ್ನುವ ಜ್ಞಾನ ಬರುವುದು ಹೇಗೆ? ಎನ್ನುವ ಸಮಸ್ಯೆಯನ್ನು ಕೇವಲ ಒಂದು ವಾಕ್ಯದಲ್ಲಿ ನಿರೂಪಿಸಲಾಗಿದೆ- ಒಂದು ಪದದಲ್ಲಿ ಹತ್ತಾರು ವರ್ಣಗಳಿದ್ದಾಗ ಕ್ರಮವಾಗಿ ಒಂದೊಂದೇ ವರ್ಣಗಳ ಅನುಭವವು ಉಚ್ಚಾರಣೆಗೆ ಅನುಗುಣವಾಗಿ ಬರುತ್ತದೆ. ಕೊನೆಯ ಅಕ್ಷರ ಕಿವಿಗೆ ಬಿದ್ದಾಗ ಹಿಂದಿನ ಅವಷ್ಟೂ

ವರ್ಣಗಳ ಜ್ಞಾನವು ಒಂದೇ ಬಾರಿಗೆ ಉಂಟಾಗುತ್ತದೆ. ಅಷ್ಟೇ ಅಲ್ಲ, ಆ ವರ್ಣಗಳು ಕ್ರಮವಿಲ್ಲದೆ ಒಂದು ಗುಂಪಾಗಿ ತಿಳಿಯಲ್ಪಡುವುದಿಲ್ಲ. ನಮಗೆ ಆ ವರ್ಣಗಳ ಅನುಭವ ಯಾವ ಕ್ರಮದಲ್ಲಿ ಬಂದಿತ್ತೋ ಅಂತಹ ಕ್ರಮಸಹಿತವಾಗಿ ಅಷ್ಟೂ ವರ್ಣಗಳು ತಿಳಿಯುತ್ತವೆ. ಆಮೇಲೆ ಆ ಪದದ ಅರ್ಥ ಜ್ಞಾಪಕಕ್ಕೆ ಬರುತ್ತದೆ. ಇದರಂತೆ ಹತ್ತಾರು ಪದಗಳ ವಾಕ್ಯವನ್ನು ಕೇಳಿದಾಗಲೂ ಅನೇಕ ಪದಗಳಲ್ಲಿ 'ಒಂದು ವಾಕ್ಯ' ಎನ್ನುವ ಜ್ಞಾನವು ಬರುತ್ತದೆ. ಇದು ದ್ವೈತದರ್ಶನದ ವಾದ.

ಅನ್ವಿತಾಭಿಧಾನವಾದ :

ಎರಡು ಪದಾರ್ಥಗಳ ಅನ್ವಯವೇ ವಾಕ್ಯಾರ್ಥ. ಅನ್ವಯ ಎಂದರೆ ಸಂಬಂಧ. ಈ ಸಂಬಂಧವೂ ಪದದ ಅರ್ಥವೇ ಆಗಿದೆ, ಎನ್ನುವುದು ದ್ವೈತದರ್ಶನ. ಆದ್ದರಿಂದ ಪದಗಳಿಗೆ ಅನ್ವಿತಸ್ವಾರ್ಥದಲ್ಲಿ ಶಕ್ತಿ, ಕೇವಲ ತನ್ನ ಅರ್ಥದಲ್ಲಿ ಅಲ್ಲ. ಹೀಗೆ ದ್ವೈತ ದರ್ಶನವು ಅನ್ವಿತಾಭಿಧಾನವನ್ನು ಸಮರ್ಥಿಸುತ್ತದೆ. ಮೀಮಾಂಸಕರೂ ಇದೇ ವಾದವನ್ನು ಮಂಡಿಸುತ್ತಾರೆ. ಆದರೆ ಕಾರ್ಯಾನ್ವಿತಾಭಿಧಾನವು ಆ ದರ್ಶನದ ಸಿದ್ಧಾಂತ. ಅಷ್ಟೇ ಅಲ್ಲದೆ, ವಿಶೇಷಾನ್ವಯದಲ್ಲೇ ಪದಶಕ್ತಿಯನ್ನು ಪ್ರಾಭಾಕರ ಮೀಮಾಂಸಕರು ಸಮರ್ಥಿಸುತ್ತಾರೆ. ದ್ವೈತದರ್ಶನದಲ್ಲಿ ಯೋಗ್ಯೇತರಾನ್ವಿತ ಸ್ವಾರ್ಥದಲ್ಲಿ ಪದಶಕ್ತಿ; ಅನ್ವಯವಿಶೇಷಜ್ಞಾನಕ್ಕೆ ಪದಾಂತರ ಸಮಭಿವ್ಯಾಹಾರಜ್ಞಾನವು ಕಾರಣ ಎಂದು ಒಪ್ಪಲಾಗಿದೆ.

ಈ ಸಂದರ್ಭದಲ್ಲಿ ಪ್ರಮಾಣಪದ್ಧತಿಯ ಒಂದು ವಾಕ್ಯ ಹೀಗಿದೆ-

'ಪ್ರತ್ಯೇಕಂ ಸಾಮಾನ್ಯತೋ ಯೋಗ್ಯೇತರಾನ್ವಿತ-ಸ್ವಾರ್ಥಾಭಿಧಾನಶಕ್ತೀನಿ ಪದಾನಿ ಪದಾಂತರಸನ್ನಿಧಾನ-ಆಹಿತಶಕ್ತ್ಯಂತರಾಣಿ ವಿಶೇಷತೋಽಪಿ ಅನ್ವಿತಾನ್ ಸ್ವಾರ್ಥಾನ್ ಅಭಿದಧತಿ ।'

'ಪದಗಳು ತಮ್ಮ ಸಹಜ ಶಕ್ತಿಯಿಂದ ಅನ್ವಯಸಾಮಾನ್ಯವನ್ನು ತಿಳಿಸುತ್ತವೆ. ತಮ್ಮ ಜೊತೆಯಲ್ಲಿರುವ ಮತ್ತೊಂದು ಪದಗಳಿಂದ ಅವುಗಳಲ್ಲಿ ಹೊಸದೊಂದು ಶಕ್ತಿಯು ಉಂಟಾಗುತ್ತದೆ. ಆ ಶಕ್ತಿಯು ಅನ್ವಯವಿಶೇಷವನ್ನು ತಿಳಿಸುತ್ತದೆ'

ಮೇಲಿನ ವಾಕ್ಯದಿಂದ ಸಾಮಾನ್ಯವಾಗಿ ತಿಳಿಯುವ ಈ ಅರ್ಥವು ದ್ವೈತಸಿದ್ಧಾಂತಕ್ಕೆ ವಿರುದ್ಧವಾದುದು. ಪದದಲ್ಲಿ ಎರಡು ವಿಧದ ಶಕ್ತಿಯನ್ನು ದ್ವೈತದರ್ಶನದಲ್ಲಿ

ಅಂಗೀಕರಿಸಲಾಗಿಲ್ಲ. ಹಾಗೆಂದು ಸುಧಾದಲ್ಲಿ ಟೀಕಾಚಾರ್ಯರೇ ಸ್ಪಷ್ಟವಾಗಿ ಸಮರ್ಥಿಸಿದ್ದಾರೆ. ಅದಕ್ಕೆ ಅನುಸಾರವಾಗಿ ಪ್ರಮಾಣಪದ್ಧತಿಯ ಈ ವಾಕ್ಯವನ್ನು ರಾಘವೇಂದ್ರ ಸ್ವಾಮಿಗಳು ಹೀಗೆ ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆ-

'ಪದಾಂತರಸನ್ನಿಧಾನಾಹಿತ ಶಕ್ತ್ಯಂತರಾಣಿ' ಎನ್ನುವ ಪ್ರಮಾಣಪದ್ಧತಿಯ ವಾಕ್ಯಕ್ಕೆ ಮತ್ತೊಂದು ಪದದ ಸನ್ನಿಧಾನದಿಂದ ಪದದಲ್ಲಿ ಹೊಸದಾದ ಶಕ್ತಿಯು ಹುಟ್ಟುತ್ತದೆ, ಎಂದು ಅರ್ಥವಲ್ಲ. ಇಲ್ಲಿ 'ಶಕ್ತಿ' ಎಂಬ ಪದಕ್ಕೆ 'ಸಹಕಾರಿ' ಎಂದು ಅರ್ಥ. ಪದಶಕ್ತಿಗೆ ಪದಾಂತರಸನ್ನಿಧಾನದ ಸಹಕಾರ ದೊರೆತಾಗ ಅದೇ ಶಕ್ತಿಯು ಅನ್ವಯವಿಶೇಷವನ್ನು ಬೋಧಿಸುತ್ತದೆ, ಎಂದು ಅರ್ಥ. ಆದ್ದರಿಂದ 'ಪದಾಂತರಸನ್ನಿಧಾನೇನ ಆಹಿತ ಶಕ್ತ್ಯಂತರಂ' ಎಂದು ಸಮಾಸ ಮಾಡಬಾರದು. 'ಪದಾಂತರಸನ್ನಿಧಾನಮೇವ ಆಹಿತಶಕ್ತ್ಯಂತರಂ' ಎಂದು ಸಮಾಸವನ್ನು ಮಾಡಬೇಕು. ಪದದಲ್ಲಿರುವ ಅನ್ವಯಸಾಮಾನ್ಯವನ್ನು ತಿಳಿಸುವ ಶಕ್ತಿಯೇ ಪದಾಂತರದ ಸನ್ನಿಧಾನವಿದ್ದಾಗ ಅನ್ವಯವಿಶೇಷವನ್ನು ತಿಳಿಸುತ್ತದೆ, ಎಂದು ಒಟ್ಟು ತಾತ್ಪರ್ಯ. ಇದರಿಂದ ಒಂದೇ ಪದದಲ್ಲಿ ಎರಡು ವಿಧದ ಶಕ್ತಿಯನ್ನು ಒಪ್ಪಬೇಕು, ಎನ್ನುವ ತಪ್ಪು ಕಲ್ಪನೆಯು ಪರಿಹಾರವಾಗುತ್ತದೆ.

ಮುಂದೆ ಈ ಪ್ರಕರಣದಲ್ಲಿ, ದರ್ಶನಾಂತರಗಳಲ್ಲಿ ಹೇಳಲಾಗುವ ಇತರ ಪ್ರಮಾಣಗಳನ್ನು ದ್ವೈತದರ್ಶಣದಲ್ಲಿ ನಿರೂಪಿಸಿರುವ ಮೂರೇ ಪ್ರಮಾಣಗಳಲ್ಲಿ ಸೇರಿಸುವ ಕ್ರಮುವನ್ನೂ ತಿಳಿಸಲಾಗಿದೆ. ಕೊನೆಯಲ್ಲಿ ಜಟಿಲವಾದ ಪ್ರಾಮಾಣ್ಯಸ್ವತಸ್ತ್ವವಾದವನ್ನು ಸಂಕ್ಷಿಪ್ತವಾಗಿ ನಿರೂಪಿಸಲಾಗಿದೆ.

ಹೀಗೆ ಪ್ರಮಾಣಪದ್ಧತಿಯು ದ್ವೈತಸಿದ್ಧಾಂತದ ಪ್ರಮಾಣಗಳ ಕುರಿತ ಚಿಂತನೆಗಳನ್ನು ಸಂಕ್ಷಿಪ್ತವಾಗಿ ಸಂಗ್ರಹಿಸಿರುವ ಒಂದು ಅಗತ್ಯವಾದ ಕೃತಿ ಎನಿಸಿದೆ. ಸರ್ವಮೂಲಗ್ರಂಥಗಳ ಅಧ್ಯಯನಕ್ಕಿಂತ ಪೂರ್ವಭಾವಿಯಾಗಿ ಈ ಗ್ರಂಥದ ಅಧ್ಯಯನವು ಅತ್ಯಗತ್ಯವಾದುದು.

ಈ ಪುಸ್ತಕವು ಎರಡು ಟಿಪ್ಪಣಿಗಳನ್ನೂ ಒಳಗೊಂಡಿದೆ. ಶ್ರೀರಾಘವೇಂದ್ರ ಸ್ವಾಮಿಗಳ ಗಂಭೀರ ಶೈಲಿಯ ಸಂಕ್ಷಿಪ್ತ ಟಿಪ್ಪಣಿ ಹಾಗೂ ಶ್ರೀವೇದೇಶತೀರ್ಥರ ಸಮಗ್ರವಾದ ಸುಲಭ ಶೈಲಿಯ ಟಿಪ್ಪಣಿ. ಮೂಲಗ್ರಂಥವು ಸುಲಭ ಶೈಲಿಯಲ್ಲಿದ್ದರೂ ಕೆಲವೆಡೆ ಟಿಪ್ಪಣಿಗಳ ಅನಿವಾರ್ಯತೆ ಇದೆ. ಈಗಾಗಲೇ ಎಂಟು ಟಿಪ್ಪಣಿಗಳು ಮುದ್ರಿತವಾಗಿದ್ದರೂ ಅವು ವಿಸ್ತೃತವಾಗಿರುವುದರಿಂದ ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದರ ಸೂಚನೆಯಂತೆ ಎರಡೇ

ಟಿಪ್ಪಣಿಗಳನ್ನು ಆರಿಸಿಕೊಳ್ಳಲಾಗಿದೆ. ವಿಷಯಗಳಿಗೆ ಅನುಗುಣವಾಗಿ ಪ್ಯಾರಾಗಳನ್ನು ವಿಭಾಗಿಸಿ ಶೀರ್ಷಿಕೆಯನ್ನು ನೀಡಿರುವುದು ಈ ಕೃತಿಯ ಒಂದು ವಿಶೇಷತೆ. ಇದಲ್ಲದೆ, ಇದುವರೆಗೆ ಮುದ್ರಿತವಾಗಿರುವ ಕೆಲವು ಪುಸ್ತಕಗಳಲ್ಲಿ ಹೇತ್ವಾಭಾಸ-ನಿಗ್ರಹಸ್ಥಾನ ನಿರೂಪಣೆಯ ಪ್ರಕರಣ ಸ್ವಲ್ಪ ಅವ್ಯವಸ್ಥೆಯಿಂದ ಕೂಡಿತ್ತು. ಒಂದು ಮೂಲಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ಟಿಪ್ಪಣಿ ಇನ್ನೊಂದು ಮೂಲದ ಜೊತೆ ಸೇರಿತ್ತು. ಅದನ್ನು ಸಾಧ್ಯವಾದಷ್ಟು ಪರಿಶೀಲಿಸಿ ಸರಿಪಡಿಸಲಾಗಿದೆ. ಅಭಿಮಾನಿ ಜಿಜ್ಞಾಸುಗಳು ಇದರ ಸದುಪಯೋಗವನ್ನು ಪಡೆದುಕೊಳ್ಳುತ್ತಾರೆ ಎಂದು ಆಶಿಸುತ್ತೇವೆ.

ಈ ಪುಸ್ತಕ ಮುದ್ರಣದ ಸೂಚನೆಯನ್ನು ಮನ್ನಿಸಿ ಅನುಗ್ರಹಿಸಿದ ಪೂಜ್ಯ ಶ್ರೀಗಳವರಿಗೆ ಅನಂತ ಪ್ರಣಾಮಗಳು. ಕರಡನ್ನು ತಿದ್ದಿ ಸಹಕರಿಸಿದ ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠದ ಅಧ್ಯಾಪಕರಿಗೂ ಕೃತಜ್ಞತೆಗಳು.

ತಾ। 25.03.2004

ಸಂಪಾದಕರು

ಎ. ಹರಿದಾಸ ಭಟ್ಟ

ಪ್ರಾಚಾರ್ಯರು

ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠ,

ಬೆಂಗಳೂರು.

विषयानुक्रमणिका

क्र.सं.	विषया	पृ.सं.
	प्रत्यक्षपरिच्छेदः	१-६६
१.	लक्षणलक्षणम्	४
२.	अलक्षणवैविध्यम्, लक्षणज्ञानप्रयोजनञ्च	५
३.	प्रमाणसामान्यलक्षणम्	९
४.	प्रमातृप्रमेययोर्लक्षणम्	१४
५.	संशयकारणविषये भूषणकारादिमतम्	१६
६.	असाधारणधर्मस्य साधारणधर्मेऽन्तर्भावः	१८
७.	भ्रमविषये विवादाः	२३
८.	प्राभाकराद्युक्तप्रमाणलक्षणस्यायुक्तता	३०
९.	प्रमाणविभागः	३५
१०.	केवलप्रमाणविभागः	३७
११.	योगिज्ञानत्रैविध्यम्	३८
१२.	अयोगित्रैविध्यम्	४२
१३.	परोक्तचातुर्विध्यस्यायुक्तता	४३
१४.	अनुप्रमाणलक्षणम्	४४
१५.	द्विविधं प्रमाणमित्युक्तविभागे आक्षेपसमाधाने	४६
१६.	अनुप्रमाणविभागः	४८
१७.	साक्षीन्द्रियनिरूपणम्	५०
१८.	प्राकृतेन्द्रियाणि तद्विषयाश्च	५०
१९.	स्मृतेर्याथार्थ्योपपादनम्	५२

क्र.सं.	विषया	पृ.सं.
२०.	विषयसन्निकृष्टमिन्द्रियं प्रत्यक्षमिति सिद्धान्तनिरूपणम् प्रत्यक्षचातुर्विध्यकथनञ्च	५५
२१.	प्रकारान्तरेणेन्द्रियविभागः, षड्विधसन्निकर्षनिरासश्च	५८
२२.	निर्विकल्पकप्रत्यक्षनिराकरणम्	६२
२३.	प्रत्यक्षस्य फलनिरूपणम्	६५
	अनुमानपरिच्छेदः	६७-१६६
२४.	अथानुमान विभागः	८१
२५.	तर्कस्य पक्षाङ्गनिरूपणम्	८५
२६.	तर्के असिद्धेः विरोधस्य चादोषत्वम्	८९
२७.	परोक्तांनुमानविभागभङ्गः	९२
२८.	केवलव्यतिरेकिस्वरूपनिरूपणम्	९५
२९.	अन्वयव्यतिरेकिस्वरूपनिरूपणम्	९५
३०.	पुनरनुमानस्य द्वैविध्यकथनम्	९८
३१.	परार्थानुमानेऽवयवनियमनिरासः	१००
३२.	अनुमानदोषनिरूपणम्	१०३
३३.	निग्रहस्थाननिरूपणम्	१०६
३४.	जातिनिरूपणम्	१२२
३५.	परोक्तहेत्वाभासानाम् अन्तर्भावः	१५३
३६.	सोपाधिकस्यान्तर्भावः	१५५
३७.	आश्रयासिद्धेरन्तर्भावः	१५६
३८.	पक्षधर्मत्वासिद्धेरन्तर्भावः	१५७

क्र.सं.	विषया	पृ.सं.
३९.	अनैकान्तिकान्तर्भावः	१५८
४०.	बाधस्यान्तर्भावः	१६०
	अथागमपरिच्छेदः	१६७-२०६
४१.	पदानां कुत्र शक्तिः ?	१७४
४२.	वाक्येऽन्वयबोधोपायनिरूपणम्	१७७
४३.	आगमविभागकथनम्	१८५
४४.	आगमस्यानुमानेऽन्तर्भावनिरासः	१८६
४५.	अर्थापत्त्यादीनामन्तर्भावकथनम्	१८८
४६.	उपमानस्यान्तर्भावनिरूपणम	१९०
४७.	अनुपलब्ध्यादीनामन्तर्भावकथनम्	१९१
४८.	प्रामाण्यस्वतस्त्वम्	१९६

०-०-०

॥ प्रमाणपद्धतिः ॥

॥ अथ प्रत्यक्षपरिच्छेदः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

प्रणम्य चरणाम्भोजयुगलं कमलापतेः ।
प्रमाणपद्धतिं कुर्मो बालानां बोधसिद्धये ॥ १ ॥

॥ श्रीराघवेन्द्रतीर्थविरचितः भावबोधः ॥

लक्ष्मीनारायणं नत्वा तथा मध्वादिदेशिकान् ।
प्रमाणपद्धतेर्भावदीपं कुर्यां यथामति ।

प्रारिप्सितग्रन्थविघ्नविधातादिप्रयोजनकं भगवत्प्रणामरूपं मङ्गलमादौ कुर्वन्नेव चिकीर्षितं प्रतिजानीते - **प्रणम्येति** ॥ कमलापतेरित्युक्त्या सकलवाङ्मनसदेवतायाः श्रियोऽपि भगवदुपसर्जनत्वेन प्रणतिरुक्ता भवति । प्रमाणेति भावे करणे च ल्युडन्तम् । प्रमाणानां केवलानुप्रमाणानां पद्धतिरुद्देश्यसामान्यलक्षणविभागविशेषोद्देशविशेषलक्षणतत्परिक्षादिरूपा पद्धतिशब्दिता रीतिर्यस्मिन् ग्रन्थे तं ग्रन्थम् । कुर्म इति परस्मैपदोक्त्या सूचितं प्रयोजनमाह- **बालानामिति** ॥ प्रमाणानामुक्तरूपपद्धतेर्बोधसिद्धय इत्यर्थः । नित्यसापेक्षत्वात् समासः । देवदत्तस्य गुरुकुलमिति यथा ॥

॥ श्रीवेदेशतीर्थविरचितम् भावविवरणम् ॥

प्रमाणजातैरवबुद्ध्य यस्य सारं पदं भक्तवरा (त्यक्तभवा) भजन्ति ।
जना निजानन्दपदेच्छवोऽलं तं वासवीसूनुमहं प्रपद्ये ॥

श्रीमध्वं जयतीर्थराजमपि च श्रीराघवाङ्घ्र्यम्बु-
जासक्तान्तःकरणान् रघूत्तमयतीनानम्य विद्यागुरून्।
वेदव्यासयतींश्च पद्धतिगताभिप्रायसंवर्णनं
वेदेशस्तनुते यतिर्गुरुकृपामालम्ब्य धीशुद्धये।। २।।

इह खलु सुखमेव मे स्याद् दुःखं मनागपि मा भूदिति निखिलापेक्षितमोक्षस्येश्वरप्रसादमन्तरेण असम्भवात् तस्य च तत्साक्षात्कारमन्तरेणानुदयात् तस्य च वैराग्यादिद्वारा नित्यानित्यवस्तुनिश्चयसाध्यत्वात् नित्यानित्यवस्तुनिश्चयस्य च प्रमाणानि विनाऽनुदयात् तेषां च यथावद्विदितानामेव तद्धेतुत्वोपपत्तेः तत्स्वरूपं यथावज्ज्ञापयितुकामो जयतीर्थश्रीमच्चरणः प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यादिप्रयोजनशिष्टाचारपरम्पराप्राप्तेष्टदेवतानतिपूर्वकं श्रोतृशेमुषीमनुकूलयिष्यंश्चिकीर्षितं प्रतिजानीते - **प्रणम्येति** ।। अत्र भक्तिश्रद्धाद्यतिशयद्योतनाय प्रशब्दः । तादृश एव हि नमस्कारो भवत्यभिमतसिद्धेरङ्गम् । ल्यप्प्रत्ययप्रयोगेण च प्रणामस्वरूपमङ्गलस्य ग्रन्थकरणाङ्गत्वं सूचयति । नम्यत्वप्रयोजकमिष्टत्वं विशिष्टत्वं चाह - **कमलापतेरिति** ।। कमला हि सर्वपुरुषार्थप्रदा ब्रह्माद्युत्तमा च प्रसिद्धा । अतस्तत्पतिः सुतरां तदुभयरूप इति भावः । अनेन सकलवाङ्मनसदेवताऽवश्यं वन्दनीया न पृथग् वन्दनीया इति रमापि वन्दिता भवति। कमलापतेर्दक्षिणरसव्यपादयोः क्रमेणानन्दज्ञानप्रदत्वात् तदुभयप्रार्थनाय चरणाम्भोजयुगलमित्युक्तम्। यथोक्तम्।

'स्वित्यानन्दः समुदिष्टो वरिति ज्ञानमुच्यते।
मुक्तिदानेन तद्दानात् सुवरस्य पदद्वयम्।
दक्षिणश्चैव सव्यश्च'

इति। चरणाद्युक्त्यैव सावयवत्वसिद्धेर्न तदर्थं युगलग्रहणम्। प्रमाणपद्धतिमिति ग्रन्थसञ्ज्ञा। यथा ग्रामादिकं मार्गेण सुखेन प्राप्तुं शक्यमेवमनेन ग्रन्थेन प्रमाणादिकं

सुखेन बोद्धुं शक्यमिति भावेन पद्धतिशब्दप्रयोगः । अत एव वक्ष्यति । सुखेन शक्यते बोद्धुमिति तदर्थमिति च । वर्तमानसामीप्याद् वर्तमानवद् व्यपदेशः । प्रकरणावान्तरप्रयोजनमाह - **बालानामिति** ।। प्रमाणादिस्वरूपज्ञानरहिता अन्यत्र व्युत्पन्ना बालास्तेषां प्रमाणादिस्वरूपबोधप्राप्तय इत्यर्थः ।।

यद्यपि भगवत्पादैरेव प्रमाणलक्षणादिकमभिहितम् । तथाऽपि गम्भीरया वाचा विक्षिप्य वर्णितं न मन्दैः शक्यते सुखेन बोद्धुमिति तदर्थमिदं प्रकरणमारभ्यते ।।

(राघ.) स्वग्रन्थकरणस्य वैयर्थ्यमाशङ्क्याह - **यद्यपीति** ।। **गम्भीरया**ऽत्यन्तगूढार्थया । **विक्षिप्य** लक्षणविभागादेः स्थलभेदमाश्रित्य । **तदर्थं** मन्दानां सुखबोधार्थम् । **इदं प्रकरणम्** अनेकवाक्यसन्दर्भरूपम् **आरभ्यते** क्रियत इत्यर्थः ।।

(वेदे.) ननु नैयायिकादिभिरेव प्रमाणलक्षणादेरुक्तत्वादयं ग्रन्थो व्यर्थः । नच तदुक्तमलक्षणादिकम्, अस्मदुक्तमेव लक्षणादिकमिति प्रतिपादनायैतदारभ्यत इति वाच्यम् । तथाऽपि भगवत्पादैरेव प्रमाणलक्षणादिग्रन्थेषु प्रमाणलक्षणादेरुक्तत्वेनास्य वैय्यर्थ्यानिस्तारादित्याशङ्क्य परिहरति - **यद्यपीत्यादिना** ।। अत्र भगवत्पादा एव प्रमाणलक्षणाद्यभिधानकर्तार इति वाक्यार्थः । तथाच विशेष्यसङ्गतैवकारेणान्ययोगव्यवच्छेदकेन भगवत्पादादन्यस्मिन् प्रमाणलक्षणाद्यभिधानकर्तृत्वयोगव्यवच्छेदलाभेऽस्माकं तदभिधानकर्तृत्वमयुक्तं यद्यपीति भावः । केवलप्रमाणचातुर्विध्यकथनावसरे ईशलक्ष्मीयोग्ययोगिभेदेनेत्यादिवाग् **गम्भीरा** । प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेनेत्यादि **विक्षिप्य** वर्णनम् । निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षमित्यत्रैवास्य वक्तव्यत्वात् ।। **इदमारभ्यत इति** ।। स्पष्टवाचा सङ्कल्प्येदमारभ्यत इत्यर्थः ।।

लक्षणलक्षणम्

यो धर्मो लक्ष्ये व्याप्त्या वर्तते न वर्तते चान्यत्र स धर्मो लक्षण-मित्युच्यते । यथा गोः सास्नादिमत्त्वम् । तद्धि गोषु सर्वत्रास्ति नास्ति चागोषु ॥

(राघ.) नाम्ना निर्देशमात्रस्योद्देशशब्दार्थत्वात् तस्य चाद्यपद्य एव प्रमाणेत्युक्त्या कृतत्वं मत्वाऽग्रे लक्षणं विवक्षुरादौ लक्षणस्वरूपमाह - **यो धर्म इति** ॥ **लक्ष्ये** लक्ष्यतावच्छेदकावच्छिन्ने। **व्याप्त्या** कात्स्न्र्येन। **यो धर्मो** यत्सदृशो धर्म इत्यर्थः । अन्यत्र लक्ष्यतावच्छेदकानाक्रान्ते। **स धर्मो** लक्ष्यतावच्छेदकाव-च्छिन्नेषु सर्वत्रान्योन्यसदृशतया वर्तमाना धर्मास्तेषां लक्ष्याणां लक्षणानीत्यर्थः। लक्ष्ये लक्षणे च सर्वानुगमकसादृश्यसत्वात् तदभिप्रायेणैकवचनम्। विवृतमेतत् तर्कताण्डवे द्वितीयपरिच्छेदे सादृ(श्योत्प)श्याद्युत्पत्तिवादे। पौनरुक्त्यनिरासा-योक्तम् **इत्युच्यत** इति ॥

॥ **यथेति** ॥ यथा स्पष्टं भवति तथैतदुदाहरणनिष्ठतया प्रदर्श्यत इत्यर्थः । एवमग्रेऽपि। सास्नादिमत्त्वं लक्षणमित्यनुषङ्गः । **तद्धीति** ॥ हिर्हेतौ। यस्मादेवं तस्मादेतल्लक्षणमिति प्रसिद्धौ वा ॥

(वेदे.) प्रमाणादेः स्वोक्तमेव लक्षणं परोक्तं त्वलक्षणमिति ज्ञानस्य लक्षणालक्षणज्ञानाधीनत्वात् लक्षणालक्षणयोर्लक्षणे क्रमेण दर्शयति - **यो धर्म इत्यादिना** ॥ अत्र यो धर्म इत्यादिना तत्तल्लक्ष्यगतः प्रातिस्विकधर्म एव सामान्या-कारेणोच्यते । तस्य लक्ष्ये व्याप्तिस्तत्रतत्र लक्ष्ये च वर्तमानत्वमेव विवक्षितं नत्वेकस्य सर्वलक्ष्यगतत्वमतोऽनुगतधर्मलक्षणाभावात् कथमेतदिति शङ्काऽ-नवकाशः । यथा गन्धः पृथिव्या लक्षणमित्युक्ते नैकस्य गन्धस्य सर्वपृथिवी-गतत्वं प्रतीयते किन्तु तत्तत्पृथिवीगत एव गन्धः सामान्याकारेण तथाऽत्रापीति

ध्येयम् । नच तत्र गन्धत्वेन गन्धानामनुगमात् सामान्योक्तिः सम्भवतीति वाच्यम् । गन्धत्वानुगमेन गन्धानामनुगमासम्भवात् । नहि पितुः पाण्डित्येन पुत्रः पण्डितो भवति । अस्माभिरपि लक्षणीभूतधर्मानुगतैकसादृश्यस्य वक्ष्यमाणत्वाच्च । अत्र लक्ष्ये वर्तत इत्यनेनासम्भवस्य व्याप्येत्यनेनाव्याप्तेरन्यत्र वर्तत इत्यनेनातिव्याप्तेर्निरासः ॥

उक्तलक्षणं शृङ्गिग्राहकतया दर्शयति- **यथेति** ॥ तत्रोक्तं लक्षणमुपपादयति- **तद्धीति** ॥ अत्रापि नैकं सास्नादिमत्त्वं सर्वगोवृत्ति किन्तु प्रातिस्विकमेव । तच्च सामान्यरूपेण तत्रतत्र गवि वर्तत इत्यर्थः । नच सास्नादिमत्त्वस्य प्रातिस्विकस्य तत्तद्व्यक्तिरूपस्य कथं सामान्यरूपत्वमिति वाच्यम् । प्रातिस्विकस्यापि तस्य विशेषबलेन सामान्यरूपतोपपत्तेः । उक्तं हि भगवत्पादैः-

'अतो विशेषसामान्यरूपं सर्वमपीष्यते ।
व्यावृत्तं यच्च सामान्यं तदेव स्याद् विशेषतः ॥' इति ।

अन्यथा परमतेऽपि सामान्यादिकं सदिति सामान्येनोक्तिर्न स्यात् । तत्रापि सत्त्वस्य प्रातिस्विकतया तत्तत्स्वरूपत्वाङ्गीकारादिति द्रष्टव्यम् । एवञ्च प्रातिस्विकस्यापि सास्नादिमत्त्वस्य गोलक्षणत्वे तत्समनियतद्रव्यत्वादेरपि गोलक्षणत्वं स्यात् । सास्नादिमत्त्वस्य च द्रव्यत्वसमनियतस्य द्रव्यलक्षणत्वं स्यादिति कस्यचिद्दूषणमलग्नकं वेदितव्यम् । यदि हि सास्नादिमत्त्वादिकं प्रातिस्विकरूपेण लक्षणं स्यात्तदोक्तदोषशङ्कावकाशः । नचैवम् । किन्तु प्रातिस्विकमपि तदुक्तरीत्या सामान्यरूपेणैव लक्षणम् । नच द्रव्यत्वसास्नादिमत्त्वयोः सामान्येन परस्परं समनियमोऽस्तीति ॥

अलक्षणवैविध्यम्, लक्षणज्ञानप्रयोजनञ्च

अन्यथाभूतं त्वलक्षणम् । तत् त्रिविधम् । असम्भवि यल्लक्ष्ये

सर्वथा न वर्तते । यथा गोरेकशफत्वम् । अव्यापकं यल्लक्ष्यैकदेशे वर्तमानमपि तदेकदेशान्तरे न वर्तते । यथा गोः शबलत्वम् । अतिव्यापकं यल्लक्ष्यादन्यत्रापि वर्तते । यथा विषाणित्वम् ।

सजातीयविजातीयव्यावृत्ततया लक्ष्यावधारणं लक्षणज्ञानस्य प्रयोजनम् । अस्मिन् ग्रामे देवदत्तगृहमिति वार्तां श्रुतवतो हि तद्ग्रामस्थेषु सर्वेष्वपि गृहेषु देवदत्तगृहबुद्धिः प्रसक्ता। ततो यत्र पताका तद् देवदत्तगृहमिति लक्षणज्ञाने सतीदमेव नान्यदित्यवधारणं जायते ।

शब्दव्यवहारो वा लक्षणज्ञानस्य प्रयोजनम्। सास्नादिमान् गौरिति लक्षणज्ञाने सति यं यं सास्नादिमन्तं पिण्डं पश्यति तं तं गोशब्दवाच्यं प्रत्येति ।

यावदन्यतो व्यावर्तनीयं यावति चैकः शब्दो व्युत्पादनीयस्तदुच्यते लक्ष्यमिति ॥

(राघ.) लक्ष्ये वर्तत इति व्याप्स्येत्यन्यत्र न वर्तत इति विशेषणत्रयस्यासम्भव्यव्यापकातिव्यापकरूपलक्षणत्रयं व्यावर्त्यमिति भावेन तत्त्रयस्वरूपं सामान्योक्तिविभागविशेषोद्देशपूर्वकमाह- **अन्यथाभूतं** त्विति ॥ लक्ष्ये व्याप्स्येत्याद्युक्ताद् **अन्यथा** प्रकारान्तरेण। सर्वथाऽवर्तमानत्वं कार्त्स्न्येनावर्तमानत्वम् अन्यत्र वर्तमानत्वं च। **भूतं** प्राप्तम्। भू प्राप्तावित्युक्तेः। तदलक्षणमित्यर्थः । तदसम्भवीति तच्छब्दाध्याहारेण यल्लक्ष्य इति यच्छब्दान्वयः । एवमग्रेऽपि । **एकशफत्वमिति** ॥ **गोरिति** ॥ अलक्षणमित्यनुषङ्गोऽत्रोत्तरत्र च। एकशफत्वादिव्यावृत्त्यर्थं लक्ष्ये वर्तत इत्यादिविशेषणत्रयमुपात्तमित्यदोषः।

लक्षणज्ञानफलमाह- **सजातीयेति** ।। **व्यावृत्ततया** भिन्नतयेत्यर्थः । लक्ष्यतावच्छेदकसाक्षाद्व्यापकधर्मेण साजात्यवैजात्ये ज्ञेये । यथा गोः पशुत्वेन । तद्व्युत्पाद्य दर्शयति- **अस्मिन् ग्राम इति** ।। गृहत्वेन विजातीयपाषाणादिव्यावृत्तिबुद्धेः सिद्धत्वात् तत्सजातीयव्यावृत्त्यवधारणप्रकार एव दर्शितः । **शब्दव्यवहारो वेति** ।। व्यवह्रियतेऽनेनेति व्यवहारः शक्तिज्ञानम् । शब्दस्य वाच्यवाचकभावसम्बन्धरूपशक्तिज्ञानरूपा व्युत्पत्तिरित्यर्थः । व्युत्पत्तेरप्यभिलपनरूपव्यवहारः फलमिति वक्तुं व्यवहारपदेन शक्तिज्ञानकीर्तनं कृतम् । अत एवाग्रे गोशब्दवाच्यं प्रत्येतीत्येव विवरणम् । पूर्वं लक्ष्ये व्याप्त्येति लक्ष्यं प्रसक्तम् । तत्स्वरूपं द्वेधा निर्धारयति - **यावदिति** ।। **व्यावर्तनीयं** तदुच्यते लक्ष्यमित्यत्राप्याकृष्यते । यावति चैकः शब्दो **व्युत्पादनीयो** वाचकत्वेन बोधनीयस्तदुच्यते लक्ष्यमित्यर्थः ।।

(वेदे.) **अन्यथाभूतमिति** ।। लक्ष्ये व्याप्त्या वर्तमानत्वविशिष्टान्यत्रावर्तमानत्वाभाववान् धर्म इत्यर्थः । तेन विशिष्टाभावः सर्वत्रालक्षणेऽनुगत इति नाननुगमशङ्केति ध्येयम् । तद्विभागमाह - **तत्त्रिविधमिति** ।। इदं तु पररीत्यैव । सुधायामव्यापकस्यापि लक्षणत्वेन समर्थितत्वात् ।

यद्वा । लक्षणसामान्यज्ञानं विना तद्विशेषज्ञानासम्भवात् लक्षणसामान्यलक्षणमुक्त्वा तद्गतविशेषणत्रयसार्थक्यायालक्षणस्वरूपं सप्रभेदमाह - **अन्यथेति** ।। अलक्षणं त्वित्यन्वयः ।

उक्तिलाघवायोद्दिश्य लक्षणमाह- **असम्भवीत्यादिना** ।। अव्याप्तेऽतिप्रसङ्गवारणाय सर्वथेत्युक्तम् । **लक्ष्यैकदेशेति** ।। असम्भविव्यावृत्त्यै लक्ष्यैकदेशे वर्तमानमपीत्युक्तम् । अतिव्याप्तव्यवच्छेदाय देशान्तरे न वर्तत इत्युक्तम् । **लक्ष्यादन्यत्रापीति** ।। लक्ष्ये वर्तमानत्वसमुच्चयार्थोऽपिशब्दः । तेनासम्भवि-

निरासः। अव्याप्तनिरासाय लक्ष्यादन्यत्रेत्युक्तम्। तस्य च लक्ष्यैकवृत्तिः सङ्कुचितेति भावः। तथाचैवं-विधालक्षणत्रयनिरासाय लक्षणलक्षणे विशेषणत्रयोपादानमिति भावः।

अत्र कश्चित्- अनुगतधर्मानभ्युपगमेनैकस्य धर्मस्य सर्वलक्ष्यवृत्तित्वाभाव-रूपाव्याप्त्यसम्भवादेकस्य धर्मस्य लक्ष्येऽलक्ष्ये च वर्तमानत्वरूपातिव्याप्त्य-सम्भवाच्च तद्वारकविशेषणवैय्यर्थ्यं लक्षणलक्षण इत्याह- तत्तुच्छम्। अव्याप्त्यतिव्याप्तिलक्षणयोरेकस्य धर्मस्येत्यस्याविवक्षितत्वात्। प्रातिस्विकमपि शबलत्वं सामान्याकारेण तत्रतत्र सर्वत्र लक्ष्येऽवर्तमानमित्यव्याप्तम्। एवं प्रातिस्विकमपि विषाणित्वं सामान्याकारेणालक्ष्येऽपि गतमित्यतिव्याप्त-मित्यत्रोच्यते। एवञ्च तदीयवैय्यर्थ्यचोदनं व्यधिकरणमेवेति। अन्ये तु। अनुगतधर्मानङ्गीकारेऽपि लक्षणजातीयस्य लक्ष्यजातीयेऽवृत्तिरव्याप्तिस्तस्या-लक्ष्येऽपि वृत्तिरतिव्याप्तिरिति विवक्षितत्वात् नानुपपत्तिरित्याहुः।

लक्षणज्ञानप्रयोजनमाह- **सजातीयेति**॥ सदृशजात्याश्रयत्वतदनाश्रयत्व-रूपे। अत्र साजात्यवैजात्ये विवक्षिते इति न कश्चित् क्षुद्रोपद्रवः।

नन्वत्र साजात्यं प्रमाणत्वेनोत रूपान्तरेण। नाद्यः। लक्ष्यस्यापि व्यावृत्त-त्वापत्तेः। न द्वितीयः। विजातीयपदोपादनवैय्यर्थ्यापत्तेः। अस्ति हि प्रमेयत्वा-दिना सर्वसाजात्यमिति चेन्न। पौरुषेयवचसां पुरुषविवक्षाधीनत्वेन नियन्तु-मशक्यत्वात्। लक्ष्यातिरिक्तं हि सजातीयविजातीयतया द्वैराश्येन विवक्षिते। यथा यथार्थज्ञानतत्साधनस्य प्रमाणस्य ज्ञानं तत्साधनं च सजातीयम्। यत्तु न ज्ञानं नापि साधनं तद्विजातीयम्। एवमन्यत्रापि विवेक्तव्यमिति। एतदेवोदाहरण-मुखेन दर्शयति- **अस्मिन्निति**॥ प्रयोजनान्तरमाह- **शब्दव्यवहार इति**॥ शक्तिग्रह इत्यर्थः। तदेव दर्शयति- **सास्नादिमानिति**॥ सास्नादिमान् गौरिति

लक्षणवाक्यं हि यः सास्नादिमान् स गोशब्दवाच्य इति व्याप्तिज्ञापनाय वक्त्रा प्रयुज्यते। श्रोतुः सार्वत्रिकव्युत्पत्तिकामत्वात्। उपदेशादेः व्यक्त्यानन्त्यादिना कर्तुमशक्यत्वात्। ज्ञातव्याप्तिश्च यंयं सास्नादिमन्तं पिण्डं पश्यति तंतं गोशब्दवाच्यमनुमिनोतीति भावः। लक्ष्यानिरूपणे तद्घटितलक्षणादिज्ञानं न सम्भवतीति लक्ष्यं लक्षयति- **यावदिति**॥ यावदित्यादि जात्येकवचनम्। एवं यावन्तीत्यादि द्रष्टव्यम्। लक्षणज्ञानस्योक्तप्रयोजनानुसारेणेदं लक्षणद्वयम्॥

प्रमाणसामान्यलक्षणम्

तत्रादौ तावत् प्रमाणसामान्यलक्षणमुच्यते। यथार्थं प्रमाणम्। प्रमाणमिति लक्ष्यनिर्देशः। यथार्थमिति लक्षणोक्तिः। एवमुत्तरत्रापि ज्ञातव्यम्। अत्र यथाशब्दोऽनतिक्रमे वर्तते। अर्थशब्दश्चार्यत इति व्युत्पत्त्या ज्ञेयवाची। ज्ञेयमनतिक्रम्य वर्तमानं यथावस्थितमेव ज्ञेयं यद् विषयीकरोति नान्यथा तत् प्रमाणमित्यर्थः॥

(राघ.) एवमुपयुक्तमुक्त्वा प्रमाणसामान्यलक्षणोक्तिं प्रतिजानीते - **तत्रेति**॥ तत्र लक्ष्यलक्षणादिस्वरूपे ज्ञाते सतीति वा आद्यपद्येनैवोद्देशे सतीति वा सामान्यलक्षणविभागविशेषोद्देशादिषु मध्य इति वा। **आदौ** हेतुगर्भमिदम्। प्राथम्यात् प्रमाणसामान्यलक्षणमुच्यत इत्यर्थः। विभागविशेषोद्देशादिकं पश्चाद् वक्ष्यत इति तावच्छब्दः। योग्यतावीप्सापदार्थानतिवृत्तिः सादृश्यं चेति यथाशब्दार्थचतुष्टयेऽत्र विवक्षितार्थमाह- **अत्रेति**॥ 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यनेकार्थशब्दार्थेष्वत्र विवक्षितमर्थमाह- **अर्थशब्दश्चेति**॥ कर्मव्युत्पत्त्येत्यर्थः। व्युत्पत्तिरवयवशोऽर्थकथनम्। ऋगताविति धातोः कर्मण्यौणादिके थप्रत्यये सार्वधातुकार्धधातुकयोरिति गुणे कृतेऽर्थ इति निष्पत्तेः। गत्यर्थस्य ज्ञानार्थत्वात्। ज्ञानोपलक्षितवस्तुवाचीत्यर्थः। पदार्थमुक्त्वा वाक्यार्थमाह-

ज्ञेयमिति ॥ ज्ञानोपलक्षितमित्यर्थः । तेन ग्रामं गच्छतीत्यादौ ग्रामस्यापि वस्तुतो ज्ञेयत्वात् तदनतिक्रान्तायां क्रियायां नातिव्याप्तिः । तत्र ग्रामस्य क्रियोपलक्षितत्वेन क्रियोपलक्षितग्रामविषयकत्वेन ज्ञानोपलक्षितग्रामानतिक्रमाभावात् । फलितमाह- **यथावस्थितमिति** ॥ येन प्रकारेणावस्थितमेव ज्ञानपरिचायितं वस्तु यद्विषयीकरोतीत्यर्थः । तत्प्रमाणमित्यर्थ इत्यत्र प्रमाणमित्युच्यत इति शेषोक्त्या व्यवहारसाधकत्वं बोध्यम् । तेन न पुनरुक्ततादोषः । अत्रानतिक्रमणरूपे यथापदार्थेऽनतीत्यंशार्थो यथावस्थितमेवेति । अर्थपदार्थो ज्ञेयमिति । क्रमणपदार्थो विषयीकरोतीति ज्ञेयम् ॥

(वेदे.) **तत्रेति** ॥ वक्तव्यत्वेन बुद्धिस्थानामुद्देशलक्षणपरीक्षाणां मध्य इत्यर्थः । **तत्र** उपयुक्ते । निरूपित इति शेष इत्यप्याहुः । उद्देशस्य प्रमाणमित्यनेनैव लाभात् सामान्यलक्षणोक्तिं विना विभागावसराभावात् तावत्र न प्रकृताविति ध्येयम् । यथार्थज्ञानं केवलमित्यादौ विशेषलक्षणाभिधानमिह तु सामान्यलक्षणाभिधानमतो न पुनरुक्तिरिति भावेन सामान्येत्युक्तम् । विशेषलक्षणाभिधानस्य सामान्यलक्षणाभिधानपूर्वकत्वात् आदावित्युक्तम् । नच न्यूनता । विशेषलक्षणस्यापि उत्तरत्राभिधानादिति भावेन तावदित्युक्तम् । मन्दानां लक्ष्यलक्षणवैपरीत्यभ्रमवारणाय तद्विवेकमाह- **प्रमाणमिति** ॥ योग्यता वीप्सा पदार्थानतिक्रमः सादृश्यं चेति यथाशब्दार्थः । तत्र तावन्न सादृश्यमत्र यथाशब्दार्थत्वेन विवक्षितम् । यथाऽसादृश्य इत्यव्ययीभावविधाने सादृश्यान्यत्वेन विशेषणात् । समासान्तरस्य चासामर्थ्यादिना प्रतिहतत्वात् । अर्थात्यन्तसादृश्यस्य ज्ञानादावसम्भवात् । यत्किञ्चित्सादृश्यस्य चातिव्यापकत्वाच्च । योग्यतावीप्सार्थत्वे तु वाक्यशेषाभावेन अर्थयोग्यताया वाऽर्थानां वा प्रामाण्यापत्तिरतोऽत्र यथाशब्दः पदार्थानतिक्रमवाची विवक्षित इत्याह- **अत्रेति** ॥ लक्षणवाक्य इत्यर्थः । नन्वर्थशब्दोऽभिधेयधनवस्तुप्रयोजननिवृत्तिषु वर्तते । तथाऽभिधानम् । 'अर्थोऽ-

भिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरकोशे। तत्र न तावदभिधेयार्थः सम्भवति। अव्याप्तिप्रसङ्गात्। अभिधेयानतिक्रमस्य शब्दमात्रवृत्तेः। धनानतिक्रमस्यापि तत्तज्ज्ञानमात्रवृत्तित्वात्। अतो विषयापरपर्यायवस्तुवाचक एव विवक्षितो वाच्यः। न तत् सम्भवति। गमनादावतिव्याप्तेः। नहि गमनं गम्यमतिक्रम्य वर्तते। नापि च्छिदा छेद्यमित्यत आह- **अर्थशब्दश्चेति**॥ तत्र रूढ्यभावादाह- **अर्यत इति**॥ अर्तेरौणादिकस्य थप्रत्ययस्य सिद्धत्वात्। गत्यर्थानां ज्ञानार्थत्वादिति भावः। एवं पदार्थमुक्त्वा वाक्यार्थमाह - **ज्ञेयमिति**॥ नन्वेवमपि न गमनादावतिव्याप्तिपरिहारः। गमनादीनामपि ज्ञेयमनतिक्रम्य वर्तमानत्वात्। नहि तद्विषयो ग्रामादिः सर्वथा न ज्ञेय इति वक्तुं शक्यते। पित्रादिवत् ज्ञेयशब्दस्य सम्बन्धिशब्दत्वेन स्वज्ञेयमनतिक्रम्य वर्तमानं यत्तत् प्रमाणमित्यर्थात्। स्वज्ञेयत्वं च स्वोपाधिकज्ञेयत्वोपेतत्वम्। भवति च घटादिर्ज्ञानतत्करणाभ्यामुपाधिनिमित्ताभ्यां ज्ञेयः। तथाच न गमनादावतिव्याप्तिः। नहि गमनेनोपाधिना गमनेन वा निमित्तेन ग्रामो ज्ञेयः किन्तु गम्य एवेति कथमव्याप्तिः। नच स्वशब्दस्य प्रमाणपरत्वेनात्माश्रयः। ज्ञानतत्करणाभ्यामुपाधिनिमित्ताभ्यां यज्ज्ञेयं तदनतिक्रम्य वर्तमानं प्रमाणमित्यर्थात्। स्वगुणग्राहकमिन्द्रियं श्रोत्रमित्यत्र यथेति।

ननु ज्ञेयमनतिक्रम्य वर्तमानत्वं ज्ञानस्य तत्करणस्य वा कथम्। तस्यान्तःकरणादिवृत्तित्वेन तदतिक्रम्यैव वर्तमानत्वात्। नच यथावस्थितज्ञेयविषयीकारित्वं तावद् विवक्षितमिति वाच्यम्। तथा सति विभ्रमेऽतिव्याप्तिप्रसङ्गात्। तस्यापि यथावस्थितेदमंशविषयत्वादित्यत आह - **यथावस्थितमेवेति**॥ विभ्रमस्तु यथावस्थितमपि विषयीकरोति। अविद्यमानरजताद्युल्लेखादतो नातिव्याप्तिरिति भावः॥

ज्ञेयविषयीकारित्वं च साक्षाद्वा साक्षाज्ज्ञेयविषयीकारिसाधनत्वेन वा विवक्षितमिति नानुप्रमाणेष्वव्याप्तिः। ज्ञेयविषयीकारित्वेनैव

प्रमातृप्रमेययोर्व्यवच्छेदः । तयोः साक्षाज्ज्ञेयविषयीकारित्वाभावात् । साक्षाज्ज्ञेयविषयीकारिकारणत्वेऽपि तत्साधनत्वाभावाच्च ॥

(राघ.) साक्षाद्वेत्यादि॥ नन्वेवमपि साधनत्वं न ज्ञाने। साक्षाज्ज्ञेयविषयत्वं च करणेषु नेत्यन्यतरविवक्षायामन्यतरत्राव्याप्तिः । उभयविवक्षायामपि ज्ञानकरणाननुगमेन पुनः स एव दोष इति चेन्मैवम्। ज्ञानं यथा साक्षादन्याव्यवधानेनार्थविषयकं तथा तत्साधनानीन्द्रियलिङ्गशब्दरूपानुप्रमाणान्यपि अन्याव्यवधानेन साक्षादेवार्थविषयकाणि। नहि तानि किमप्यविषयीकृत्य ज्ञानं जनयितुमीशते । यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पद्यते स तस्य विषय इति विषयत्वनिर्वचनात्। सन्निकर्षशब्देन प्रत्यासत्तेरभिमतत्वात्। इन्द्रियाणामर्थैः संयोग इव लिङ्गशब्दयोरपि लिङ्गिवाक्यार्थाभ्यां व्याप्तिशक्तिरूपप्रत्यासत्त्या लिङ्गिवाक्यार्थधीजनकत्वेन करणानि यत् सम्बध्य मानं जनयन्ति तस्यैव ज्ञानविषयस्य करणानि प्रत्यपि विषयत्वात्। एवञ्चार्थविषयीकारित्वं ज्ञानरूपकेवलप्रमाणे साधने इन्द्रियलिङ्गशब्देषु चैकरूपमेव। परन्त्वर्थे यज्ज्ञेयत्वं तज्ज्ञानोपाधिकम् । न करणोपाधिकम् । अतो ज्ञेयविषयीकारीत्यत्र ज्ञेयत्वांशेऽनन्यापेक्षत्वान्यापेक्षत्वरूपभेदमात्रेण साक्षात्त्वतत्साधनत्वव्यवहार इति न कश्चिद्दोषः। तदुक्तं सुधायाम् -

'ज्ञानार्थे ज्ञेयता मुख्या शब्दार्थे तदनन्तरम्।'

इत्येतदनुव्याख्याव्याख्यानावसरे 'यथावस्थितार्थविषयत्वस्योभयत्र साम्यात्। ज्ञानविषय एव हि करणानां विषयः। नहि किमप्यविषयीकुर्वन्त्येतानि तज्ज्ञानं जनयन्ति । नाप्यन्यविषयाणि । अतिप्रसङ्गात् । केवलं विषयस्य ज्ञेयता ज्ञानोपाधितया। करणानि तु तज्जनकतया सम्पादयन्तीत्येतावन्तं विशेषमाश्रित्य केवलानुप्रमाणभेदः समर्थितः । यदिचैतावताऽप्यव्याप्तिदोषस्तदा सर्वत्रापि यत्किञ्चिद्वैलक्षण्यस्यापि वक्तुं शक्यत्वादतिप्रसङ्गः स्यात्' इति।

समग्रप्रमाणलक्षणस्याव्याप्तिं निरस्याधुना लक्षणगतपदद्वयस्यापि कृत्यं विवक्षुरेकस्य तावदाह- **ज्ञेयविषयीकारित्वेनैवेति** ॥ यथावस्थिततत्वमात्रस्य तयोः सत्त्वादतिव्याप्तावनेनैव विशेषणेन तद्व्यावृत्तिरित्यर्थः । कथमित्यतो ज्ञेयविषयकत्वस्य द्वेधाऽभिमतत्वात् तद्द्वयमपि तत्र नेत्याह- **तयोरिति** ॥ **साक्षादिति** ॥ ज्ञानाव्यवधानेनेत्यर्थः । तयोर्निर्विषयकत्वादिति भावः । नन्वेवं विषयीकारित्वेनैव तयोर्व्युदासे किं ज्ञेयेत्युक्त्येति चेत् । सत्यम् । तत्तु गमनादिक्रियास्वनतिव्याप्त्यर्थम् । अत्र तु स्वभावानुवादमात्रमिति ज्ञेयम् । **तत्साधनत्वाभावादिति** ॥ अतिशयितकारणस्यैवात्र साधनत्वेन विवक्षिततत्वादिति भावः । कारणत्वेऽपीत्यभ्युपगमवादः । प्रमातुः करणत्वेऽपि प्रमेयस्य तदभावात् । विषयस्य क्वापि जनकतासम्मतेरिति तत्त्वोद्योतटीकोक्तेः । उक्तं हि तर्कताण्डवे च प्रत्यक्षप्रमास्वनुगतगुणभङ्गे- चक्षुरादिवत्कारणत्वेन धर्मिग्राहकप्रमाणासिद्धोऽर्थः सन्निकर्षेणान्यथासिद्धत्वान्न प्रमाहेतुरिति ॥

(वेदे.) ननु ज्ञेयविषयीकारित्वं ज्ञानधर्मः । तथाचेन्द्रियाद्यनुप्रमाणेष्वव्याप्तिरित्यत आह- **ज्ञेयविषयीकारित्वं चेति** ॥ करणेष्वपि सम्यग्ज्ञानसाधनतया परम्परया ज्ञेयविषयीकारित्वमस्त्येव । नहि साक्षादेव ज्ञेयविषयीकारित्वं लक्षणे विवक्षितम् । येनोक्तदोषः स्यात् । अपितूभयसाधारणं ज्ञेयविषयीकारित्वमात्रमिति भावः । इदं च पररीत्यैवोक्तम् । स्वमते तु ज्ञान इव करणेष्वपि साक्षादेव ज्ञेयविषयीकारित्वमस्तीति नोक्ताव्याप्तिरिति द्रष्टव्यम् । उक्तं हि सुधायाम्- ज्ञानविषय एव करणानां विषयः । नहि किमप्यविषयीकुर्वन्त्येतानि ज्ञानं जनयन्ति । नाप्यन्यविषयाणि इत्यादि । अन्ये तु । ज्ञेयविषयीकारित्वं साक्षाद्वा साक्षाज्ज्ञेयविषयीकारिसाधनत्वेन वेत्यत्र प्रत्येकं लक्षणत्वेऽव्याप्तेः, मिलितस्य तत्त्वेऽसम्भव इत्याशङ्क्य साधनाश्रययोरन्यतरत्वे सतीत्यादिवत् साक्षाज्ज्ञेयविषयीकारितत्साधनान्यतरत्वस्य विवक्षिततत्वाददोष इत्याहुः । तच्चिन्त्यम् । अन्यतरत्व-

प्रमाव्याप्तत्वं प्रमाणस्य लक्षणम्

स्यान्यान्यपर्यवसन्नत्वेनेतरभेदसाधने साध्याविशेषप्रसङ्गात् । अन्यथाऽव्याप्तितादवस्थ्यादिति। एतेन ज्ञेयविषयीकारित्वस्येच्छायामतिव्याप्तिः। ज्ञानपददाने चानुप्रमाणेन्द्रियादिषु अव्याप्तिरिति कस्यचिद् दूषणमपास्तम्। नहीच्छायां स्वोपाधिकज्ञेयत्वोपेतविषयीकारित्वमस्ति । येनातिव्याप्तिशङ्कावकाशः । ज्ञेयविषयीकारीति विशेष्यस्य व्यावर्त्यमाह- **ज्ञेयेति**॥ प्रमातृप्रमेययोः किं ज्ञानवत् साक्षात्ज्ज्ञेयविषयीकारित्वमुत करणवज्ज्ञानसाधनतया परम्परया। नाद्य इत्याह- **तयोरिति**॥ लक्षणप्रसक्तिं दर्शयन् द्वितीयं दूषयति- **साक्षादिति**॥

प्रमातृप्रमेययोर्लक्षणम्

प्रमावान् प्रमाता । प्रमाविषयः प्रमेयम् । यथार्थज्ञानं प्रमा ॥ यथार्थग्रहणेन संशयविपर्ययतत्साधनानां निरासः । अनवधारणं ज्ञानं संशयः । अनवधारणग्रहणं सम्यग्ज्ञानविपर्ययव्युदासार्थम् । घटादिनिवृत्त्यर्थं ज्ञानमिति ॥

(राघ.) व्यावर्त्यतया प्रसक्तं प्रमातृप्रमेयस्वरूपमाह- **प्रमावानिति**॥ प्रमाया मनोधर्मत्वेऽपि तत्स्वामित्वाद् धनी गोमानित्यादिवत् प्रमावानित्युक्तिर्युक्ता। **प्रमाविषय इति**॥ विषयत्वं प्राङ् निरुक्तम् । प्रसक्तप्रमास्वरूपत्वं चाह- **यथार्थेति**॥ यथावस्थितार्थविषयीकारि ज्ञानं प्रमेत्यर्थः। अर्थशब्दो वस्तुपर्यायः। आद्यविशेषणेन संशयविपर्यययोः नातिव्याप्तिः। द्वितीयेन तु चक्षुरादीन्द्रियरूपानुप्रमाणेषु नातिव्याप्तिः। स्मृतिस्तु लक्ष्यैवेति स्पष्टत्वाद्वा केवलप्रमाणलक्षणे वक्ष्यमाणत्वाद्वाऽत्र नोक्तम् । एवं प्रमाणलक्षणे ज्ञेयविषयीकारित्वव्यावर्त्यं तत्प्रसक्तानुप्रसक्तं चोक्त्वाऽधुना यथावस्थितेति पदकृत्यमाह- **यथार्थेति**॥ यथापदस्य योऽर्थो ज्ञेयानतिक्रमणरूपं यथावस्थितवस्तुविषयीकारित्वं तद्ग्रहणेनेत्यर्थः। ज्ञेयविषयीकारित्वस्य साक्षाद्वा साक्षाज्ज्ञेयविषयीकारिसाधनत्वेन

वा द्वेधाऽभिमतत्वादाद्यस्य संशयविपर्ययर्योरन्त्यस्य तत्साधनयोरतिव्याप्तौ यथावस्थितेति ज्ञेयविशेषणेन तन्निरास इत्यर्थः। प्रसक्तसंशयादेः स्वरूपं प्रपञ्चेनाह- **अनवधारणेत्यादिनेत्याचार्य इत्यन्तेन ॥** विप्रतिपत्तिरपि साधारणीत्यन्तं संशयतत्साधनचिन्ताप्रकरणमिति ज्ञेयम्। संशयं लक्षयति- **अनवधारणेति॥** अवधारणं निश्चयः। तद्भिन्नमनवधारणम्। निश्चयत्वानधिकरणज्ञानमिति यावत्। पदकृत्यं स्वयमेवाह- **अनवधारणेति॥**

(वेदे.) प्रमातृप्रमेययोर्व्यवच्छेद इत्युक्तम्। तत्र कः प्रमाता किं प्रमेयमित्यत आह- **प्रमावानिति ॥** यद्यपि प्रमाताऽपि प्रमेयो भवति। तथाऽपि विशेषविवक्षयेदमुदितम्। प्रमातृप्रमेयलक्षणान्तर्गतप्रमालक्षणमाह- **यथार्थेति ॥** संशयविपर्ययनिरासाय यथार्थेति। करणव्यावृत्त्यर्थं ज्ञानमिति। अत्र यज्ज्ञानं यदंशे यथावस्थितार्थविषयीकारि तज्ज्ञानं तदंशे प्रमेति विवक्षितमतो न कश्चित् क्षुद्रोपद्रव इति ध्येयम्। एवं ज्ञेयविषयीकारिपदव्यावर्त्यमुक्त्वेदानीं यथाशब्दार्थभूतयथावस्थितेत्यस्य व्यावर्त्यमाह- **यथार्थेति॥** यथाशब्दस्य योऽर्थस्तद्ग्रहणेनेत्यर्थः। ज्ञेयविषयीकारित्वं च साक्षात् संशयविपर्ययरूपज्ञाने तत्साधनत्वेन तत्करणेष्वपि वर्तत इत्यतिव्याप्तिः। तन्निरासाय यथाशब्दार्थग्रहणमित्यर्थः। केचित्तु- अनन्तरोक्तप्रमालक्षणान्तर्गतयथार्थपदकृत्यमाह - **यथार्थग्रहणेन** इत्याहुः। तच्चिन्त्यम्। तथात्वे तत्साधनानामित्यस्यासम्मतत्वापत्तेरिति।

ननु संशयविपर्ययतत्साधनानामेवाज्ञाने तत्रातिव्याप्तिज्ञानमपि न सम्भवतीत्यतः संशयलक्षणं तावदाह- **अनवधारणमिति ॥** क्रमेण पदद्वयव्यावर्त्यमाह- **अनवधारणेति॥** अवधारणत्वं यद्यपि नैककोटिव्यवच्छेदविषयत्वे सत्यपरकोटिविषयत्वं वक्तुं शक्यम्। तद्भिन्नत्वस्यायं घट इत्यादावपि सत्त्वेनातिव्याप्त्यापत्तेः। नापि निश्चयत्वम्। संशयभिन्नज्ञानस्यैव निश्चयरूपत्वेनान्योन्याश्रयत्वप्रसङ्गात्। तथाऽप्येकाकारावगाहिज्ञानत्वं विवक्षितम्।

तथाच तद्भिन्नमनेकाकारावगाहिज्ञानत्वं संशयत्वमिति पर्यवस्यति। नन्विद-मप्ययुक्तम्। स्थाणुपुरुषाविति समूहालम्बनेऽतिव्याप्तेः। एकस्मिन् धर्मिणीति विवक्षायामपि वृक्षः शिंशुपा चेति निश्चयेऽतिव्याप्तेः। विरुद्धानेकाकारविवक्षायां चेदं रजतमिति भ्रमेऽतिव्याप्तेरिति चेन्न। एकस्मिन् धर्मिणि भासमानविरुद्धा-नेकाकारावगाहिज्ञानत्वस्य विवक्षितत्वात्। अत्र विरोधे भासमानत्वस्य विवक्षित-त्वान्नोक्तदोष इति ध्येयम्। अत्र कश्चित्। एवमपि तर्केऽतिव्याप्तिः। तत्रा-प्येकस्मिन् पर्वते व्याप्यारोपान्निर्धूमत्वस्य चक्षुरादिना धूमवत्त्वस्य च विषयत्वा-दित्याह- तत्तुच्छम्। नहि व्याप्यारोपजनिते निर्धूमत्वारोपे धूमवत्त्वं विषयः। येनातिव्याप्तिशङ्कावकाशः। किन्तु तत्र चाक्षुषं धूमवत्त्वज्ञानमन्यदेवेति॥

संशयकारणविषये भूषणकारादिमतम्

तस्य निर्णायकाभावसहकृताः साधारणधर्मासाधारणधर्मविप्रति-पत्त्युपलब्ध्यनुपलब्धयः पञ्च कारणानीति केचिदाहुः। तद्यथा। स्थाणुपुरुषयोः साधारणमूर्ध्वतालक्षणं धर्मं पुरोवर्तिन्युपलभ्य स्थाणु-पुरुषौ स्मृत्वा विशेषजिज्ञासायां स्थाणुत्वनिश्चायकं वक्रकोटरा-दिकं पुरुषत्वनिश्चायकं शिरःपाण्यादिकं चानुपलभमानस्य डोलाय-मानं संशयज्ञानमुत्पद्यते किमयं स्थाणुर्वा पुरुषो वेति। शब्दे चाकाश-विशेषगुणत्वमसाधारणधर्ममुपलभमानस्य निर्णायकमजानतः संशयो भवति किं शब्दो नित्योऽनित्यो वेति। इन्द्रियेषु वैशेषिक-साङ्ख्ययोर्भौतिकत्वाभौतिकत्वविप्रतिपत्तिं पश्यतो निश्चायक-मजानतः सन्देहो भवति किमिन्द्रियाणि भौतिकान्युताभौतिका-नीति। कूपखननानन्तरं जलोपलब्धौ सत्यां निश्चायकाभावे संशयो जायते किं प्राक् सदेवोदकं कूपखननेनाभिव्यक्तमुपलभ्यते उतासत्

तेनोत्पन्नमिति । अस्मिन् वटे पिशाचोऽस्तीति वार्तां श्रुतवतो वटसमीपं गतस्य तत्र पिशाचानुपलब्धौ सत्यां निर्णायकाभावे संशयो भवति । किं विद्यमान एव पिशाचोऽन्तर्धानशक्त्या नोपलभ्यते किं वाऽविद्यमान एवेति । उपलब्ध्यनुपलब्ध्योः साधारणधर्म एवान्तर्भावात् त्रीण्येव कारणानीत्यपरे । उपलब्धिर्हि सतामेव घटादीनां प्रदीपारोपणेन दृष्टा । असतां च कुलालादिव्यापारानन्तरमिति । तथाऽनुपलब्धिः सतामीश्वरादीनामसतां च शशविषाणादीनां दृष्टेति ॥

(राघ.) इदानीं तत्साधनमाह-**तस्येति**॥ संशयस्येत्यर्थः। **केचित्**- चिरन्तनतार्किका भूषणकारादयः । तद्वक्ष्यमाणमुदाहरणं यथा स्पष्टं तथोच्यत इत्यर्थः । **विशेषजिज्ञासायामिति** ॥ अन्यतरनिर्धारणेच्छायामित्यर्थः । आद्यं संशयकारणमुदाहरणेन प्रदर्श्य द्वितीयमपि तथा दर्शयति- **शब्दे चेति** ॥ तृतीयमपि हेतुं व्यनक्ति- **इन्द्रियेष्विति** ॥ चतुर्थं व्यनक्ति- **कूपेति** ॥ **तेनेति** ॥ कूपखननेनेत्यर्थः । पञ्चमं हेतुं व्यनक्ति- **अस्मिन्निति** ॥ **अपरे** नवीननैयायिकाः । तदन्तर्भावं व्यनक्ति- **उपलब्धिर्हीति** ॥ व्यापारानन्तरमित्यतः परम् उपलब्धिर्दृष्टेत्यनुषङ्गः। दृष्टेत्यत्रानुपलब्धिरित्यनुषङ्गः । इतिपदस्येति सदसत्साधारण्यमुपलब्ध्यनुपलब्ध्योः वदन्तोऽपरे त्रीण्येव कारणानीत्याहुरिति पूर्वेणान्वयः ॥

(वेदे.) इदानीं संशयसाधनप्रदर्शनाय नैयायिकैकदेशिनां मतमाह-**तस्येति** ॥ पुरुषत्वादिनिश्चायकशिरःपाण्यादिदर्शने साधारणधर्मदर्शनादिमात्रेण न संशय इत्युक्तम् । **निर्णायकाभावेति** ॥ अन्यतरनिर्णायकाभावेत्यर्थः । तत्र साधारणधर्मज्ञानस्य संशयहेतुत्वमुपपादयति- **स्थाणुपुरुषयोरिति** ॥ **विशेषजिज्ञासायाम्** अन्यतरकोटिजिज्ञासायामित्यर्थः । इदं च क्वाचित्काभिप्रायम् ।

जिज्ञासाभावेऽपि संशयोदयस्यानुभवसिद्धत्वादिति ध्येयम् । **डोलायमान-मिति** ॥ अव्यवस्थितकोटिकमित्यर्थः । असाधारणधर्मज्ञानस्य संशयहेतुत्व-मुपपादयति- **शब्दे चेति** ॥ विप्रतिपत्तेः संशयकारणत्वमुपपादयति- **इन्द्रिये-ष्विति** ॥ उपलब्धेस्तदुपपादयति- **कूपेति** ॥ अनुलब्धेरपि तदाह- **अस्मि-न्निति** ॥ न्यायैकदेशिनमुदयनमुखेन दर्शयति- **उपलब्धीति** ॥ उपलब्धेः सदसत्साधारण्यमुपपादयति- **उपलब्धिर्हीति** ॥ अनुपलब्धेरपि सदसत्साधा-रण्यमुपपादयति- **तथाऽनुपलब्धिरपीति** ॥

असाधारणधर्मस्य साधारणधर्मेऽन्तर्भावः

वयन्तु ब्रूमः । असाधारणधर्मविप्रतिपत्त्योरपि साधारणधर्म एवान्तर्भावः । असाधारणो हि धर्मो न स्वरूपेण संशयहेतुः । विशेषस्मरणकारणत्वाभावात् । किन्तु व्यावृत्तिमुखेनैव । तथाच नित्यव्यावृत्तत्वमनित्यस्यानित्यव्यावृत्तत्वं च नित्यस्य धर्म इति साधारण एव । नचैकेनैव साधारणधर्मेण भाव्यमिति नियमोऽस्ति । तथातथाप्रतिपन्नत्वं तस्य तस्य धर्म इति विप्रतिपत्तिरपि साधारणीति ॥

(राघ.) प्रतिज्ञातमन्तर्भावं व्यनक्ति- **असाधारणो हीति** ॥ कुतो न हेतुरि-त्यत आह- **विशेषस्मरणेति** ॥ नित्यत्वानित्यत्वरूपकोटिस्मरणेत्यर्थः । आकाशविशेषगुणत्वेन रूपेण ज्ञातस्य तादृशकोटिद्वयोपस्थाने बीजाभावादिति भावः । ततः किमित्यत आह- **तथाचेति** ॥ अनित्यस्येत्यनन्तरं धर्म इत्यनु-षज्यते । सप्तम्यन्तं धर्मपदम् । नित्यव्यावृत्तत्वं तत्राविद्यमानत्वम् । अनित्यस्य धर्मे घटरूपादौ । अनित्यव्यावृत्तत्वं च नित्यधर्मे गगनपरिमाणादौ वर्तत इति नित्यानित्यवस्तुधर्मेषु साधारणयोरनित्यव्यावृत्तत्वनित्यव्यावृत्तत्वयोराकाशगुणत्वे

वर्तमानात् तादृशसाधारणधर्मद्वयोपेतोऽयमाकाशविशेषगुणत्वधर्मः स्वाधिकरणे शब्दे नित्योऽनित्यो वेति सन्देहमादधातीति सोऽपि साधारण एव। तादृश-धर्मविशिष्टः सन्नेव संशयाधायको न स्वत इति स्वयमपि तथैव भवति।

ननु सत्यं द्वौ धर्मौ साधारणौ। तथाप्येको नित्यानित्यवस्तुधर्म-साधारणो नास्तीत्यत आह- **नचेति**॥ परैरप्येकस्मिन्नेव मनसि क्रियावत्त्वस्पर्श-रहितत्वाभ्यां मूर्तत्वामूर्तत्वसन्देहाभ्युपगमादिति भावः। **तथातथेति**॥ भौतिकत्वेनाभौतिकत्वेन विप्रतिपत्तिविषयत्वं तस्य तस्य भौतिकस्याभौतिकस्य। यथा क्रियावत्त्वं मूर्तमात्रस्य धर्मः स्पर्शराहित्यममूर्तमात्रस्य धर्म इति द्वाभ्यां साधारण-धर्माभ्यां मनः किं मूर्तममूर्तमिति सन्देह उत्पद्यत इत्युच्यते तथा भौतिक-मात्राभौतिकमात्रसाधारणाभ्यां तथातथा प्रतिपन्नत्वाभ्यामिन्द्रियेषु तथातथा तत्सन्देह इति साऽपि साधारणीत्यर्थः॥

(वेदे.) उदयनमतमपि दूषयितुं सिद्धान्तमतमाह- **वयं तु ब्रूम इति**॥ न प्रतिज्ञामात्रेणार्थसिद्धिरित्यतस्तावदसाधारणधर्मस्य साधारणधर्म एवान्तर्भाव-मुपपादयति- **असाधारणधर्मो हीति**॥ स्वरूपेण ज्ञात इति शेषः। आकाश-विशेषगुणत्वाद्यसाधारणधर्मो हि नाज्ञात एव संशयहेतुः। अतिप्रसङ्गात्। किन्तु ज्ञात एव। तज्ज्ञानं च न **स्वरूपेण** आकाशविशेषगुणत्वादिनेत्यर्थः। कुतो नेत्यत आह-**विशेषेति**॥ असाधारणधर्मादिज्ञानस्य संशयहेतुत्वं कोटिस्मरणादि-द्वारैव वाच्यम्। प्रकारान्तरेणोपयोगादर्शनात्। असाधारणधर्मस्य स्वरूपेण ज्ञानं च न कोटिद्वयस्मरणजनकम्। नहि शब्दनिष्ठाकाशगुणत्वज्ञाने नित्या-नित्यत्वकोट्युपस्थितिर्भवतीति भावः। असाधारणधर्मः स्वरूपेण संशयहेतुर्न चेत् कथं संशयहेतुरिति पृच्छति- **किन्त्विति**॥ उत्तरमाह- **व्यावृत्तीति**॥ नित्यानित्यव्यावृत्तत्वेन ज्ञात इत्यर्थः। आकाशविशेषगुणत्वं नित्यव्यावृत्तमनित्य-व्यावृत्तमिति ज्ञाने हि शब्दस्य नित्यव्यावृत्तधर्मवत्त्वमनित्यव्यावृत्तधर्मवत्त्वं च

ज्ञायते। तेन नित्यव्यावृत्तधर्मवत्त्वज्ञानेनानित्यत्वकोटेरनित्यव्यावृत्तधर्मवत्त्वज्ञानेन नित्यत्वकोटेरुपस्थितिः । नित्यव्यावृत्तधर्मवत्त्वस्यानित्यत्वसहचरितत्वेन घटादावनित्यव्यावृत्तधर्मवत्त्वस्य नित्यत्वसहचरितत्वेनाकाशादौ च दर्शनात्। ततश्च व्यावृत्तिमुखेन ज्ञातस्य विशेषस्मरणकारणत्वमस्तीति संशयहेतुत्वमुपपन्नमिति भावः । अस्त्वेवं व्यावृत्तिमुखेन ज्ञान एवासाधारणधर्मः संशयहेतुस्तथाऽपि तस्य साधारणधर्म एव कथमन्तर्भाव इत्यत आह- **तथा चेति**॥ नित्यव्यावृत्तत्वं च नित्यावृत्तित्वमनित्यव्यावृत्तत्वमनित्यावृत्तित्वमुक्तरीत्या नित्यव्यावृत्तत्वेन ज्ञातो ह्यसाधारणधर्मः संशयहेतुः । तथाच नित्यव्यावृत्तत्वमनित्यस्य घटादेर्धर्मे वर्तते। अनित्यव्यावृत्तत्वं नित्यस्याकाशादेर्धर्मे वर्तते। एवञ्च नित्यव्यावृत्तधर्मवत्त्वमनित्ये घटादौ संशयधर्मिणि शब्दे च साधारणम्। अनित्यव्यावृत्तधर्मवत्त्वमुक्तरीत्या च नित्ये गगनादौ शब्दे च साधारणम्। प्रसिद्धकोटयधिकरणपुरोवृत्तिसाधारणस्यैव साधारणशब्दार्थत्वादिति भावः।

ननूर्ध्वतालक्षणसाधारणधर्मस्यैकस्यैव कोटिस्मरणद्वारा संशयहेतुत्वं दृष्टम्। इह तु नित्यव्यावृत्तधर्मवत्त्वमनित्यव्यावृत्तधर्मवत्त्वं चेति धर्मद्वयं साधारणमुक्तम्। तत् कथं तस्य संशयहेतुत्वमित्यत आह- **नचेति**॥ एकस्येव धर्मद्वयस्यापि संशयहेतुत्वे बाधकाभावादिति भावः । नचोर्ध्वतादेः पुरोवृत्तिनिष्ठस्य कोटिद्वयसहचरितत्वमेव साधारण्यं दृष्टम्। इह तु शब्दनिष्ठयोर्नित्यव्यावृत्तधर्मवत्त्वानित्यव्यावृत्तधर्मवत्त्वयोः प्रत्येकं नित्यत्वानित्यत्वरूपैकैककोटिसहचरितत्वेऽपि न तदुभयसहचरितत्वम्। अतः कथमेतयोः साधारण्यमिति। पुरोवृत्तिनिष्ठस्य धर्मस्य कोटिसहचरितत्वमेव साधारण्यम्। लाघवात्। तावत एव कोटिस्मरणोपयोगित्वाच्च। नतु कोटिद्वयसहचरित्वम्। गौरवात्। कोटिस्मरणानुपयोगित्वाच्च। ऊर्ध्वतादौ कोटिद्वयसाधारण्यमार्थिकमेव। अत एव

तत्त्वप्रकाशिकायां धर्मद्वयस्यापि तत्रतत्राधिकरणेषु संशयबीजत्वमुक्तमित्यवधेयम्।

इदानीं विप्रतिपत्तेरपि साधारणधर्म एवान्तर्भावमुपपादयति-**तथेति**॥ **तथा प्रतिपन्नत्वं** भौतिकत्वेन प्रतिपन्नत्वं **तस्य** भौतिकस्य घटादेर्धर्मः। स च साधारणः। धर्मिभूतेष्विन्द्रियेष्वपि सत्त्वात्। एवं **तथाप्रतिपन्नत्वम्** अभौतिकत्वेन प्रतिपन्नत्वं **तस्य** अभौतिकस्यात्मादेर्धर्मः। सोऽपीन्द्रियसाधारण इत्यर्थः। साधारणधर्मैक्यनियमश्च पूर्वमेव त्याजित इति भावः। **विप्रतिपत्तिरपीति**॥ विरुद्धार्थकवाक्यद्वयजन्यप्रतीतिद्वयमित्यर्थः। **साधारणी** साधारणधर्मत्वेन संशयजनिका न पृथक् कारणमित्यर्थः। यदि च विप्रतिपत्तिपदेन विरुद्धार्थकं वाक्यद्वयं विवक्षितं; तदा साधारणीत्यस्य वक्ष्यमाणरीत्या साधारणधर्मजन्यसंशयजननानुकूलेति व्याख्यानं द्रष्टव्यम्। अयमिहाभिप्रायः। विप्रतिपत्तिरूपं वाक्यद्वयं न साक्षात् संशयजनकं येन पृथक् कारणं स्यात्। प्रत्येकं वाक्यद्वयस्य निश्चयजनकत्वात्। नह्येकैकवाक्यं व्युत्पन्नस्य स्वार्थनिश्चयमजनयदनुभूयते। स्वार्थनिश्चयजननान्तरं तत्संशयमपि जनयतीत्यङ्गीकारे विरम्य व्यापारप्रसङ्गः। नापि परम्परया। अन्यथासिद्धेर्वक्ष्यमाणत्वात्। तस्मात् तत्र तटस्थाभ्यां वाक्याभ्यां तावदिन्द्रियाणि भौतिकत्वादिना प्रतीयन्ते। अनयोश्च प्रतीत्योर्द्वयोरपि प्रामाण्यमप्रामाण्यं वा न सम्भवति। परस्परविरुद्धत्वेन वस्तुविकल्पप्रसङ्गात्। वस्तुनो निःस्वभावत्वप्रसङ्गाच्च। उभयत्राप्यनिश्चये वाऽन्यतरप्रामाण्यनिश्चयोऽनुपपन्नः। अतः किमत्र भौतिकत्वप्रतीतिः प्रमाणमुताभौतिकत्वप्रतीतिरिति प्रतीतिद्वयप्रामाण्ये सन्दिहानोऽर्थेऽपि भौतिकत्वादौ सन्देहवान् भवतीति वक्तव्यम्। एवञ्च भौतिकत्वादिप्रतीतिलक्षणसाधारणधर्मदर्शनजन्य एवायं भौतिकत्वादिसंशय इत्यायातम्। इन्द्रियेषु भौतिकत्वादिना प्रतिपन्नत्वज्ञानेन जायमानत्वात्। प्रतिपन्नत्वस्य च प्रतीतावेव पर्यवसानात्। भौतिकत्वादिप्रतीत्योश्चोक्तरीत्या साधारण्यात्। नच प्रामाण्यसंशयस्यैवात्र जनकत्वं न प्रतीतिलक्षण-

साधारणधर्मदर्शनस्येति वाच्यम्। प्रामाण्यसंशयस्योत्तेजकत्वेन उक्तसाधारण-धर्मदर्शनजन्याप्रामाण्यशङ्काशून्यार्थनिश्चयरूपप्रतिबन्धकाभावसम्पादकत्वेन अन्यथासिद्धतया तत्राजनकत्वस्य त्वयाऽपि वाच्यत्वात्। अन्यथा प्रामाण्य-संशयस्यान्यज्ञानान्तर्भावेन पृथक् संशयकारणत्वेन परिगणनप्रसङ्गः। विप्रति-पत्तिरूपवाक्यद्वयं तु प्रामाण्यसंशयधर्मिरूपभौतिकत्वादिप्रतीतिजननायैव केवलमुपयुज्यत इति सुतरामन्यथासिद्धं न भौतिकत्वादिसंशयकारणत्व-शङ्कामप्यधिरोहतीति।

एतेन तदपि निरस्तम्। यत् केनचिदुक्तं तथातथाप्रतिपन्नत्वमज्ञात्वाऽपि विप्रतिपत्तिवाक्यस्थपदैः कोट्युपस्थितौ सत्यां मानससंशयसम्भवात् कथ-मेतत्। नहि साधारणो धर्म एवात्र नास्तीति ब्रूमः। येन तदुपन्यासः सार्थकः किन्तु तदा तस्यापरामर्श एवेतीति। प्रतिपन्नत्वं हि प्रतीतिपर्यवसन्नम्। प्रतीतेश्चाज्ञाने तद्धर्मिकप्रामाण्ये संशयानुपपत्तौ तदाहितभौतिकत्वादि-संशयस्याप्यसम्भवात्। नचायं स्वारसिक एव मानससंशयो न प्रामाण्य-संशयाहितः। येन प्रतीतज्ञानमावश्यकमिति वाच्यम्। प्रत्येकं वाक्यद्वयस्य निश्चयजनकत्वेन तन्निश्चितेऽर्थे स्वारसिकसंशयाभावात्। नच तत्र वाक्ययोः परस्परप्रतिबन्धेन निश्चयजनकत्वमेव नास्तीति वाच्यम्। अनुभवविरोधात्। अन्यथा कथायां वादिप्रतिवादिप्रतिज्ञावाक्ययोरपि परस्परप्रतिबन्धेन प्राश्निकान् प्रत्यबोधकत्वापत्त्या तेषां तदीयगुणहेतुगुणदोषावधारकत्वं न स्यात्। अतो वाक्यद्वयप्रतीतेंऽर्थे जायमानः संशयः प्रामाण्यसंशयाहित एव वक्तव्यः। तत्रच धर्मज्ञानस्याकारणत्वेन प्रतीतिज्ञानमप्यावश्यकमेवेति। केचित्तु प्रतिपन्नत्वपदेन प्रतिपन्नस्य भावो वाक्यमेव ग्राह्यम्। तदेव साधारणधर्मतया विवक्षितम्। तज्ज्ञानं चावश्यकमेवेत्याहुः।

विपरीतनिश्चयो विपर्ययः। विपरीतेति सम्यङ्निश्चयव्युदासः।

निश्चय इति संशयज्ञानस्य । स च प्रत्यक्षानुमानागमाभासेभ्यो जायते । यथा शुक्तिकायामिदं रजतमित्यादि ॥

(राघ.) प्राग् व्यावर्त्यतया प्रसक्तयोः क्रमप्राप्तविपर्ययतत्साधनयोः स्वरूपमाह- **विपरीतेति** ॥ वस्तु यथाऽस्ति ततो विपरीतविषयकनिश्चय इत्यर्थः । **स चेति** ॥ विपरीतनिश्चयः । आभासपदं प्रत्येकमन्वेति । प्रत्यक्षाभासानुमानाभासेति । **इत्यादीति** ॥ धूलीपटले धूमभ्रमाद् वह्निमानयं देश इत्यस्य, नदीतीरे पञ्च फलानि सन्तीति विप्रलम्भकादिवाक्यजन्यस्य च सङ्ग्रहः ॥

(वेदे.) एवं सकारणकं संशयं निरूप्येदानीं विपर्ययं निरूपयति- **विपरीतेति** ॥ विपरीतत्वं च पुरोवर्तिनि सर्वथाऽविद्यमानप्रकारकत्वमिति द्रष्टव्यम् । क्रमेण विशेषणद्वयकृत्यमाह- **विपरीतेत्यादिना** ॥ इदानीं विपर्ययसाधनमाह- **स चेति** ॥ त्रयमप्युदाहरति- **यथेति** ॥ आदिपदेन धूमभ्रमाद् वह्न्यभाववति वह्न्यनुमितिः प्रतारकवाक्यजन्यज्ञानं च ग्राह्यम् ॥

भ्रमविषये विवादाः

अयथार्थज्ञानमेव नास्तीति प्राभाकरादयः । तन्न । अनुभवसिद्धत्वात् । एतावन्तं कालमहं शुक्तिकामेव रजतत्वेन प्रतिपन्नोऽस्मीत्युत्तरकाले परामर्शाच्च । प्रतीतं च रजतं देशान्तरे सदेवेति वैशेषिकादयः । ज्ञानस्वरूपमेवेति विज्ञानवादिनः । तत्रैव तात्कालिकमुत्पन्नं सदिति भास्करः । न सन्नासन्न सदसत् किन्त्वनिर्वचनीयमेवेति मायावादिनः । 'असदेव रजतं प्रत्यभात्' इत्युत्तरकालीनानुभवात् शुक्तिरेवात्यन्तासद्रजतात्मना प्रतिभातीत्याचार्याः ।

(राघ.) **अनुभवसिद्धत्वादिति** ॥ अयथार्थज्ञानस्येत्यनुषङ्गः । प्राण-

भून्मात्रस्येदं रजतं जानामीति साक्ष्यनुभवसिद्धत्वादित्यर्थः । अनुभवविवादिनं प्रत्याह- **एतावन्तमिति** ॥ शुक्तिरेवेदं रजतमथापि तां शुक्तिकामेव रजतत्वेन **प्रतिपन्नो** ज्ञातवानस्मीति भ्रमोत्तरकाले शुक्तिविषयकपरामर्शस्य दर्शनाच्चे-त्यर्थः । एवं विपरीतपदव्यावर्त्यं भ्रमं समर्थ्य तद्विषये विवादं चोपन्यस्यति- **प्रतीतमित्यादिना** ॥ सर्वपक्षाणामनुभवविरोधेन निराकुर्वन्ननुभवसिद्धत्वेन स्वमतमाह- **असदेवेति** ॥ विस्तरस्तु सुधाया अभिनवान्यथाख्यातिवादे, न्यायामृते च ॥

(वेदे.) **अयथार्थमिति** ॥ तत्साधनं दूरतोऽपास्तमित्यर्थः । तथाच तदुभय-व्यावृत्त्यर्थं प्रमाणलक्षणे यथाशब्दार्थग्रहणमयुक्तमिति भावः । प्राभाकर इत्य-नेनायथार्थज्ञानसद्भावे मानाभावादिदं रजतमित्यादिकं तु नैकं विशिष्टज्ञानं किन्तु ग्रहणस्मरणात्मकं ज्ञानद्वयमेव । तयोश्च स्वरूपतो विषयतश्च भेदाग्रहादेव सामानाधिकरण्येन व्यवहारादिकम् । स एव च नेदं रजतमिति भेदग्रहणे बाध्यत इत्यादि तदीयमुपपादनं प्रसिद्धमेवेति सूचयति । प्रमाणाभावोऽसिद्ध इत्याह- **अनुभवसिद्धत्वादिति** ॥ यथा सत्यरजतस्थले इदं रजतमिति विशिष्टविषयमेव ज्ञानं साक्षिसिद्धम् । तथा शुक्तिकायामपीदं रजतमिति ज्ञानं च विशिष्टविषयं साक्षिणा प्रतीयमानं कुतो नाङ्गीकार्यम् । नहि ततोऽस्य वैलक्षण्यमण्वपि प्रती-यते । प्रतीतौ वाऽस्मात्प्रवृत्त्यनुपपत्तेः । नचाविशिष्टविषयं ज्ञानद्वयमेवैकज्ञान-त्वेन विशिष्टविषयकत्वेन च प्रतीयत इति वाच्यम् । तथा सति विशिष्टज्ञान-मात्रासिद्धिप्रसङ्गात् । अस्यैवायथार्थज्ञान(त्व)स्य स्वीकारापत्तेश्च । नचेदमपि न विशिष्टज्ञानमपितु ज्ञानद्वये भेदाग्रहमात्रमिति वाच्यम् । बाधकाभावात् । अन्यथा सर्वत्रानाश्वासप्रसङ्ग इति भावः । प्रमाणान्तरमाह- **एतावन्तमिति** ॥ नचायं बाधोत्तरकालीनपरामर्शः शुक्तिविशेष्यकरजतत्वप्रकारकानुभवाभावे युक्तः । अत एव तत्परामर्शानुपपत्तिरेव विपर्यये प्रमाणमिति भावः । अयथार्थज्ञानमङ्गीकुर्वाणा-

अपि न स्वाभिमतं सर्वमङ्गीकुर्वन्तीति स्वाभिमतं निर्धारयितुं वैशेषिकादिमतमुपन्यस्यति- **प्रतीतमिति** ॥ सर्वथाऽसत्त्वे प्रतीत्यनुपपत्तेस्तत्रैव सत्त्वे वा बाधानुपपत्तेरिति भावः। **ज्ञानस्वरूपमेवेति** ॥ सर्वथाऽसत्त्वे प्रतीत्यनुपपत्तेः देशान्तरे सत्त्वे प्रमाणाभावात्, पुरत एव सत्त्वे भ्रान्त्यनुपपत्तेः परिशेषाद् विज्ञानमेव तदिति वक्तव्यम्। नचैवं भ्रान्तित्वानुपपत्तिः। आन्तरस्य बाह्यतावभासो भ्रम इत्यङ्गीकारादिति भावः। **तत्रैवेति** ॥ असत्त्वे प्रतीत्यनुपपत्तेरुक्तं सदिति। अत्र प्रतीतस्य देशान्तरे सत्त्वे प्रमाणाभावादाह- **तत्रैवेति** ॥ अनुत्पन्नत्वे पूर्वमेवोत्पन्नत्वे वा भ्रान्त्यनुपपत्तिरित्यत उक्तम्- **तात्कालिकमुत्पन्नमिति** ॥ नश्यतीत्यपि ग्राह्यम्। तेन बाधोऽप्युपपद्यत एवेति भावः। **न सदिति** ॥ सत्त्वे बाधानुपपत्तिरसत्त्वे ख्यात्यनुपपत्तिः सदसत्त्वे विरोध इति भावः। **अनिर्वचनीयं** सदसद्विलक्षणमित्यर्थः। सिद्धान्ते प्रमाणोक्त्यैव तद्विरोधेनोपन्यस्तानि मतानि निराकृतानीति मन्यमानः स्वाभिमतमयथार्थं ज्ञानं दर्शयितुं सप्रमाणकं भगवत्पादसिद्धान्तमाह- **असदेवेदमिति** ॥ तदुक्तमाचार्यैः। असतः सत्त्वप्रतीतिः सतोऽसत्त्वप्रतीतिरित्यन्यथाप्रतीतेरेव भ्रान्तित्वादिति। **अत्यन्तासद्रजतात्मनेति** ॥ इदञ्च यत्राधिष्ठानासन्निहितमारोप्यं तदभिप्रायेण। तत्रारोप्यतत्तादात्म्ययोरुभयोरपि बाध्यत्वेनासत्त्वात्। यत्रारोप्यमधिष्ठानसन्निहितं तत्र तत्तादात्म्यमात्रमसत्। तन्मात्रस्यैव बाधात्। आरोप्यं तु सदेव। बाधोत्तरकालमप्यनुवर्तमानत्वात्। यथा दूरस्थयोश्चूतपनसयोरयं चूत इति भ्रम इति द्रष्टव्यम्।

एतेनोपन्यस्तान्यपि मतानि निराकृतानि। तथाहि। न तावदाद्यं मतमुपपन्नम्। असदेवेदं रजतं प्रत्यभादित्यनुभवविरोधात्। नचान्यत्र सत्त्वेऽप्यत्रासत्त्वमङ्गीक्रियत इति प्रतीत्युपपत्तिः। देशान्तरे सत एवात्र प्रतीतौ मानाभावात्। न तावत् तत्र भ्रान्तिरेव प्रमाणम्। विरोधात्। अत्रैव सत्त्वावेदकत्वाच्च।

नापि बाधः । इह रजतनिषेधकस्य तस्यान्यत्र तत्सत्त्वासत्त्वयोरौदासीन्यात् । सर्वत्रासत्त्वे कथं प्रतीतिरिति चेत् । अन्यत्र सत्त्वेऽपि कथम् । नह्यन्यत्र सत्त्वमत्र प्रतीतेरुपकारि । इन्द्रियार्थसन्निकर्षार्थं वा तदास्थेयं संस्कारसिद्ध्यर्थं वा । नाद्यः । विप्रकृष्टेन सन्निकर्षाभावात् । पुरोवृत्तिसन्निकर्षमात्रेणैव भ्रान्त्युत्पत्त्यङ्गीकारात् । न द्वितीयः । संस्कारो हि रजतानुभवमाक्षिपेदनुभवस्तु यथार्थो रजतसत्ताम् । अत्र प्रतीतस्यैवान्यत्र सत्ता तु कुतः कल्प्या । किञ्चासतः प्रतिभासासम्भवे तादात्म्यमपि न भासेत । तस्य त्वयाऽपि असत्त्वाङ्गीकारादिति । नापि द्वितीयः । आन्तरमेवेदं रजतं बाह्यतया प्रत्यभादिति प्रतीत्यापत्त्याऽसत्त्वावेदकोक्तप्रत्ययविरोधात् । नापि तृतीयः । तत्रापि रजतं विनष्टमिति बाधाकारप्रसङ्गेनोक्तासत्त्वप्रत्ययविरोधात् । नापि चतुर्थः । उक्तानुभवविरोधात् । अत्र सत्तानिषेध एव भासते । नासत्त्वमिति चेत् । तदतिरिक्तस्यासत्त्वस्याभावात् । अनिर्वचनीयवादे तदतिरिक्तमेव तदिति चेत् । अन्योन्याश्रयात् । अनिर्वचनीयमेव तदिति बाधाकारप्रसक्तेश्च । मिथ्यैव रजतं प्रत्यभादित्यनेन नानिर्वाच्यतासिद्धिः । मिथ्याशब्दस्यासत्त्ववाचकत्वेनापि उपपत्त्याऽनिर्वचनीयवाचकत्वे प्रमाणाभावात् । नच रजतस्यासत्त्वे सन्निकर्षाभावेन अपरोक्षज्ञानानुपपत्तिः । पुरोवृत्तिसन्निकृष्टमेवेन्द्रियं दोषलक्षणसहकारिमहिम्नाऽसद्रजतापरोक्षज्ञानमपि जनयतीत्यभ्युपगमात् । विस्तरस्तु सुधायां द्रष्टव्य इति ॥

अनध्यवसायः स्वप्नश्चायथार्थज्ञानान्तरमस्तीति वैशेषिकाः । किंसञ्ज्ञकोऽयं वृक्ष इत्यनध्यवसायः । स तु कोटीनामतिबाहुल्यादनिर्दिष्टकोटिकः संशय एव । वटादिव्यावृत्तिं पश्यतोऽपि पनसे यत्किंसञ्ज्ञकोऽयं वृक्ष इत्युत्पद्यते तज्ज्ञानमेव न भवति । किन्तु सञ्ज्ञाविषयं जिज्ञासामात्रम् ।

स्वप्नेऽपि गजादिदर्शनं चेद् ययार्थमेव। मानसवासनाजन्यत्वाद् गजादीनाम्। तेषु यद्बाह्यत्वज्ञानं स विपर्यय एव।

बाह्यालीप्रदेशे पुरुषेणानेन भवितव्यमित्यूहापरनामकं सम्भावनाज्ञानमप्यन्यतरकोटिप्रापकप्राचुर्यनिमित्तोऽन्यतरकोटिप्रधानः संशय एव॥

(राघ.) ननु 'यथार्थग्रहणेन संशयविपर्ययतत्साधनानां निरासः' इत्ययुक्तम्। व्यावर्त्यान्तरस्यापि सत्त्वादित्याशङ्क्य किञ्चिद्व्यावर्त्यतया प्रसक्तं संशयादावन्तर्भवति। किञ्चिल्लक्ष्यमेव न व्यावर्त्यमिति भावेन तदनुवादपूर्वकमुक्तान्तर्भावमाह- **'अनध्यवसायः'** इत्यादिना **'वक्ष्यामः'** इत्यन्तेन।

बाह्यालीप्रदेशे बाह्यवीथीप्रदेश इत्यर्थः॥

(वेदे.) **वैशेषिका इति**॥ तथा चेदपि ज्ञानद्वयं यथाशब्दग्रहणव्यावर्त्यत्वेन पूर्वं कुतो न प्रदर्शितमिति भावः। तत्रानध्यवसायस्य संशयान्तर्भावं वक्तुमज्ञातस्वरूपस्यान्तर्भावयितुमशक्यत्वात् तत्स्वरूपमनुवदति- **किंसञ्ज्ञक इति**॥ का सञ्ज्ञा यस्य सः किंसञ्ज्ञकः। इत्याकारं ज्ञानमिति शेषः। तस्यान्तर्भावमाह- **स इति**॥ वृक्षत्वादिसाधारणधर्मदर्शने वटादिसञ्ज्ञकत्वादिकोटिस्मृतौ निर्णायकादर्शने विशेषजिज्ञासायां च जायमानमिदं ज्ञानं संशयरूपमेव। तथाच संशयग्रहणेनैव तस्यापि गृहीतत्वान्न पृथग्व्यावर्त्यत्वेन प्रदर्शनीयमिति भावः। तर्हि स्थाणुपुरुषादिसंशयवत् कोटिनिर्देशः स्यादित्यत उक्तम्- **कोटीनामिति**॥ संशयोऽपि द्विविधः। निर्दिष्टकोटिकोऽनिर्दिष्टकोटिकश्चेति। तत्रानध्यवसितरूपं ज्ञानमनिर्दिष्टकोटिकसंशयरूपमिति भावः। ननु वस्तुगत्या पनसे वटादिव्यावृत्तिनिश्चयेऽपि किं सञ्ज्ञकोऽयमुत्पद्यते। स न तावत् संशयः। इतरकोटिव्यावृत्तिनिश्चयात्। अतः स एवास्माकमनध्यवसाय इत्यत आह-

वटादीति ।। ज्ञानमेव न सम्भवति । कुतोऽनध्यवसाय इत्येवार्थः । तर्हि किं तदिति पृच्छति- **किन्त्विति** ।। उत्तरमाह- **सञ्ज्ञाविषयमिति** ।। सञ्ज्ञाविशेषविषयमित्यर्थः । वटादिव्यावृत्तिदर्शनानन्तरमयं वृक्षः किञ्चित्सञ्ज्ञक इति सामान्यनिश्चयस्य विशेषजिज्ञासाजनकस्य सत्त्वादिति भावः ।

स्वप्नेऽपि गजतुरगादिज्ञानस्य प्रमाणत्वेन सङ्ग्राह्यतया न व्यावर्त्यत्वमित्याशयेनाह- **स्वप्नेऽपीति** ।। स्वप्नावस्थायामपीत्यर्थः । ननु कथं यथार्थत्वम्? स्वाप्नगजादीनां सत्यत्वानुपपत्तेः । सत्यत्वे तेषां नित्यत्वमनित्यत्वं वा वक्तव्यम् । नच तत् सम्भवति । उभयपक्षेऽपि पूर्वोत्तरकाले दर्शनप्रसङ्गात् । नच दृश्यतेऽतस्तेऽसत्या एव । तथाच तद्दर्शनमयथार्थमेवाङ्गीकार्यम् । नच प्रतीतकाल एव सृष्टिनिरोधौ अतो न दोष इति वाच्यम् । उपादानाद्यभावेन सृष्टेरयोगात् । प्रागुत्तरकालं मृत्पिण्डकपालादिदर्शनप्रसङ्गाच्चेत्यत आह- **मानसेति** ।। मानसवासनेत्युपादानकीर्तनम् । वासनायाश्चाप्रत्यक्षत्वेन उपादानाद्यदर्शनमुपपन्नमिति भावः । नचैवं वासनो-पादानकगजादीनामप्रत्यक्षतापत्तिः । अतीन्द्रियद्व्यणुकोपादानकस्यापि त्र्यणुकस्य प्रत्यक्षत्ववदुपपत्तेः । स्वाप्नस्वशिरश्छेदादीनामस्मिन् जन्मन्यननुभूतत्वेन वासनाऽसम्भवात् उपादानाभावेनासत्त्वापत्तिरित्यत उक्तम्- **मानसेति** ।। मनसोऽनादित्वेन पूर्वजन्मानुभूतं तद्वासनाया मनोगताया अत्रोपादानत्वसम्भवात् नासत्त्वमिति भावः । अनेन वासनाया आत्मधर्मत्वं वदन्तोऽपि निरस्ता इति द्रष्टव्यम् । वासनाया जडत्वेन संस्कारत्वेन वा वेगादिवदनौचित्यात् । अत्रोपादानकीर्तनमुपलक्षणम् । ईश्वरः कर्ताऽदृष्टादिकं निमित्तमिति च द्रष्टव्यम् । प्रमाणन्तु सर्वत्र 'सन्ध्ये सृष्टिराह हि' इत्यादिनोक्तं द्रष्टव्यम् ।

नन्वेवं गजादिस्वरूपमात्रज्ञानस्य बाधाभावेन यथार्थत्वेऽपि तेषु गजादिषु यद् बहिष्ठत्वज्ञानं तदयथार्थमेवाङ्गीकार्यम् । स्वाप्न एवायं मया दृष्टो गजादिर्न

बाह्य इति बाधदर्शनात्। नच बाह्यताया अपि वासनादिकं कारणं सम्भवतीति सत्यत्वोपपत्त्या तज्ज्ञानमपि यथार्थमेव भविष्यतीति वाच्यम्। नह्युपादानादि-सम्भवमात्रेण सत्यत्वमाचक्ष्महे। किन्तु बाधाभावेन। सामग्र्यभावेनासत्त्वं ब्रुवाणं प्रति तदसिद्धिरावेदिता। नचैवं प्रकृते। बाह्यताया उक्तरीत्या बाध्यत्वात्। तथाच स्वाप्नं बाह्यताज्ञानमयथार्थमुक्तातिरिक्तं व्यावर्त्यं भविष्यतीत्यत आह-**तेष्विति**॥ तथाच विपर्ययग्रहणेन गृहीतत्वात् तस्यापि न पृथग्व्यावर्त्यत्वमिति भावः।

इदमुपलक्षणम्। कदाचिद् भवान्तरेऽप्यप्रतिपन्नशशत्वविषाणित्व-सामानाधिकरण्यज्ञानमपि विपर्यय इति ग्राह्यम्। तस्याप्युपादानाभावेना-सत्त्वात्। नच तत्रापि शब्दाभासादिना भ्रान्त्या संस्कारोत्पत्तिः। सर्वत्रासति शाब्दभ्रमनियमे मानाभावात्। नापि सर्वथाऽप्रतिपन्नं स्वप्ने न पश्यतीति नियन्तुं शक्यते। तत्रापि विभागतः शशत्वादि प्रतीतमिति चेत्। तथाऽपि परस्पर-सामानाधिकरण्यस्य स्वप्ने प्रतीयमानस्य पूर्वं कदाऽप्यप्रतीतेः। बाह्ये बाध्यत्वाच्च तस्य। उक्तं च भगवत्पादैः।

'कदाचिद् दर्शनायोग्यं यत् तत्रापि विभागतः।
दृष्टं समानाधिकरणं दृश्यतेऽत्र स च भ्रमः॥' इति।

नन्वथापि सम्भावनारूपमयथार्थज्ञानान्तरमस्तीति शङ्कानिरासायोहापर-नामकमित्युक्तम्। अनध्यवसायसमुच्चयार्थमपिशब्दः। सम्भावनाज्ञानमपि संशय एवेत्यन्वयः। संशयत्वे प्रसिद्धसंशयवदुभयकोट्योः साम्येनोल्लेखः स्यादित्यत उक्तम्- **अन्यतरकोटिप्रधान इति**॥ तथाचानिर्दिष्टकोटिकोऽपि संशयो द्वेधा। समानानेककोटिकोऽन्यतरकोटिप्रधानश्चेति। तत्र सम्भावनारूपं ज्ञानमन्यतर-कोटिप्रधानसंशयरूपमेवेत्यर्थः। अन्यतरकोटिप्राधान्ये निमित्तमुक्तमन्यतर-कोटिप्रापकेति॥

प्राभाकराद्युक्तप्रमाणलक्षणस्यायुक्तता

तर्कोऽनुमानमेवेति वक्ष्यामः । स्मृतावतिव्यापकं प्रमाणलक्षणमिति चेन्न । तस्या अपि प्रमाणत्वेन लोकवेदयोः संव्यवहारात् । अनुभूतिः प्रमाणम् । स्मृतिव्यतिरिक्तं ज्ञानमनुभूतिरिति प्राभाकराणां लक्षणम् । संशयविपर्ययव्यापकत्वात् स्मृतौ वेदादिषु च यथार्थज्ञानसाधनेष्वव्यापकत्वाच्चायुक्तम् ।

ज्ञाततप्राकट्यापरपर्यायवाच्यस्य प्रमेयाश्रितस्य प्रकाशविशेषस्य साधनं क्रियाज्ञानं प्रमाणमिति भाट्टानां लक्षणमप्ययुक्तम् । ज्ञानव्यतिरिक्तायां ज्ञाततायां प्रमाणाभावेनासम्भवित्वात् । अतीतादिविषयज्ञानानामाश्रयाभावेन तज्जनकत्वायोगाच्च । वेदादिष्वव्याप्तेश्च । अनधिगततथाभूतार्थज्ञानं प्रमाणमिति तेषामेव लक्षणान्तरमप्ययुक्तम् । स्मृतौ वेदादिषु चाव्याप्तेः ॥

(राघ.) व्याप्यारोपेण व्यापकारोपस्तर्कः कुतो न व्यावर्त्य इत्यत आह- **तर्क इति** ॥ वक्ष्यामोऽनुमानपरिच्छेद इति भावः । विशिष्टस्यापि प्रमाणलक्षणस्यातिव्याप्तिमाशङ्क्य निराह - **स्मृताविति** ॥ लोकवेदयोः ब्रह्मतर्कादिस्मृतौ । तथा 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्' इत्यादिवेदे चेत्यर्थः ।

इदानीं परोक्तप्रमाणलक्षणान्यनूद्य निराह- **अनुभूतिरिति** ॥ लक्षणमयुक्तमित्यन्वयः । कचित् ज्ञाततासाधनमिति कचित्प्राकट्यसाधनमित्यादिव्यवहारादनेकलक्षणत्वभ्रमनिरासायोक्तम्- **ज्ञाततप्राकट्यापरपर्यायवाच्यस्येति** ॥ ज्ञाततेति प्राकट्येत्यपराभ्यां **पर्यायेण** क्रमेण वाच्यस्येत्यर्थः । भ्रमविषयगतज्ञातताव्यावृत्तये प्रकाशविशेषस्येति विशेषग्रहणम् । **क्रियाज्ञानम्** ॥ ज्ञा अवबोधन

इति शुद्धधात्वर्थः क्रिया। तदात्मकं ज्ञानमित्यर्थः। प्रकाशविशेषसाधनमित्युक्त्या ज्ञानपदं करणसाधनमिति भ्रमनिरासाय क्रियेति विशेषणम्। **ज्ञानव्यतिरिक्तेति**॥ ज्ञानविषयत्वव्यतिरिक्तेत्यर्थः। ज्ञातो घट इत्यादिव्यवहारस्य ज्ञानविषयत्वेनैवोपपत्तेरिति भावः। तद्रीत्याऽपि अव्याप्तिदोष इति भावेनाह- **अतीतादीति**॥ **तज्जनकत्वेति**॥ ज्ञातताजनकत्वायोगाच्चेत्यर्थः। तत्र हेतुराश्रयाभावेनेति। प्रमेयाश्रितस्येति त्वयोक्तेरिति भावः। अतीतादिज्ञानेष्विति शेषः। अव्याप्तेश्चेति वक्ष्यमाणेनान्वयः। वेदादिषु चेत्यत्रापि चशब्दान्वयः। आदिपदेन चक्षुरादिग्रहः। तत्र क्रियाज्ञानत्वाभावादिति भावः। **अनधिगतेति**॥ अज्ञातयथावस्थितार्थविषयकं ज्ञानमित्यर्थः। ज्ञातार्थज्ञाने संशयादौ चानतिव्याप्तये क्रमादनधिगतेति तथाभूतार्थेति च विशेषणद्वयम्। **स्मृतावित्यादि**॥ स्मृतेरधिगतार्थविषयकत्वात्। वेदादिषु ज्ञानत्वाभावादिति भावः॥

(वेदे.) नन्वथापि तर्करूपमयथार्थज्ञानान्तरमस्ति व्यावर्त्यमित्यत आह- **तर्क इति**॥ तथाच तल्लक्ष्यमेव न व्यावर्त्यमिति भावः। एवमयथार्थज्ञानान्तराभावात् संशयविपर्ययतत्साधनान्येव यथाशब्दार्थग्रहणेन व्यावर्त्यानीत्युक्तम्। इदानीं विशिष्टस्यापि लक्षणस्यातिव्याप्तिमाशङ्क्य निराकरोति- **स्मृताविति**॥ सर्वपरीक्षकैरपि स्मृतेरप्रामाण्याङ्गीकारादिति भावः। **लोकवेदयोरिति**॥ तस्मिन्नर्थे मत्स्मृतिरेव प्रमाणमिति व्यवहारात्।

'स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्।
प्रमाणमिति विज्ञेयं धर्माद्यर्थे बुभूषुभिः॥'

इति च वेदे व्यवहारात्। तथाचैतद्विरुद्धवादिनो न परीक्षका इति भावः। एवं प्रमाणसामान्यलक्षणं निरूप्य स्वोक्तलक्षणदृढीकरणाय वाद्यन्तरोक्तलक्षणानि निराकुर्वंस्तावत्प्राभाकराणां सामान्यलक्षणं दूषयितुमनुवदति - **अनुभूतिरिति**॥ ननु ज्ञानं प्रमाणमित्यनुक्त्वाऽनुभूतिग्रहणं किमर्थमित्यतः स्मृतावति-

व्याप्तिपरिहारार्थमिति भावेना-नुभूतिस्वरूपमाह- **स्मृतिव्यतिरिक्तमिति** ॥ स्मृतिनिरासाय स्मृतिव्यतिरिक्तमिति । घटादिनिरासाय ज्ञानमिति । लक्षणमयुक्तमित्यन्वयः । **संशयेति** ॥ अयथार्थज्ञानस्य तं प्रति साधितत्वादिति भावः। **स्मृतावित्यादि** ॥ लोके, स्मृतिः प्रत्यक्षमैतिह्यमित्यादिवेदे च स्मृतेर्वेदादिकरणप्रामाण्यस्य सिद्धतया तदलक्ष्यत्वस्य वक्तुमशक्यत्वादिति भावः । अनुप्रमाणत्रये वेदस्यैव मुख्यत्वविवक्षया वेदस्य स्वशब्देनोपादानम् ।

भाट्टानां लक्षणमनूद्य दूषयति- **ज्ञाततेति** ॥ अत्र प्रकाशविशेषस्य साधनं प्रमाणमित्येव लक्षणवाक्यम् । भ्रमेऽतिव्याप्तिपरिहाराय विशेषस्येति । ज्ञाते पुनर्ज्ञातताऽनुदयेन न स्मृतौ प्रसङ्गः । अन्यत् तदुपयुक्तं कथितम् । यदि प्रकाशविशेषो ज्ञानं तदा ज्ञानस्य ज्ञानं साधनमित्यापन्नमित्यत उक्तं ज्ञाततेति । तदीयग्रन्थेषु प्राकटचसाधनं ज्ञानं प्रमाणमिति व्यवहृतमतोऽसदनुवादोऽयमिति शङ्कानिरासाय प्राकटचेत्युक्तम् । ज्ञाततेत्यस्यापीदमेव वा प्रयोजनम् । प्रकाशविशेषसद्भावे प्रमाणाभावादसम्भवीदं लक्षणमित्याशङ्कायां तत्र प्रमाणसूचनाय प्रमेयाश्रितस्येति क्रियेति ज्ञानमिति चोक्तम् । क्रियारूपं ज्ञानमित्यर्थः । ज्ञानस्यापि धात्वर्थक्रियारूपत्वात् । अनेन ज्ञानं स्वकर्मणि किञ्चिज्जनयति क्रियात्वात् छिदिक्रियावदिति परोक्तानुमानं सूचितं भवति । प्रमेयाश्रितस्येत्यनेन ज्ञातो घट इत्यादिप्रत्यक्षमपि तत्र प्रमाणं सूचयति । तत्र तावत् तदभिप्रेतं प्रत्यक्षमन्यथासिद्धमिति न तत्र प्रमाणमित्याह- **ज्ञानव्यतिरिक्तायामिति** ॥ तथाच ज्ञातो घट इत्यत्र ज्ञात्राश्रितं ज्ञानमेव कर्मप्राधान्यविवक्षया प्रमेयाश्रितत्वेन प्रतीयते नत्वतिरिक्ता ज्ञातता । अन्यथेष्टो घट इति प्रतीत्येष्टताऽपीच्छातिरिक्ता प्रमेयाश्रिता स्वीकार्या स्यादिति भावः । अनुमानमपि दूषयति- **अतीतादीति** ॥ तथाचातीतानागतज्ञानानां ज्ञातताऽजनकत्वेन स्वकर्मणि किञ्चित्कारित्वाभावे क्रियात्वं न स्यात् । यदि तत्र व्यवहारादि-

जनकत्वमात्रेण क्रियात्वं तर्हि वर्तमानज्ञानानामपि तथात्वमस्त्विति व्यभिचारोऽन्यथासिद्धिर्वेति भावः। एतेन ज्ञानविषयतानियामकत्वेनैव ज्ञातताऽङ्गीकार्येति तदीयं साधकान्तरमप्यपास्तम्। अतीतादौ ज्ञातताभावेन ज्ञानविषयत्वाभावापातात्। तत्र करणसन्निकर्षेण विषयतानियमेऽन्यत्रापि तथाऽस्त्विति किं ज्ञाततयेति। विस्तरस्तु सुधायां द्रष्टव्यः। अनेन ज्ञातताऽस्वीकारेऽपि अतीतादिज्ञानेष्वव्याप्तिरप्युक्ता द्रष्टव्या। तत्राश्रयाभावेन ज्ञाततोत्पत्तेस्तेनाप्यस्वीकारात्। करणेष्वव्याप्तिमाह- **वेदादिष्विति**॥ आदिपदेन स्मृतेरपि सङ्ग्रहः। **अनधिगतेति**॥ स्मृतिव्यवच्छेदायानधिगतेति। भ्रमनिरासाय तथाभूतेति। ज्ञानमिति च प्रमेयव्युदासार्थम्। स्मृतावित्युपलक्षणम्। धारावाहिकज्ञाने चेत्यपि द्रष्टव्यम्॥

सम्यगनुभवसाधनं प्रमाणमिति नैयायिकादयः। तदप्यसत्। यथार्थज्ञानेऽव्याप्तेः। प्रमाव्याप्तं प्रमाणमित्युदयनः। तदपि सर्वस्यापि प्रमेयस्येश्वरप्रमाव्याप्तत्वेनातिव्यापकत्वादयुक्तम्। साधनाश्रययोरन्यतरत्वे सति प्रमाव्याप्तत्वं विवक्षितमिति चेन्न। आश्रयग्रहणवैयर्थ्यात्। ईश्वरस्यापि प्रामाण्यसिद्ध्यर्थं तदिति चेन्न। कर्तरि प्रमाणशब्दस्याननुशासनात्। यथार्थज्ञानेष्वव्याप्तेश्च। तस्माद्याथार्थ्यमेव प्रमाणलक्षणं युक्तम्॥

(राघ.) **तदप्यसदिति**॥ अलक्षणमित्यर्थः। **प्रमाव्याप्तमिति**॥ प्रमया व्याप्तं प्रमाव्याप्तम्। यथाश्रुते दोषमाह- **तदपीति**॥ ईश्वरप्रमाया अनादिनित्यत्वाद् यदा घटादिप्रमेयं तदेश्वरप्रमेति व्याप्तेरिति भावः। **साधनेति**॥ प्रमासाधनप्रमाश्रययोरन्यतरत्वे सति प्रमाव्याप्तत्वमित्यर्थः। तथाच नोक्तदोषः। प्रमेयस्य तदुभयान्यतरत्वाभावादिति ज्ञेयम्। आश्रयपदेन प्रमावान् प्रमास्वामी तत्कर्ता-

भिप्रेत उताधिकरणमात्रम्। आद्ये आह- **कर्तरीति** ॥ तत्पक्षे हि प्रमातीति प्रमाणमिति प्रपूर्वात् माङ् मान इति धातोः कर्तरि ल्युट्प्रत्यये प्रमाणमिति रूपमिति वाच्यम्। नचैवं कर्तरि ल्युटो विधानमस्ति। ल्युटो भावे करणाधिकरणयोश्च विधानात्। नान्त्यः। निरसिष्यमाणत्वादिति भावः। दोषान्तरं चाह- **यथार्थज्ञानेष्विति** ॥

(वेदे.) **सम्यगिति** ॥ सम्यगिति संशयादिनिरासाय। अनुभव इति कुठारादेर्निरासाय। ज्ञानमात्रग्रहणे स्मृतौ प्रसङ्गादनुभवग्रहणम्। साधनग्रहणं फलव्यवच्छेदाय प्रमातृप्रमेयव्यवच्छेदार्थं च। न्यायैकदेशिमते ईश्वरस्याप्रमाणत्वात् तत्प्रामाण्यवादिमतेऽपि एतस्य लौकिकप्रमाणमात्रलक्षणत्वात् नेश्वरेऽव्याप्तिरिति द्रष्टव्यम्। **यथार्थेति** ॥ नच न ज्ञानं प्रमाणं किन्तु तत्फलमतो नाव्याप्तिरिति वाच्यम्। करणवज्ज्ञानस्यापि ल्युडन्तप्रमाणशब्दवाच्यतया लक्ष्यताऽवश्यम्भावस्य वक्ष्यमाणत्वात्। प्रामाण्यस्य परतस्त्वेऽनवस्थाप्रसङ्गेन स्वप्रकाशज्ञानग्राह्यत्वावश्यम्भावेन ज्ञानप्रमाण्यस्यावश्यकत्वाच्चेति भावः। **प्रमाव्याप्तमिति** ॥ इदञ्च लौकिकप्रमाणेश्वरसाधारणम्। अत्र यद्यपीश्वरे प्रमासाधने चक्षुरादौ च न प्रमया दैशिकी व्याप्तिः सम्भवति। तथाऽपि यदेश्वरस्तदा प्रमेति यदा सन्निकृष्टेन्द्रियस्तदा प्रमेति च कालिकी विवक्षितेति ध्येयम्। **सर्वस्यापीति** ॥ भ्रमादिदशायां व्यभिचारेण अस्मत्प्रमाव्याप्तत्वाभावादाह- **ईश्वरप्रमेति** ॥ यदा सर्वं प्रमेयं तदेश्वरप्रमेति व्याप्तेरप्रतिहतत्वादिति भावः। इदमुपलक्षणम्। सुखादिप्रमेयेऽस्मदादिप्रमाव्याप्तत्वेन अतिव्याप्तिः द्रष्टव्या। **साधनाश्रययोरिति** ॥ एवञ्च प्रमेयस्य साधनत्वमाश्रयत्वं वा नेति नातिव्याप्तिरित्यर्थः। **कर्तरीति** ॥ प्रमाणशब्दस्य ल्युडन्तत्वात्। ल्युटश्च करणाधिकरणभावेष्वनुशासनेऽपि कर्तर्यननुशासनादित्यर्थः। ईश्वरस्य कर्तृत्वेऽपि प्रमां प्रत्यधिकरणत्वमस्त्येवातः प्रमाणशब्दवाच्यत्वमुपपद्यत इति चोद्यमुत्तरत्र स्वयमेव परिहरिष्यति।

परोक्तप्रमाणसामान्यलक्षणनिराकरणस्य प्रकृतोपयोगं दर्शयन्नुपसंहरति- तस्मादिति ॥

प्रमाणविभागः

द्विविधं प्रमाणं केवलमनुप्रमाणं चेति । तत्र यथार्थज्ञानं केवलप्रमाणम् । यथार्थमिति संशयादिव्युदासः । ज्ञानमिति प्रत्यक्षस्य । लिङ्गज्ञानं वाक्यज्ञानं च लिङ्गिनि वाक्यार्थे चानुप्रमाणमपि लिङ्गे वाक्ये च केवलप्रमाणमिति नातिव्याप्तिः । इदं च साक्षाज्ज्ञेयविषयीकारित्वात् केवलमित्युच्यते ॥

(राघ.) अवसरप्राप्तं विभागमाह- **द्विविधमिति** ॥ **यथार्थज्ञानं** यथावस्थितार्थविषयकं ज्ञानमित्यर्थः । संशयादीत्यादिपदेन विपर्ययतदुभयज्ञानयोर्लिङ्गाभासज्ञानवाक्याभासज्ञानयोर्ग्रहः । **प्रत्यक्षस्य** सन्निकर्षस्य वा सन्निकृष्टेन्द्रियजातस्य वेत्यर्थः । व्युदास इत्यनुषङ्गः । प्रत्यक्षस्येत्युपलक्षणम् । इच्छाद्वेषप्रयत्नचलनक्रियाणामित्यपि ध्येयम् । यदितु यथावस्थितज्ञानोपाधिकवस्तुविषयीकारि ज्ञानमित्येवार्थस्तदा तु नोपलक्षणम् । प्रत्यक्षस्येत्येव साधु । तस्य ज्ञानसाधनतया ज्ञेयविषयीकारित्वमिति ध्येयम् । नन्विदं लक्षणमनुमानागमयोरनुप्रमाणयोरतिव्याप्तमित्यतो विषयभेदेन लक्ष्यत्वान्न दोष इत्याह- **लिङ्गज्ञानमिति** ॥ ननु लिङ्गज्ञानादिकं स्वकार्यलिङ्गव्यवहारादिजननेऽनन्यापेक्षत्वाद् यथा केवलमित्युच्यते तथा स्वकार्यलिङ्गिज्ञानादिजननेऽप्यनन्यापेक्षत्वाल्लिङ्गाद्यंशेऽपि केवलप्रमाणतापत्तिरित्यत आह- **इदञ्चेति** ॥ यथार्थज्ञानमित्यर्थः । नोक्तरूपकैवल्यमत्राभिमतं किन्तु साक्षाज्ज्ञेयविषयीकारित्वम् । ननूक्तं करणानामपि साक्षाद्वस्तुविषयत्वमस्तीति चेत् । सत्यम् । साक्षाज्ज्ञेयविषयीकारित्वं नाम स्वविषये ज्ञेयत्वाधाने स्वात्मान्यानपेक्षत्वम् । तच्च पटादिप्रमिते-

रेवास्ति न करणानाम्। लिङ्गज्ञानादेर्लिङ्ग्याद्यौ ज्ञेयत्वाधाने स्वात्मान्यानुमित्यादिसापेक्षत्वात्। अतो न लिङ्ग्याद्यंशे लिङ्गज्ञानादेः केवलतापत्तिरिति। लक्षणे तु साक्षादित्यविवक्षितमिति ज्ञानपदमर्थवदिति भावः॥

(वेदे.) तद्विभागमाह- **द्विविधमिति**॥ प्रमाणानामानन्त्येऽपि साक्षात् पारम्पर्येण यथार्थे तारतम्यज्ञापनार्थोऽयं विभागः। तदेव दर्शयन् द्वे विधे दर्शयति- **केवलमिति**॥ प्रधानाभिप्रायेण प्रथममुद्दिष्टं केवलं लक्षयति- **तत्रेति**॥ **ज्ञानमिति प्रत्यक्षस्येति**॥ यद्यपि अनुप्रमाणमात्रं व्यावर्तनीयम्। यथार्थं केवलमित्युक्तेऽनुप्रमाणमात्रेऽतिव्याप्तिप्रसक्तेः। तथाऽपि लिङ्गज्ञानवाक्यज्ञानयोः अनुमानागमरूपयोः ज्ञानात्मकत्वेन न ज्ञानपदेन तन्निरास इति भ्रान्तिर्मन्दानां स्यादतः प्रत्यक्षमात्रं व्यावर्तितम्। वस्तुतस्त्वनुमानादिकमपि व्यावर्त्यमित्यनुपदमेव वक्ष्यामः। अत एव प्रमाणलक्षणटीकायां ज्ञानमित्यनुप्रमाणव्युदास इति स्पष्टमुक्तम्। नन्वथाऽपि लिङ्गज्ञानवाक्यज्ञानयोः अनुमानागमलक्षणानुप्रमाणयोरतिव्याप्तिः, तयोरपि यथार्थज्ञानत्वादित्यत आह- **लिङ्गज्ञानमिति**॥

अयमाशयः। यथार्थत्वे सति ज्ञानत्वमित्येव न लक्षणम्। येन लिङ्गज्ञानादावतिव्याप्तिः स्यात्। किन्तु यद्विषयापेक्षया यथार्थत्वमुपपादनीयं साक्षात् तद्विषयकज्ञानत्वमेव लक्षणत्वेन विवक्षितम्। एवञ्च लिङ्गज्ञानवाक्यज्ञानयोः लिङ्गिवाक्यार्थापेक्षया याथार्थ्यविवक्षायां साक्षात् तद्विषयकज्ञानत्वावश्यम्भावात् लिङ्गवाक्यरूपविषयापेक्षया याथार्थ्योपपादने तु साक्षात् तद्विषयकज्ञानत्वभागस्यापि तत्र सत्त्वेन लक्ष्यत्वान्न कुत्राप्यतिव्याप्तिरिति। केचित्तु तयोरपि लक्ष्यत्वात् नातिव्याप्तिरिति भाव इत्याहुः। तच्चिन्त्यम्। लिङ्गवाक्यरूपविषये तयोर्लक्ष्यत्वेन तदपेक्षयाऽतिव्याप्त्यभावेऽपि लिङ्गिवाक्यार्थापेक्षयाऽपि तयोः केवलत्वापत्तेरपरिहारादिति। ननु यथार्थज्ञानस्य केवलमिति सञ्ज्ञा कुत इत्यत

आह- इदश्चेति ।। यद्यपि सञ्ज्ञानिरुक्त्यैव लक्षणं सिध्यति । तथाऽपि शृङ्गिग्राहकतया तज्ज्ञापनार्थं यथार्थज्ञानं केवलमित्युक्तम् ।।

केवलप्रमाणविभागः

तच्च चतुर्विधम् । ईश्वरज्ञानं लक्ष्मीज्ञानं योगिज्ञानमयोगिज्ञानं चेति । तत्र सर्वार्थविषयकमीश्वरज्ञानम् । नियमेन यथार्थम् । तत्स्वरूपमनादिनित्यम् । स्वतन्त्रम् । निरतिशयस्पष्टं च ।

ईश्वरे त्वसार्वत्रिकमन्यत्रानालोचनेऽपि सर्वविषयं लक्ष्मीज्ञानम् । तदपि नियमेन यथार्थम् । तत्स्वरूपमनादि नित्यं च । ईश्वरैकाधीनम् । तदपेक्षया स्पष्टत्वे न्यूनम् । स्पष्टत्वं चापरोक्षत्ववज्ज्ञानगत एव विशेषो न विषयोपाधिकः ।।

(राघ.) तदिति ।। यथार्थज्ञानमित्यर्थः । तारतम्यक्रमेण निर्दिशति- ईशेति ।। निर्देशक्रमेण तेषां स्वरूपमाह- तत्रेति ।। चतुर्षु मध्ये । तत्स्वरूपम् ईशेन सविशेषाभिन्नमित्यर्थः । अत एवानादिनित्यं स्वतन्त्रं चानन्याधीनमित्यर्थः । निरतिशयस्पष्टमिति ।। एतस्मादतिशयितं स्पष्टं नास्तीदमेव सर्वातिशयितस्पष्टमित्यर्थः । ईश इति विषयसप्तमी । अन्यत्रेति ।। ईशादिति सम्बध्यते । आलोचनं मनःप्रणिधानविशेषः । तदभावेऽपीत्यर्थः । सर्वविषयमित्येवोक्तावसम्भवः । अत ईशेऽसार्वत्रिकमिति । व्याहतिनिरासायेशादन्यत्रेति । ब्रह्मज्ञानव्यावृत्त्यर्थम् अनालोचनेऽपीति ।।

(वेदे.) इदानीं तद्विभागमाह- तच्चेति ।। अयमपि महावैलक्षण्यज्ञापनार्थो विभागः । प्राधान्यक्रमेणोद्दिशति- ईश्वरज्ञानमिति ।। तत्रेश्वरज्ञानं लक्षयति- सर्वार्थेति ।। स्वपरगताखिलविशेषविषयमित्यर्थः । लक्ष्मीज्ञानादेरीशादन्यत्रैव सर्वविषयकत्वं नेश्वरेऽपीति भावः । नन्वस्मदादिज्ञानं कदाचिदयथार्थं मनोवृत्ति-

रूपं जन्यमनित्यमस्वतन्त्रं सातिशयस्पष्टं च दृश्यते। ईश्वरज्ञानमपि किं तादृशम्? नेति भावेन तत्स्वरूपमाह- **नियमेनेत्यादिना**॥ यद्वा स्वतन्त्रं निरतिशयस्पष्टं चेति लक्षणान्तरम्। इतरत्स्वरूपकथनम्। स्वतन्त्रमित्यत्र ज्ञानपदं संयोज्यते। तेनेश्वरेऽतिव्याप्तिः। लक्ष्म्यादिज्ञाननिरासाय निरतिशयेति। लक्ष्मीज्ञानं लक्षयति- **ईश्वरे त्विति**॥ ईश्वरज्ञाननिवृत्त्यर्थमीश्वरे त्वसार्वत्रिकमित्युक्तम्। अन्यत्र सर्वविषयमित्यस्मदादिज्ञाननिरासः। व्याघातपरिहारार्थमन्यत्रेत्युक्तम्। ईशादिति शेषः। ऋजुज्ञानेऽतिव्याप्तिपरिहारायानालोचनेऽपीत्युक्तम्। तस्यालोचने सर्वविषयकत्वं वक्ष्यति। अत्र सर्वदेत्यपि ग्राह्यम्। अतो मुक्त्यवस्थापन्ने ऋजुज्ञानेऽनालोचनेऽपि अन्यत्र सर्वविषये नातिव्याप्तिरिति ध्येयम्। तदपीत्यादि पूर्ववत्। यद्वा लक्षणान्तरमाह- **ईश्वरेति**॥ अत्रेशाधीनमितीशज्ञाननिरासः। एकेति ब्रह्मादिज्ञाननिरासः। लक्ष्मीव्यावृत्त्यै ज्ञानपदं संयोज्यम्। नच लक्ष्मीज्ञानं लक्ष्म्यधीनमपि भवतीत्यसम्भवः। ईशैकाधीने ईशज्ञानेऽतिव्याप्तिश्चेति वाच्यम्। अत्राधीनत्वस्य भेदगर्भस्यैव विवक्षितत्वात्। लक्षणान्तरमाह- **तदपेक्षयेति**॥ अत्र तन्मात्रापेक्षयेति विवक्षितत्वान्न ब्रह्मादिज्ञानेऽतिव्याप्तिः। यद्वेशलक्ष्मीज्ञानयोरीश्वरादन्यत्र सर्वविषयकत्वमुक्तम्। तत्र तयोः साम्यमेव किं नेत्याह- **तदपेक्षयेति**॥ जगद्विषय इति शेषः। नन्वेवं लक्ष्मीज्ञानं जगद्विषये ईशज्ञानापेक्षयाऽस्पष्टमित्युक्ते लक्ष्मीज्ञानं जगति किञ्चित्पदार्थाविषयकारीति प्राप्तम्। ज्ञाने स्पष्टत्वस्य विषयोपाधिकत्वात्। तथाचान्यत्र सर्वविषयकमित्युक्त-व्याघात इत्यत आह- **स्पष्टत्वं चेति**॥ अपरोक्षेऽपि विषये शब्दादिना परोक्ष-ज्ञानोदयेन नापरोक्षत्वं विषयोपाधिकमिति भावः॥

योगिज्ञानत्रैविध्यम्

योगप्रभावलब्धातिशयं योगिज्ञानम्। तत् त्रिविधम्। ऋजुयोगि-ज्ञानं तात्त्विकयोगिज्ञानमतात्त्विकयोगिज्ञानं चेति। ऋजवो नाम

ब्रह्मत्वयोग्या जीवाः । ईश्वरादन्यत्रालोचने सर्वविषयं तज्ज्ञानम् । ईश्वरे त्वसार्वत्रिकमेव । तद् द्विविधम् । स्वरूपं मनोवृत्तिरूपं चेति । तत्र स्वरूपमनादिनित्यम् । योगप्रभावादामुक्तेः व्यक्त्यतिशयोपेतम् । मुक्तावेकप्रकारम् । वृत्तिज्ञानं तु प्रवाहतोऽनादि । योगानुगृहीतप्रत्यक्षादिजन्यम् । मुक्तौ तु नास्त्येव । द्वयमपि नियमेन यथार्थम् । ईश्वरे त्वन्यजीवेभ्योऽधिकविषयम् ।

तदतिरिक्तास्तत्त्वाभिमानिनो देवास्तात्त्विकाः । अनादित्वे सतीश्वरादन्यत्रालोचनेऽप्यसर्वविषयं तज्ज्ञानम् । तदपि स्वरूपं बाह्यं चेति द्विविधम् । तस्यानादित्वं पूर्ववत् । स्वरूपं यथार्थमेव । बाह्यं कदाचिदयथार्थमपि । तद्व्यतिरिक्ता देवादयो योगिनोऽतात्त्विकाः। सादित्वे सतीश्वरादन्यत्राल्पाज्ञानयुक्तं तज्ज्ञानम् । तदपि पूर्ववद् द्विविधम् । तत्र स्वरूपस्य सादित्वं व्यक्त्यपेक्षया । अन्यस्य प्रवाहोत्पत्त्यपेक्षया । याथार्थ्यनियमादि पूर्ववत् ॥

(राघ.) योगेति ॥ समाधिपरिपाको योगः । समाधिपरिपाकवन्तो योगिन इति तत्त्वनिर्णयटीकोक्तेः । तत्सामर्थ्यलब्धोत्कर्षमित्यर्थः । ऋजुयोगीति कर्मधारयः । एवमग्रेऽपि । **तात्त्विकेति** । महदहङ्कारादितत्त्वानामभिमानिनस्तात्त्विकाः ।

‘ब्रह्मत्वयोग्या ऋजवो नाम देवाः पृथग्गणाः ।’

इति भारततात्पर्यनिर्णयोक्तेराह- **ऋजवो नामेति** ॥ असम्भवनिरासायेश्वरादन्यत्रेति । लक्ष्मीज्ञानेऽनतिव्याप्तये आलोचन इति । **तज्ज्ञानं** ऋजुयोगिज्ञानम् । असार्वत्रिकमेवेत्येवकारेणालोचनेऽपीति वा विवादाभावं वा सूचयति । **मनोवृत्तीति** ॥ मनःपरिणामरूपम् । **आ मुक्तेरिति** ॥ आकडारादि-

त्यादाविव भिन्नं पदम् । व्यक्त्यतिशयो नामाधिकाधिकभगवद्गुणकर्मादि-विषयकत्वम् । **एकप्रकारं** वृद्धिक्षयापेतम् । **प्रत्यक्षादीति** ॥ अनुमानागमावादि-पदार्थः । **नास्त्येवेति** ॥ मनस एवाभावादिति भावः । **द्वयमपीति** ॥ ऋजुयोगिनां ज्ञानद्वयमित्यर्थः । **तदतिरिक्ता इति** ॥ लक्ष्मीऋजुयोगिव्यतिरिक्ताः । तेषामपि तत्त्वाभिमानित्वात् तद्व्यतिरिक्ता इत्युक्तिः । असुरव्यावृत्तये देवा इति । तज्ज्ञानं लक्षयति- **अनादित्व इति** ॥ **तज्ज्ञानं** तात्त्विकयोगिज्ञानम् । ऋजुज्ञानव्यावृत्तये ईशादन्यत्रेति । अयोगिज्ञानव्यावृत्तयेऽनादित्वे सतीति । **बाह्यं चेति** ॥ मनोवृत्तिरूपं चेत्यर्थः । **पूर्ववदिति** ॥ ऋजुयोगिज्ञानवत् स्वरूपज्ञानं स्वरूपतोऽनादि । वृत्तिज्ञानं तु प्रवाहत इति ज्ञेयमित्यर्थः । **तद्व्यतिरिक्ता** ऋजुतात्त्विकव्यतिरिक्ता देवर्ष्यादय इत्यर्थः । ऋजुतात्त्विकव्यावृत्तये एतद्विशेषणम् । अयोगिव्यावृत्तये योगिन इति विशेषणम् । **अल्पाज्ञानयुक्तमिति** ॥ तज्ज्ञानमिति शेषः । ज्ञानं यावद् विषयीकरोति ततो न्यूनविषयकाज्ञानयुक्तमित्यर्थः । ऋजुतात्त्विकज्ञानव्यावृत्तये सत्यन्तम् । अयोगिज्ञानव्यावृत्तयेऽल्पाज्ञानयुक्तमिति । असम्भवनिवृत्तये ईशादन्यत्रेति । **पूर्ववदिति** ॥ स्वरूपं बाह्यं चेति द्विविधमित्यर्थः । स्वरूपज्ञाने सादित्वं घटयति- **तत्रेति** ॥ तयोर्मध्य इत्यर्थः । **व्यक्तिः** अर्थविषयीकरणम् । तस्यानादितः सर्वजीवसाधारण्येन स्वयोग्यात्ममनस्तद्धर्मादिविषयीकरणसत्त्वेऽप्ययोग्यविषये योगप्रभावाधीना व्यक्तिः कदाचिदस्तीति भावः । **अन्यस्य** बाह्यस्य । एतेन ऋजुतात्त्विकवृत्तिज्ञानवैलक्षण्यं दर्शितम् । **पूर्ववदिति** ॥ स्वरूपज्ञानं यथार्थमेव वृत्तिज्ञानं तु कदाचिदयथार्थमपीति ध्येयमित्यर्थः । आदिपदेनायथार्थग्रहः ॥

(वेदे.) योगिज्ञानसामान्यलक्षणमाह- **योगेति** ॥ **अतिशयो** वहुविषयत्वलक्षणः । अत्रैतादृशातिशययोग्यत्वमेव लक्षणं विवक्षितमतः कदाचिदबहुविषयकतदीयज्ञाने नाव्याप्तिरिति ध्येयम् । तद् विभज्योद्दिशति - **तत् त्रिविध-**

मित्यादिना ॥ के ते ऋजव इत्यत आह- **ऋजव इति** ॥ **ब्रह्मत्वयोग्या** ब्रह्मपदयोग्याः । तेन ब्रह्माण्या अपि सङ्ग्रहः । बाह्यं कदाचिदयथार्थमपीति वक्ष्यमाणत्वेन तात्त्विकेष्वन्तर्भावायोगात् । तज्ज्ञानं लक्षयति- **ईश्वरादिति** ॥ असम्भवनिरासायेशादन्यत्रेत्युक्तम् । अनालोचन इतीशलक्ष्मीज्ञाननिरासः । सर्वग्रहणमस्मदादिज्ञानव्युदासार्थम् । **सर्वविषयं** सर्वविषयत्वयोग्यमित्यर्थः । तेनानालोचनदशायां तज्ज्ञाने नाव्याप्तिः । तस्यापि आलोचनलक्षणसहकारि-सम्भवेन सर्वविषयकत्वसम्भवेन तत्र तद्योग्यतायाः सत्त्वात् । एतेन मुक्त्यव-स्थापन्नर्जुज्ञानेऽनालोचनेऽपि सर्वविषयेऽव्याप्तिरिति निरस्तम् । तस्यापि पूर्वमालोचने सर्वविषयकत्वेन तत्रापि तद्योग्यताया अक्षतेः । नन्वीश्वरा-दन्यत्रेवेश्वरेऽपि यद्यालोचने सर्वविषयं तर्हि व्यर्थमीश्वरादन्यत्र ग्रहणमित्यत आह- **ईश्वरे त्विति** ॥ अस्यानादिनित्यत्वे विशेषं वक्तुं तद्विभागमाह- **तद् द्विविध-मिति** ॥ यत् स्वरूपज्ञानमनादिनित्यं न तर्हि तद्योगिनां, योगजं हि योगिज्ञान-मित्यत आह- **योगेति** ॥ मुक्तावपि व्यक्त्यतिशयोपेतत्वे परिमितं न स्यादित्यत आह- **आ मुक्तेरिति** ॥ आङ् मर्यादायाम् । अभिवृद्धनदीपूरवत् पुनर्ह्रासो भवति किं नेत्यत आह- **मुक्ताविति** ॥ प्रवाहत इत्युक्त्या स्वरूपोत्पत्तिरनुज्ञायते । तत् केनेत्यत आह- **योगेति** ॥ आदिपदेनानुमानागमपरिग्रहः ।

अनेनैतदपि निरस्तम् । यत् केनचिदुक्तमृजूनां ज्ञानं प्रात्यक्षिकमेव न परोक्ष-मिति । आदिपदेनानुमानागमजन्यत्वस्य स्पष्टं प्रतीयमानत्वेन आकरविरुद्ध-त्वात् । स्वरूपज्ञानवदिदमपि प्रवाहतः किं नेत्यत आह- **मुक्तौ त्विति** ॥ तात्त्विकादिज्ञानवदिदमृजुयोगिज्ञानं किं कदाचिदयथार्थमपि भवति नेत्याह- **ईश्वरेऽपीति** ॥ तात्त्विकज्ञानं लक्षयितुं तावत् तेषां लक्षणमाह- **तद्व्यतिरिक्ता इति** ॥ ऋजुव्यावृत्त्यर्थमेतत् । असुरव्यावृत्त्यर्थं देवा इति । अतात्त्विकव्यावृत्त्यर्थं तत्त्वाभिमानिन इति । तज्ज्ञानं लक्षयति- **अनादित्वे सतीति** ॥ अनादित्वेना-

तात्त्विकयोगिज्ञाननिरासः। **ईश्वररादन्यत्रेति**॥ ईश्वरविषये आलोचनेऽपि असर्व-विषयलक्ष्मीज्ञानादिनिरासः। ऋजुज्ञाननिरासायालोचनेऽपीति। **पूर्ववदिति**। स्वरूपस्य व्यक्त्यपेक्षया मनोवृत्तिरूपस्य प्रवाहेणेत्यर्थः। ऋजुतात्त्विकव्यतिरिक्ता योगिनोऽतात्त्विका इत्येव लक्षणम्। के ते इत्यत उक्तम्- **देवादय इति**॥ आदिपदेन ऋषिगन्धर्वादिग्रहणम्। तज्ज्ञानं लक्षयति- **सादित्वे सतीति**॥ तात्त्विक-ज्ञानव्यावृत्त्यर्थं सत्यन्तम्। ईशादन्यत्रेत्यसम्भवनिरासार्थमल्पाज्ञानयुक्त-मित्ययोगिज्ञाननिरासः। **व्यक्त्यपेक्षयेति**॥ अनादितोऽनभिव्यक्तमेव स्वरूपं वैदिकेश्वरादिविषये कदाचिदभिव्यज्यत इत्यर्थः। **प्रवाहोत्पत्तीति**॥ वैदिके-श्वरादिविषये वृत्तिप्रवाहोऽनादिकालेऽनुत्पन्नः कदाचिदुत्पद्यत इत्यर्थः। एवञ्च ऋजुतात्विकस्वरूपज्ञानेऽपि व्यक्तेः साम्याद् वृत्तिज्ञानसादित्वस्य चात्रेव तत्रापि विद्यमानत्वेन कथं तात्त्विकातात्त्विकयोगिज्ञानयोरनादित्वसादित्वकथनमिति चोद्यानवकाशः। वैदिकेश्वरविषये तात्त्विकस्वरूपव्यक्तिवृत्तिप्रवाहयोरिदं-प्रथमताभावेनादित्वमतात्त्विकस्वरूपज्ञानव्यक्तिवृत्तिप्रवाहयोरिदंप्रथमतया कादाचित्कत्वादेवोत्पन्नत्वस्य विवक्षितत्वात्। केचित्तु; योगानुग्रहांशेऽ-नादित्वसादित्वे विवक्षिते। तथाच सात्त्विकस्वरूपज्ञानवृत्तिप्रवाहयोरनादित एव योगप्रभावलब्धातिशयत्वमतात्त्विकस्वरूपज्ञानवृत्तिप्रवाहयोर्योगप्रभाव-लब्धातिशयत्वं तु कदाचिज्जायतेऽत इदं वैलक्षण्यं युक्तमित्याहुः॥

अयोगित्रैविध्यम्

तद्व्यतिरिक्ता जीवा अयोगिनः। ईश्वरादन्यत्राज्ञानप्रचुरं तज्ज्ञानम्। तदपि पूर्वद् द्विविधम्। उत्पत्तिविनाशवच्च। अयोगिनोऽपि त्रिविधाः। मुक्तियोग्या नित्यसंसारिणस्तमोयोग्याश्चेति। तत्र मुक्ति-योग्यानां स्वरूपज्ञानं यथार्थमेव। नित्यसंसारिणां तु मिश्रम्। अन्येषामयथार्थमेव। वाह्यं तु त्रयाणामप्युभयविधमिति॥

(राघ.) **तद्व्यतिरिक्ता** योगिव्यतिरिक्ता जीवा इत्यर्थः। जीवपदं लक्ष्मीशयोर्व्यावृत्तये। घटादिजडव्यावृत्तये वा। तज्ज्ञानमयोगिज्ञानम्। ज्ञानविषयादधिकविषयकाज्ञानयुक्तमित्यर्थः। ईश्वरविषयकाज्ञानयुक्तमित्यर्थः। ईश्वरविषयेऽज्ञानप्रचुरयोगिज्ञानव्यावृत्त्यर्थमीशादन्यत्रेत्युक्तिः। **पूर्ववद् द्विविधमिति**॥ स्वरूपं बाह्यश्चेति द्विविधमित्यर्थः। **उत्पत्तीति**॥ स्वरूपस्य व्यक्त्यपेक्षया, बाह्यस्य प्रवाहत इति ध्येयम्। अयोगिज्ञाने याथार्थ्यनियमादि विवेक्तुं तद्विभागमाह- **अयोगिनोऽपीति** ॥ न केवलं योगिन इत्यपेरर्थः। चशब्दानन्तरमितिशब्दो ध्येयः। इतिशब्दः स्वोक्तज्ञानविभागादिसमाप्तौ। केवलप्रमाणोक्तिसमाप्तौ वा।

(वेदे.) **तद्व्यतिरिक्ता इति**॥ योगिव्यतिरिक्ता इत्यर्थः। ईशलक्ष्मीनिरासाय जीवा इत्युक्तम्। योगिनिरासाय तद्व्यतिरिक्ता इत्युक्तम्। **ईश्वरादिति**॥ योगिज्ञाननिरासायेश्वरादन्यत्रेति। अज्ञानप्रचुरमेवेत्यन्तमल्पविषयमित्यर्थः। **उत्पत्तिविनाशवदिति**॥ स्वरूपज्ञानस्याभिव्यक्त्यपेक्षयोत्पत्तिविनाशवत्त्वं वृत्तिज्ञानस्य च प्रवाहापेक्षयेति द्रष्टव्यम्। सर्वेष्वयोगिज्ञानेषु याथार्थ्यादिनियमाद् एकप्रकारमिति वक्तुं तावदयोगिविभागमाह- **अयोगिन इति**॥ **अन्येषामयथार्थमेवेति**॥ प्रकारांश इत्यर्थः। उभयविधं यथार्थमयथार्थं चेत्यर्थः। अत्र यावदयथार्थमानमुक्तं तावत् केवलप्रमाणलक्षणगतयथार्थपदव्यावर्त्यप्रदर्शनाय वेति ज्ञातव्यम्। अतः केवलप्रमाणविभागकथनावसरेऽयथार्थमानप्रदर्शनमसङ्गतमिति नाशङ्कनीयम्॥

परोक्तचातुर्विध्यस्यायुक्तता

इन्द्रियजं लिङ्गजं स्मृतिरार्षं चेति चतुर्विधं यथार्थज्ञानमिति वैशेषिकाः। तदसत्। नित्यस्यागमजन्यस्य चासङ्ग्रहात्। स्मृतेरिन्द्रियजत्वेनार्षस्य योगिज्ञानत्वेन च पृथग्ग्रहणायोगाच्च॥

(राघ.) **आर्षमिति** ।। योगजधर्मप्रत्यासत्तिजमित्यर्थः । **आगमजन्यस्य चेति** ।। आगमोऽनुमान एवान्तर्भवतीत्येतन्निराकरिष्यत इति भावः । **पृथग्-ग्रहणायोगादिति** ।। स्मृत्यार्षयोरिति योज्यम् । तयोरपीन्द्रियजमित्युक्त्यैव ग्रहणसम्भवादिति भावः । योगिज्ञानत्वेनेत्युक्त्या स्वकृतविभागस्य न्यूनताऽपि प्रत्युक्ता ।।

(वेदे.) एवं स्वयं यथार्थज्ञानचातुर्विध्यमुक्त्वा परोक्तं चातुर्विध्यं दूषयितुमनुवदति- **इन्द्रियजमिति** ।। **नित्यस्येति** ।। नित्येश्वरज्ञानस्य त्वयाऽभ्युपगतत्वेनागमजन्यज्ञानस्य च त्वया लिङ्गजन्यत्वाभ्युपगमेऽपि तदयोग्यत्वस्य वक्ष्यमाणत्वेन पार्थक्यादत्र तदुभयासङ्ग्रह इति भावः । **स्मृतेरिन्द्रियजन्यत्वेति** ।। वक्ष्यमाणरीत्येति भावः । **आर्षस्य चेति** ।। इन्द्रियजन्यत्वेनेति सम्बन्धः । कथमार्षस्येन्द्रियजन्यत्वमित्यत उक्तम्- **योगिज्ञानत्वेति** । तथाचार्षस्य योगिज्ञानान्तर्भावसम्भवेन योगिज्ञानस्य चेन्द्रियजन्यज्ञानप्रभेदत्वेन त्वयोक्तत्वात् । इन्द्रियजमित्यनेनैवास्यापि ग्रहे पुनरार्षशब्देन तद्ग्रहणानुपपत्तिरिति भावः। नचार्षस्य तपःप्रभावजन्यस्य न योगप्रभावजन्ययोगिज्ञानत्वम् । येन तस्योक्तरीत्येन्द्रियजन्यज्ञानान्तर्भाव इति वाच्यम् । तयोर्विप्रकृष्टार्थविषयकप्रत्यक्षत्वाविशेषे तपोयोगप्रभावरूपकारणविशेषजन्यत्वेन पृथक्करणासम्भवात् । अन्यथा चाक्षुषादिज्ञानानामपि तत्तत्सन्निकर्षरूपविशेषकारणजन्यत्वेन प्रत्यक्षबहिर्भावप्रसङ्ग इत्यवधेयम् ।।

अनुप्रमाणलक्षणम्

यथार्थज्ञानसाधनमनुप्रमाणम् । यथार्थमित्येवोक्ते केवलेऽतिव्याप्तिः। ज्ञानमित्येवोक्ते तत्र, संशयादौ च । प्रत्यक्षेऽव्याप्तिश्च । साधनमित्येवोक्ते कुठारादावतिव्याप्तिः । यथार्थज्ञानमित्युक्ते

केवलेऽतिव्याप्तिः । प्रत्यक्षेऽव्याप्तिश्च । यथार्थसाधनमित्युक्ते प्रत्यक्षसाधनेऽतिव्याप्तिः । ज्ञानसाधनमित्युक्ते संशयादिसाधनेऽतिव्याप्तिः। यथार्थज्ञानकारणमित्युक्ते प्रमात्रादावतिव्याप्तिरिति सर्वं सार्थकम् । यज्जातीयानन्तरं नियमेन कार्योत्पत्तिस्तदत्र साधनं विवक्षितम् । अतो न यादृच्छिकसंवादिष्वतिव्याप्तिः ॥

(राघ.) क्रमप्राप्तमनुप्रमाणं लक्षयति- **यथार्थेति** ॥ यथावस्थितज्ञेयविषयीकारिज्ञानसाधनमित्यर्थः । पदानां कृत्यानि स्वयमेवाह- यथार्थमित्यादिना सर्वं सार्थकमित्यन्तेन । **तत्र** केवलसंशयादौ विपर्यये चेत्यर्थः । अतिव्याप्तिरित्यनुषङ्गः । **प्रत्यक्षसाधन इति** ॥ यथावस्थितज्ञेयविषयीकारिचक्षुरादीन्द्रियं भवतीति तत्साधने तज्जनकेऽतिव्याप्तिरित्यर्थः । प्रमात्रादीत्यादिपदेन प्रमेयग्रहः । तात्पर्यं प्राग्वत् । तावता कुतः प्रमात्रादिव्यावृत्तिरित्यतः साधनपदस्यातिशयितकारणत्वार्थत्वादिति भावेनाह- **यज्जातीयेति** ॥ यद्वा यादृच्छिकसंवादिषु प्रत्यक्षादिषु यथार्थज्ञानसाधनत्वमस्तीति विशिष्टलक्षणस्याप्यतिव्याप्तिमाशङ्क्याह- **यज्जातीयेति** ॥ तादृशं च विषयसन्निकृष्टनिर्दोषकरणजातीयमेव । न यादृच्छिकसंवादादिजातीयमिति भावः ॥

(वेदे.) अनुप्रमाणलक्षणप्रविष्टपदार्थानां प्रत्येकलक्षणत्वानुपपत्तिं क्रमेण दर्शयति- **यथार्थमित्यादिना** ॥ द्वयोर्द्वयोर्लक्षणत्वेऽनुपपत्तिमाह- **यथार्थज्ञानमिति** ॥ **प्रत्यक्षसाधन इति** ॥ चक्षुराद्यवयवरूप इत्यर्थः। अतिशयितं कारणं साधनमिह विवक्षितम् । तत्र किमतिशयितत्वविवक्षयेत्यत आह- **यथार्थज्ञानकारणमिति** ॥ **यज्जातीयानन्तरमिति** ॥ नन्वेवमपि ज्ञातज्ञापकवाक्यादिष्वतिव्याप्तिः । तेषामपि नियमेन यथार्थज्ञानसाधानत्वात् । आगमबहिर्भावस्य वक्ष्यमाणत्वेनालक्ष्यत्वाच्चेति चेत् । उच्यते । यादृच्छिकसंवादिलिङ्गविभ्रमातिव्याप्त्यभिप्रायेणैवं विवक्षा कृता । वस्तुतस्तु यथार्थपदमहिम्ना निर्दोषमिति साधन-

विशेषणमिह लक्ष्यते । तथाच निर्दोषं ज्ञानसाधनमनुप्रमाणमित्येवार्थो विवक्षितः । एवञ्च न यादृच्छिकसंवादिलिङ्गविभ्रमादिषु न वा ज्ञातज्ञापकवाक्यादिष्वतिव्याप्तिः । तेषां लिङ्गविभ्रमत्वज्ञातज्ञापकत्वादिदोषयुक्तत्वात् । अत एव सुधायामनेनैवास्वारस्येन यद्वेत्यादिनाऽयमपि पक्ष उक्तः । प्रमाणसामान्यलक्षणेऽपि निर्दोषत्वविशेषणस्य विवक्षितत्वान्न तस्याप्यत्रातिव्याप्तिरिति भावः।

द्विविधं प्रमाणमित्युक्तविभागे आक्षेपसमाधाने

ननु त्रिविधं प्रमाणमिति वक्तव्यम् । ल्युटोऽधिकरणेऽप्यनुशासनात् । सत्यम् । तथाऽपि प्रमाणशब्दस्याधिकरणे प्रयोगाभावात् तदसङ्ग्रहः । तथाऽपि प्रमाणशब्दो भावसाधनः करणसाधनश्चेत्यनेकार्थः । तत्र किमनुगतलक्षणकथनेनेति । उच्यते; नायमक्षादिशब्दवदत्यन्तभिन्नार्थः । किन्तु धात्वर्थानुगमस्तूभयत्र सम इत्येकार्थत्वमाश्रित्यानुगतलक्षणोक्तिरित्यदोषः ॥

(राघ.) द्विविधं प्रमाणमिति प्रागुक्तविभागमाक्षिपति- **नन्विति** ॥ केवलप्रमाणमनुप्रमाणमधिकरणप्रमाणमिति वक्तव्यमित्यर्थः । कुत इत्यत आह- **ल्युट इति** ॥ 'ल्युट् च भावे करणाधिकरणयोश्च' इति भावकरणयोरिवाधिकरणेऽप्यनुशासनादित्यर्थः । अधिकरणं ह्याधारोऽधिकरणमिति सूत्रोक्तदिशा कर्तृकर्मणोराधारक्रियां प्रति य आश्रयस्तदुच्यते । न प्रमारूपक्रियाश्रयम् । तादृशाधिकरणे च प्रमाणपदस्य क्वाप्यप्रयोगान्न प्रमाणशब्देनाधिकरणार्थो ग्राह्य इत्याह- **प्रमाणशब्दस्येति** ॥ यद्वा क्रियाश्रयोऽधिकरणमिति भावेन शङ्कायामभ्युपगमवादेनाह- **प्रमाणशब्दस्येति** ॥ विप्राः प्रमाणमित्यादिस्तु तद्वाक्यस्य तज्ज्ञानस्य वा प्रामाण्याभिप्रायेणौपचारिकः प्रयोगः । नचैवमधिकरणे ल्युडनुशासनवैयर्थ्यमिति शंक्यम् । धात्वन्तरेऽवकाशसम्भवादिति भावः । **तथाऽ-**

पीति ॥ द्वैविध्येनैव विभागोपपत्तावपीत्यर्थः । **भावसाधन इति ॥** भावो नाम 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इत्युक्त्या केवलो धात्वर्थः । स एव साधनं यस्य शब्दस्य प्रत्ययोत्पत्तौ स भावसाधनः । एवं करणसाधन इत्यपि बोध्यम् । **धात्वर्थेति ॥** माङ् मान इति धातोरर्थस्य मितेर्यथार्थज्ञाने तत्साधने च 'मितिरियम्' इति 'मितिसाधनमिदम्' इति केवलानुप्रमाणयोरनुगतिरस्तीत्येतावन्मात्रेणैकार्थत्वं प्रमाणपदस्याश्रित्यानुगतलक्षणोक्तिः । यदाऽनुप्रमाणे मितिसाधनमित्येवं मितिघटितत्वेन विना क्रियासाधनं छिदासाधनं गतिसाधनमित्यादिरूपेण निरूपणं स्यात् तदा प्रमाणपदस्य केवले मितित्वेन निरूपणमनुप्रमाणे च माधात्वर्थासंस्पर्शेनैव निरूपणमस्तीत्यत्यन्तभिन्नार्थत्वात् भावकरणयोरनुगतिर्न कर्तव्या स्यात् । नचैवमस्तीति भावः ।

(वेदे.) भावकरणयोरिवाधिकरणेऽपि करणाधिकरणयोश्चेति ल्युटोऽनुशासनविशेषाद् द्विविधमिति विभागोऽनुपपन्न इत्याशङ्कते- **नन्विति ॥ प्रयोगाभावादिति ॥** नन्वस्त्यधिकरणेऽपि विप्राः प्रमाणमिति प्रयोगः । मैवम् । विप्राणां प्रमायां स्वातन्त्र्येण कर्तॄणामधिकरणत्वाभावात् । नहि क्रियाधारोऽधिकरणम् । किं नाम कर्तृकरणयोः क्रियाश्रययोः धारणक्रियां प्रति यदाधारस्तदधिकरणम् । तस्मात् तदीयस्य विज्ञानस्य वाक्यस्य वा प्रामाण्याद् विप्राः प्रमाणमित्युपचर्यते । अतो नायमधिकरणे प्रयोग इति भावः । **भावसाधन इति ॥** भावं साधयतीति भावसाधनः । भावव्युत्पन्न इति यावत् । एवमग्रेऽपि द्रष्टव्यम् । **किमनुगतेनेति ॥** न ह्यक्षादिशब्दार्था यावन्तस्तावदनुगतत्वं लक्षणं परीक्षकैरुच्यत इति भावः । ननु भावकरणरूपार्थभेदात् कथं प्रमाणशब्दो न भिन्नार्थ इत्यत उक्तमत्यन्तेति । सर्वत्रानुगतैकधात्वर्थशून्यविजातीयार्थ इत्यर्थः ।

अयं भावः । सत्यमनेकार्थकशब्दवाच्यानां नैकलक्षणमुच्यत इति । प्रमाणशब्दस्तु नात्यन्तमनेकार्थः । तद्वाच्ययोर्भावकरणयोरनेकत्वेऽपि

तदुभयत्रैकमाङ्धात्वर्थानुगमेनैकत्वस्यापि सम्भवेनैकार्थत्वात् । नह्यक्षादिशब्दवाच्येषु वेदने करणेन्द्रियादिष्वर्थेष्वेकधात्वर्थानुगमोऽस्ति। येन तेऽप्येकार्थाः स्युः । तथाचात्रानुगतार्थलक्षणोक्तिर्युक्तेति । अन्ये तु नियमेन प्रमाणपदजन्यप्रतीतिविषययथावस्थितार्थविषयकत्वेन प्रमातत्साधनोभयसाधारणेनोभयत्र प्रमाणपदप्रयोगोपपत्तौ ज्ञानत्वसाधनत्वप्रवेशेनोभयप्रवृत्तिनिमित्तकत्वकल्पनायां गौरवात्, अक्षादिशब्देनेव किञ्चिदुभयसाधारणं तत्पदजन्यप्रतीतिविषयोऽस्तीत्यर्थ इत्याहुः। अत्र धात्वर्थानुगमस्त्वित्यादिग्रन्थस्वारस्यं कथमिति चिन्त्यम्॥

अनुप्रमाणविभागः

त्रिविधमनुप्रमाणम् । प्रत्यक्षमनुमानमागमश्चेति । तत्र निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् । अर्थशब्देनेन्द्रियविषया गृह्यन्ते । तेषां दोषाः अतिदूरत्वमतिसामीप्यं सौक्ष्म्यं व्यवधानं समानद्रव्याभिघातोऽनभिव्यक्तत्वं सादृश्यं चेत्यादयः । तेषु सत्सु क्वचिज्ज्ञानमेव न जायते । क्वचिद् विपरीतज्ञानमुत्पद्यते ॥

(राघ.) सर्वतः प्राबल्यात् प्रत्यक्षस्य पूर्वं निर्देशः। तदुपजीविनोऽनुमानस्य पश्चात् निर्देशः। अवशिष्टस्यागमस्यान्ते निर्देशः। क्वचिदनुमानस्यागममूलत्वेऽपि प्रायेण प्रत्यक्षोपजीवित्वादन्ततः प्रत्यक्षमूलत्वाच्च प्रत्यक्षानन्तरमनुमानस्य निर्देशो युक्त इति ज्ञेयम्। तत्र तेषु मध्ये। **निर्दोषेति**॥ अर्थाश्चेन्द्रियाणि चार्थेन्द्रियाणि। निर्दोषाणामर्थानां निर्दोषाणामिन्द्रियाणां च सन्निकर्षः। समुदायाशयमेकवचनम्। स प्रत्यक्षमुच्यत इत्यर्थः। पदानां कृत्यानि स्वयमेव वक्ष्यति। अर्थपदस्यानेकार्थत्वादत्राभिमतमर्थमाह- **अर्थशब्देनेति** ॥ अन्यथाऽऽकाशादिना चक्षुरादेः सन्निकर्षेऽतिव्याप्त्यापत्तेरिति भावः। **समानद्रव्याभिघात**

इति ॥ क्षीरनीरादाविव सदृशद्रव्यान्तरमेलनमित्यर्थः । अनभिव्यक्तत्वमन्धकाराद्यावृतत्वम् । **सादृश्यं** द्रव्यान्तरेण सादृश्यमित्यर्थः । आदिपदेनालातभ्रमणप्रबलद्रव्याभिभवादिग्रहः । कथमेषां दोषतेत्यत आह- **तेषु सत्स्विति** ॥ एतेषामन्यतमे सतीत्यर्थः ॥

(वेदे.) अनुप्रमाणविभागमाह- **त्रिविधमिति** ॥ न्यूनाधिकसङ्ख्यान्यतमान्तर्भावाभावज्ञापनार्थोऽयं विभागः । करणत्रैविध्यकथनेन तत्फलरूपकेवलप्रमाणत्रैविध्यमप्यनुमतमिति द्रष्टव्यम् । प्रायेणासन्नाव्यवहितवर्तमानकतिपयार्थग्राहकं प्रत्यक्षम्, अनासन्नातीतानागतव्यवहितार्थगोचरमनुमानम्, स्वातन्त्र्येणाशेषार्थविषय आगम इत्यर्थग्रहणक्रमेणोद्दिशति- **प्रत्यक्षमिति** ॥ अर्थं प्रति स्थितमक्षं प्रत्यक्षम्, प्रमाणान्तरानुसारेणैव अर्थप्रमापकमनुमानम्, सम्यगतीन्द्रियार्थावगमक आगम इति सञ्ज्ञानिरुक्त्यैव लक्षणसिद्धौ प्रत्यक्षे तस्यैवार्थस्य स्पष्टीकरणार्थमनुमानादौ शृङ्गिग्राहकतया तज्ज्ञानार्थं पुनर्लक्षणारम्भः । तत्र प्रत्यक्षलक्षणमाह- **निर्दोषेति** ॥ निर्दोषत्वमर्थेन्द्रिययोर्विशेषणम् । तत्कृत्यं चाग्रे स्वयमेव विभावयिष्यति । चक्षुराकाशसन्निकर्षेऽतिव्याप्तेराह- **अर्थशब्देनेति** ॥ अतिदूरत्वं मेर्वादौ । अतिसामीप्यं चक्षुःपक्ष्मादौ । सौक्ष्म्यं किञ्चिद्दूरस्थकेशादौ । व्यवहितत्वं कुड्यादिव्यवहितघटे । समानाभिघातो बलवत्सजातीयसम्बन्धः क्षीरनीरादौ । अनभिव्यक्तत्वं स्वाभिव्यञ्जकराहित्यमन्धकारस्थघटादौ । रजतादिना चाकचक्यादिसादृश्यं शुक्त्यादौ च दोषत्वेन प्रसिद्धमिति द्रष्टव्यम् । आदिपदेन प्रतिबद्धत्वं गृह्यते । मणिमन्त्रादिदशायां त्वक्स्पृष्टेऽपि वह्नावौष्ण्यानुपलम्भात् । नन्वेतेषां दोषत्वं न ज्ञानाजनकत्वम् । सादृश्यादौ विपरीतज्ञानजनकेऽव्याप्त्यापत्तेः । नापि विपरीतज्ञानजनकत्वम् । ज्ञानाजनकेऽतिदूरत्वादावव्याप्त्यापत्तेरित्यत आह- **तेष्विति** ॥ तथाच प्रमाप्रतिबन्धकत्वमेव दोषत्वम् । तत्प्रतिबन्धकत्वं च द्वेधा तदजनकत्वेन तद्विपरीतकार्यजनकत्वेनेत्युक्तं भवति ॥

साक्षीन्द्रियनिरूपणम्

इन्द्रियशब्देन ज्ञानेन्द्रियं गृह्यते । तद् द्विविधम् । प्रमातृस्वरूपं प्राकृतं चेति । तत्र स्वरूपेन्द्रियं साक्षीत्युच्यते । तस्य विषया आत्मस्वरूपं तद्धर्मा अविद्या मनस्तद्वृत्तयो बाह्येन्द्रियज्ञानसुखाद्याः कालोऽव्याकृताकाशश्चेत्याद्याः । स च स्वरूपज्ञानमभिव्यनक्ति ॥

(राघ.) कर्मेन्द्रियेष्वपि वाक्पाणिपादपायूपस्थेष्विन्द्रियशब्दप्रवृत्तेराह- **इन्द्रियशब्देनेति** ॥ जात्येकवचनम् । तत्तद्विषयेण तत्तदिन्द्रियस्य सन्निकर्षः प्रत्यक्षमित्यर्थसिद्धये इन्द्रियावान्तरभेदं तद्विषयांश्च विवेचयति- तद्द्विविधमित्यादिना मनोवृत्तिज्ञानं त्वित्यन्तेन । प्राधान्यक्रमेण निर्दिशति- **प्रमात्रिति** ॥ प्रकृतिपरिणामाहङ्कारपञ्चमहाभूतांशैरुपचितं प्राकृतमित्युच्यते । **बाह्येन्द्रियज्ञानसुखाद्या इति** ॥ आद्यपदेनेच्छाप्रयत्नग्रहः । इत्याद्या इति कालविशेषाणां प्राच्यादिदेशविशेषाणां प्रामाण्याप्रामाण्यादेर्ग्रहः । साक्षिणो यथार्थज्ञानसाधनत्वेनानुप्रमाणान्तर्भावः कथमित्यत आह- **स चेति** ॥ आत्मस्वरूपज्ञानव्यक्तिहेतुतया साक्षिणो यथार्थज्ञानसाधनत्वेनानुप्रमाणान्तर्भेदभिन्नप्रत्यक्षान्तर्भावो युक्त इति भावः ॥

(वेदे.) एवं प्रत्यक्षलक्षणप्रविष्टमर्थं तद्दोषांश्च निरूप्येदानीं तत्प्रविष्टमिन्द्रियं सपरिकरं तद्दोषांश्च निरूपयिष्यन् वागादिकर्मेन्द्रियार्थसंसर्गेऽतिव्याप्तिपरिहाराय तावदत्र विवक्षितमिन्द्रियशब्दार्थमाह- **इन्द्रियशब्देनेति** ॥ ज्ञानसाधनमिन्द्रियं ज्ञानेन्द्रियम् । तत्फलमाह- **स चेति** ॥

प्राकृतेन्द्रियाणि तद्विषयाश्च

प्राकृतं षड्विधम् । घ्राणरसनचक्षुस्त्वक्श्रोत्रमनोभेदात् । तत्र गन्धस्तद्विशेषाश्च घ्राणस्य विषयाः । रसस्तद्विशेषाश्च रसनस्य ।

महान्ति रूपवन्ति द्रव्याणि केचिद्गुणाः कर्माणि जातयश्च चक्षुस्त्वचोः । वायुस्पर्शोऽपि त्वचो विषयः । शब्दः श्रोत्रस्य । एतेषां पञ्चानां मनोऽनधिष्ठितत्वं काचकामलादयश्च दोषाः । मनसस्तु बाह्येन्द्रियाधिष्ठानेनैते सर्वे विषयाः । स्वातन्त्र्येण स्मरणसाधनं मनः। तस्य दोषा रागादयः ॥

(राघ.)पृथिव्यादिकार्यत्वात् तत्क्रमेणैव निर्दिशति- **घ्राणेति** ॥ तद्विशेषाः सौरभ्यादयो माधुर्यादय इत्यर्थः । **केचिद्गुणा इति** ॥ महद्रूपवद्द्रव्यनिष्ठा रूपरसादयः । कर्माण्युत्क्षेपणादीनि । घटत्वद्रव्यत्वादिजातयश्च । जातिपदेन सर्वघटादिनिष्ठान्योन्यसदृशघटत्वादयो धर्मा ग्राह्याः । **काचकामलादय इति** ॥ आदिपदेन पित्ताङ्गुल्यवष्टम्भादिग्रहः । **एत इति** ॥ गन्धादयः सर्वे विषया इत्यर्थः । नन्वेवं यथार्थज्ञानसाधनेन्द्रियसहकारितापत्त्याऽऽलोकादेरिव स्वतो यथार्थज्ञानसाधनत्वाभावात् कथमनुप्रमाणान्तर्गतप्रत्यक्षान्तर्भाव इत्यत आह- **स्वातन्त्र्येणेति** ॥ चक्षुरादेरिवान्यनिरपेक्षेणेत्यर्थः । एतेन प्रमाणत्रयविषया अप्यस्य साक्षाद्विषया इति सूचितम् । रागादयो रागद्वेषलोभादयः ॥

(वेदे.) ननु

'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥'

इति स्मृत्येन्द्रियषाड्विध्याभिधानादुक्तं द्वैविध्यमनुपपन्नमित्यत आह- **प्राकृतं षड्विधमिति** ॥ तथाच यत् षड्विधं प्रसिद्धं तत्प्राकृतमित्यविरोध इति भावः । प्राकृत इत्यत्र प्रकृतिशब्देनाहङ्कारः पञ्चभूतानि चोच्यन्ते ।

'सूक्ष्मेन्द्रियाणि सन्त्येव स्युः स्थूलान्यप्यहङ्कृतेः ।
तेषां भूतैरुपचयः सृष्टिकाले विधीयते ॥'

इत्युक्तेः। नच श्रोत्रमनसोः सदा स्पर्शरहितद्रव्यत्वेन नित्ययोः कथं प्राकृततेति वाच्यम्। असिद्धेः। तमस्यनैकान्त्याच्च। **तद्विशेषाः सौरभ्यादयः। रसविशेषा मधुरादयः। रूपवन्तीति॥** उद्भूतरूपवन्तीत्यर्थः। गुरुत्वव्यावृत्त्यर्थमाह- **केचिदिति॥** ननु वायुस्पर्शस्य महत्त्वसमानाधिकरणोद्भूतरूपवद्द्रव्यनिष्ठत्वाभावात् कथं त्वगिन्द्रियग्राह्यतेत्यत आह- **वायुस्पर्शोऽपीति॥** पूर्वं 'केचिद्गुणाः' इति प्रायिकत्वादुक्तम्। वस्तुतस्तु गुणप्रत्यक्षत्वे महत्त्वसमानाधिकरणोद्भूतरूपवद्द्रव्यनिष्ठत्वं न प्रयोजकम्। गौरवात्। किन्तु महत्त्वसमानाधिकरणोद्भूतविशेषगुणवत्त्वमेव लाघवादिति भावः। अत्र महान्ति रूपवन्ति द्रव्याणीत्यनेन बहिरिन्द्रियद्रव्यसाक्षात्कारे महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य प्रयोजकत्वकथनेन वायोरतादृशत्वादप्रत्यक्षत्वमिति सूचयति। एतदुपपादनं चास्मत्कृतकाठकभाष्यटीकायां स्पष्टं द्रष्टव्यम्। **शब्द इति॥** तद्विशेषश्चेत्यपि द्रष्टव्यम्। विषय इति सम्बन्धः। एवं बाह्येन्द्रियं सपरिकरं निरूप्येदानीं तद्दोषमाह- **एतेषामिति॥** मनसस्त्वेतद्व्यतिरिक्तत्वमेवेति सूचनायैतेषामित्युक्तम्। **काचो** दृग्दोषः। 'काचाः शिक्यमृद्भेददृग्रुज' इत्यभिधानात्।

इदानीं मनोविषयमाह- **मनसस्त्विति॥** ननु मनसोऽसाधारणफलाभावान्नानुप्रमाणरूपेन्द्रियप्रभेदत्वमित्यत आह- **स्वातन्त्र्येणेति॥** बहिरिन्द्रियनैरपेक्ष्येणेत्यर्थः। एवञ्चासाधारणस्मृतिरूपयथार्थज्ञानस्य फलस्य सत्त्वादनुप्रमाणविशेषेन्द्रियरूपता मनस उपपद्यत इति भावः। एवं सतीदं मनोलक्षणमिति मत्वा तत्र स्वातन्त्र्येणेति पदकृत्यं चिन्त्यमिति वदन्तो भ्रान्ता इति द्रष्टव्यम्॥

स्मृतेर्याथार्थ्योपपादनम्

ननु स्मृतेर्याथार्थ्यमेव नास्ति। नहि यदा यादृशोऽर्थः स्मर्यते तदाऽसौ तादृशः। पूर्वावस्थाया निवृत्तत्वादिति चेन्न। यतो ज्ञानकाले

वस्तुनस्तथात्वं याथार्थ्योपयुक्तं न भवति। किन्तु यद्देशकाल-सम्वन्धितया यद् वस्तु ज्ञानेन यादृशं गृह्यते तद्देशकालयोस्तस्य तथात्वम्। स्मृतिश्च तत्र तदाऽसौ तादृश इति गृह्णाति। नच तत्र तदाऽसौ न तादृशः ।

ननु पूर्वानुभवजनितसंस्कारः स्मृतिकारणम्। सं चानुभूतविषय एव स्मृतिजननस्येष्टे। नचानुभवेन निवृत्तपूर्वावस्थतयाऽर्थो गृहीतः। तत्कथमनुभवसमानविषयसंस्कारजन्या स्मृतिरर्थं निवृत्त-पूर्वावस्थतया विषयीकुर्यादिति। मैवम्। भवेदेतदेवं यदि संस्कार-मात्रजन्यत्वं स्मृतेरभ्युपगच्छामः। नचैवम्। मनोजन्या स्मृतिः। संस्कारस्तु मनसस्तदर्थसन्निकर्षरूप एव। यथा योगीन्द्रियाणां योगजो धर्मः। ततश्च संस्कारसहकृतं मनोऽननुभूतामपि निवृत्तपूर्वावस्थां विषयीकुर्वत् स्मरणं जनयेदिति को दोषः वर्तमानमात्रविषया-ण्यपीन्द्रियाणि सहकारिसामर्थ्यात् कालान्तरसम्वन्धितामपि गोचरयन्ति। यथा संस्कारसहकृतानि सोऽय-मित्यतीतवर्तमानत्व-विशिष्टविषयप्रत्यभिज्ञासाधनानि।

प्राकृतेन्द्रियाणि मनोवृत्तिज्ञानं जनयन्ति। तत्र सन्निकर्षः प्रत्यक्षमित्युक्ते घटपटसन्निकर्षेऽतिव्याप्तिः। इन्द्रियसन्निकर्षः प्रत्यक्षमित्युक्ते चक्षुराकाशसन्निकर्षेऽतिव्याप्तिः। अर्थसन्निकर्ष इत्युक्ते पूर्ववदतिव्याप्तिः। दुष्टार्थानां दुष्टेन्द्रियैर्वा सन्निकर्षं व्यावर्तयितुमुभयत्र निर्दोषग्रहणम्॥

(राघ.) स्मृतिसाधनत्वेन मनसः प्रत्यक्षान्तर्भाव इति यदभिप्रेतं तदयुक्तमिति

शङ्कते- **नन्विति** ॥ एवकारेण कुतस्तत्साधनत्वेनानुप्रमाणता कुतस्तरां च प्रत्यक्षप्रमाणतेति सूचयति । **पूर्वावस्थाया इति** ॥ अनुभवो यस्मिन् काले जातस्तस्य कालस्येदानीं स इति स्मृतिविषयस्य निवृत्तेरित्यर्थः । **तथात्वमिति** ॥ याथार्थ्योपयोगि यतोऽतो नेति पूर्वेणान्वयः । अस्तूक्तदिशा स्मृतेर्याथार्थ्यम् । तथाऽपि तदुत्पत्तिसामग्र्या संस्कारस्य तज्जननासामर्थ्यात् कथं तदुत्पत्तिरिति सौहार्देन शङ्कते- **नन्विति** ॥ **स्मृतिजननस्येष्ट इति** ॥ अधीगर्थदयेशां कर्मणीति षष्ठी । **भवेदेतदेवमिति** ॥ एवं त्वदुक्तरीत्यैतत् स्मृतिजन्मदौर्घट्यं भवेदित्यर्थः । **योगजो धर्म इति** ॥ अतीन्द्रियार्थविषये प्रत्यासत्तिरूपस्तथेत्यर्थः । एवं साक्षिणो मनसश्च यथार्थज्ञानसाधनत्वेनानुप्रमाणान्तर्भावमुपपाद्य घ्राणादीनामपि तदाह- **प्राकृतेन्द्रियाणीति** ॥ **मनोवृत्तीति** ॥ मनःपरिणामरूपमित्यर्थः । यद्वा पूर्वमिन्द्रियपदेन ज्ञानेन्द्रियाणि गृह्यन्ते इत्युक्तम् । तत्र साक्षिमनसोर्ज्ञानेन्द्रियत्वमुक्त्वा घ्राणादीनां तदाह- **प्राकृतेन्द्रियाणीति** ॥ आत्मसमवेतं ज्ञानं जनयन्तीति न्यायमतनिरासाय मनोवृत्तीत्युक्तम् । एवमुपयुक्तं सर्वं निरूप्याधुना पदकृत्यान्याह- **तत्रेति** ॥ प्रत्यक्षलक्षणे ॥

(वेदे.) याथार्थ्यमेव नास्तीति ॥ तथाच तत्साधनस्य मनसोऽनुप्रमाणत्वानुपपत्तिरिति भावः । **नहीति** ॥ स्मृतिकाले तद्देशकालवैशिष्ट्यरूपपूर्वावस्थाया अभावेन अविद्यमानविषयकत्वात् स्मृतेरयथार्थत्वमेव युक्तमिति भावः। **पूर्वावस्थाया इति** ॥ ज्ञानोल्लिखितदेशकालयोः । **यत इति** ॥ विषयासत्त्वमेव ज्ञानायथार्थत्वे तन्त्रं नतूल्लिखितस्य विषयस्य ज्ञानकालेऽसत्त्वम् । तथात्वेऽतीतानागतप्रमयोरप्ययाथार्थ्यापत्तेः । स्मृत्युल्लिखितदेशकालयोश्च 'स्मृतिविषयः सन्' इत्यबाधितप्रतीतिविषयत्वात् सत्त्वमिति न स्मृतेरयाथार्थ्यमिति प्राघट्टिकोऽर्थः। तदाऽसौ तादृश इति गृह्णातीत्यनेन निवृत्तपूर्वावस्थतयाऽर्थविषयकत्वं स्मृतेरुक्तम् । तदनुपपन्नमिति तटस्थः शंकते- **नन्विति** ॥ **स चेति** ॥ अन्यथाऽति-

प्रसङ्गादिति भावः। **संस्कारस्त्विति**॥ एतेन स्मृतेर्याथार्थ्ये तत्कारणसंस्कारस्य प्रमाणान्तरतापत्तिरित्यपि परास्तम्। मनस एव तत्करणत्वेन संस्कारस्य व्यापारमात्रत्वात्। **को दोष इति**॥ अनुभवबलेनैवेत्थं सहकारिसामर्थ्यकल्पनान्नातिप्रसङ्गः। विशेषणज्ञानं च न विशिष्टज्ञानकारणमिति भावः। नन्विन्द्रियाणां वर्तमानमात्रग्राहित्वात् कथं मनो निवृत्तपूर्वावस्थाविषयकस्मरणं जनयेदित्यत आह- **वर्तमानेति**॥ सत्यमिन्द्रियाणामियं सहजशक्तिर्यद् वर्तमानमात्रग्राहित्वमिति। तथाऽपि सहकारिसामर्थ्याच्छक्त्यन्तराविर्भावेनावर्तमानवस्तुविषयकत्वमपि तेषामुपलक्ष्यत इति भावः। यद् वक्ष्यति 'सहकारिसामर्थ्यात् कारणानां शक्त्यन्तराविर्भावस्य बहुलमुपलम्भात्' इति। एवं प्राकृतेन्द्रियाणि निरूप्य तत्फलमाह- **प्राकृतेन्द्रियाणीति**॥ स्वरूपज्ञाननिरासाय मनोवृत्तीति। अनेन प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेनेति प्रत्यक्षविभागोऽपि कृतो भवतीत्यवधेयम्। एवं प्रत्यक्षलक्षणान्तर्गतार्थेन्द्रियतद्दोषान् निरूप्येदानीं तल्लक्षणशरीरनिष्ठविशेषणानां कृत्यमाह- **तत्रेत्यादिना**॥ तत्र प्रत्यक्षलक्षण इत्यर्थः॥

विषयसन्निकृष्टमिन्द्रियं प्रत्यक्षमिति सिद्धान्तनिरूपणम्
प्रत्यक्षचातुर्विध्यकथनञ्च

ननु प्रत्यक्षं करणविशेषः। करणस्य चावान्तरव्यापारेण भवितव्यम्। यथा छिदाकरणस्य परशोर्दारुसंयोगोऽवान्तरव्यापारः। सत्यम्। अत्रापीन्द्रियं करणधर्मि। तस्यार्थसन्निकर्षोऽवान्तरव्यापारः। तत्रावान्तरव्यापारप्राधान्यविवक्षयाऽर्थेन्द्रियसन्निकर्षः प्रत्यक्षमित्युच्यते। क्वचित्तु धर्मिप्राधान्यविवक्षया स्वस्वविषयसन्निकृष्टमिन्द्रियं प्रत्यक्षमित्युच्यते। स्वरूपेन्द्रियस्यापि आत्मतद्धर्मैः विशेषशक्त्या सन्निकर्षोऽस्त्येव।

ईश्वरप्रत्यक्षं लक्ष्मीप्रत्यक्षं योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति चतुर्विधं प्रत्यक्षम् । तत्राद्यद्वयं स्वरूपेन्द्रियात्मकमेव । उत्तरद्वयं तु द्विविधेन्द्रियात्मकम् । विषयस्तु तत्तज्ज्ञानविषयवद् विवेक्तव्यः ॥

(राघ.) निर्दोषार्थसन्निकृष्टं निर्दोषेन्द्रियं प्रत्यक्षमिति भावेन शङ्कते- **नन्विति** ॥ **अत्रापीति** ॥ अस्मदीये प्रत्यक्षलक्षणेऽपीत्यर्थः । करणरूपधर्मी-त्यर्थः । तर्हि तथैव लक्षणं कुतो नोक्तमित्यत आह- **तत्रेति** ॥ एवं सतीत्यर्थः । **इत्युच्यत इति** ॥ 'निर्दोषेन्द्रियसंयोगः प्रत्यक्षमिति गीयते' इति बृहद्भाष्योक्त-ब्रह्मतर्कतदनुसारिप्रमाणलक्षणे अत्रापि ग्रन्थे चेत्यर्थः । **क्वचित्त्विति** ॥ 'अदुष्टमिन्द्रियं त्वक्षम्' इति तत्त्वनिर्णयोक्तब्रह्मतर्कतदनुसार्यनुव्याख्यान-सुधयोरित्यर्थः । ननु परमतनिरासप्रस्तावे वक्ष्यमाणदिशा प्राकृतेन्द्रियाणां स्वस्वविषयैः संयोगरूपसन्निकर्षसम्भवेऽपि साक्षिणः स्वरूपज्ञानव्यक्तीकरणे तद्विषयैरात्मतद्धर्मैः सन्निकर्षो न युक्तः । साक्षिणः प्रमात्रभेदादित्यत आह- **स्वरूपेन्द्रियस्यापीति** ॥ **विशेषशक्त्येति** । वस्तुसामर्थ्यबलेनेत्यर्थः । पदार्था एवाभिन्नाः सन्तोऽपि भेदकार्यनिर्वहणसामर्थ्योपेताः प्रमाणप्रमिता इति तादृश-पदार्थसामर्थ्यमेव भेदकार्यकारितयाऽन्योन्यविशेषकत्वेन भेदप्रतिनिधिर्विशे-षोऽस्ति । वस्तुषु प्रत्यक्षादिप्रमाणप्रमित इति शास्त्रे प्रतिपादित इति च ज्ञेयम् । अत एवाह- **अस्त्येवेति** ॥ इन्द्रियेषु निर्दोषपदव्यावर्त्यं वक्तुं तद्विभागमाह- **चतुर्विधमिति** ॥ अभ्यर्हितक्रमेण निर्दिशति- **ईश्वरेति** ॥ स्वरूपेन्द्रियात्मक-मेवेत्येवकारेण प्राकृतदेहाभावादिति युक्तिं सूचयति- **द्विविधेन्द्रियेति** ॥ स्वरूपेन्द्रियबाह्येन्द्रियात्मकमित्यर्थः । **तत्तज्ज्ञानविषयवदिति** ॥ ईश्वरप्रत्यक्षं कृत्स्नविषयमित्यादिरूपेण ज्ञेयमित्यर्थः ॥

(वेदे.) ननु नेन्द्रियसन्निकर्षस्य प्रत्यक्षत्वं युक्तम् । प्रत्यक्षस्य यथार्थज्ञान-

कारणरूपानुप्रमाणविशेषत्वेन करणत्वात्। करणस्य च व्यापारवत्तानियमात् सन्निकर्षस्य च व्यापारत्वादित्याशङ्कते- **नन्विति**॥ **अत्रापीति**॥ इन्द्रियसन्निकर्षस्य प्रत्यक्षत्वेनोक्तत्वेऽपीत्यर्थः। ननु सन्निकृष्टेन्द्रियव्यापारत्वं न तत्सन्निकर्षस्य सम्भवति। आत्माश्रयप्रसङ्गादित्यत आह- **करणधर्मीति**॥ तथाच धर्मिभूतमिन्द्रियमेव करणं नतु सन्निकृष्टेन्द्रियमित्यर्थः। एवञ्चात्रापीन्द्रियमेव करणं विवक्षितम्। तद्धर्मभूतः सन्निकर्षोऽवान्तरव्यापारत्वेन विवक्षितोऽतो नानुपपत्तिरिति भावः। ननु तर्हि सन्निकृष्टेन्द्रियं प्रत्यक्षमित्येव कस्माल्लक्षणं नोच्यते। किमुक्तलक्षणविवक्षणेनेत्यत आह- **अत्रेति**॥ एवं सत्यपीत्यर्थः। इत्युच्यत इत्यनन्तरं प्रमाणलक्षणादौ भगवत्पादैरिति शेषः। तथाच तदनुसारिभिरस्माभिरपि तथैव व्यवहृतम्। वस्तुतस्तु सन्निकृष्टमिन्द्रियमेव प्रत्यक्षं विवक्षितमिति भावः। ननु न व्यापारवत्त्वं करणत्वं किन्त्वविलम्बेन प्रमोत्पादकत्वम्। तच्च सन्निकर्षेऽप्यक्षतमेवेति परिहारं मनसि निधाय किं व्यापारवत्त्वरूपकरणत्वपुरस्कारेणोक्तपरिहारेणेत्यत आह- **क्वचिदिति**॥ अदुष्टमिन्द्रियं त्वक्षमित्यादिब्रह्मतर्कवाक्यादावित्यर्थः। तथाच ब्रह्मतर्कवाक्यानुसारादुक्त एव परिहार इति भावः। प्रमाणलक्षणब्रह्मतर्कवाक्ययोः परस्परविरोधपरिहारार्थमुक्तम्-अत्र धर्मिप्राधान्यविवक्षयेति, पूर्वं चावान्तरव्यापारप्राधान्यविवक्षयेति। तथाचास्मन्मते इन्द्रियमेव करणं सन्निकर्षोऽवान्तरव्यापारः। प्राधान्यविवक्षावशाद् वैचित्र्येण व्यवहार इति न कोऽपि दोष इत्युक्तं भवति। नन्वात्मतद्धर्मैः स्वरूपेन्द्रियस्याप्यभेदात् कथं सन्निकर्षरूपव्यापारसम्भव इत्यत आह- **स्वरूपेन्द्रियस्यापीति** ॥ **विशेषेति** ॥ तस्याभेदेऽपि भेदकार्यकारित्वेन धर्मिग्राहकप्रमाणसिद्धत्वादिति भावः। पूर्वं प्रत्यक्षस्य सप्तविधत्वेन विभागः सूचितः। इदानीमपरमपि तद्विभागमाह- **चतुर्विधमिति** ॥ तेषां विषयमाह- **विषयस्त्विति** ॥ तत्र सर्वार्थविषयमीश्वरज्ञानमित्यादिना ग्रन्थेन ये ईश्वरादिज्ञानविषयाः प्रोक्तास्त एव तत्तत्प्रत्यक्षविषयत्वेनाभिमता इत्यर्थः॥

प्रकारान्तरेणेन्द्रियविभागः, षड्विधसन्निकर्षनिरासश्च

बाह्येन्द्रियं त्रिविधम्। दैवमासुरं मध्यममिति। तत्र यथार्थज्ञानप्रचुरं दैवम्। अयथार्थज्ञानप्रचुरमासुरम्। समज्ञानसाधनं तु मध्यमम्। स्वरूपेन्द्रियमप्युत्तमानां विषयस्वरूपे प्रकारे च यथार्थमेव। अधम-मध्यमानां तु स्वरूपमात्रे यथार्थमेव। प्रकारे त्वयथार्थं मिश्रं चेति।

इन्द्रियार्थयोस्तु सन्निकर्षोऽपरोक्षज्ञानहेतुः षोढा भिद्यत इत्येके। तद्यथा। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो विशेषणविशेष्यभावश्चेति। तत्र चक्षुः-स्पर्शनयोः घटादिद्रव्यैर्मनसश्चात्मना संयोगः। तेषां स्वविषय-गतगुणकर्मसामान्यैः संयुक्तसमवायः। तथा घ्राणरसनयोर्गन्ध-रसाभ्याम्। एतेषां स्वविषयगुणकर्मगतसामान्यैः संयुक्तसमवेत-समवायः। श्रोत्रस्य शब्देन समवायः। तद्गतसामान्यैः समवेत-समवायः। एतेषामेतत्पञ्चविधसम्बन्धसम्बद्धार्थस्थाभावसम-वायाभ्यां पञ्चविधो विशेषणविशेष्यभाव इति। तदसत्। गुणादीनां गुण्यादिभिरभेदेन समवायाभावात्। आत्मनस्तद्धर्माणां च साक्षिविषयत्वेन मनोविषयत्वाभावात्। वर्णात्मकस्य शब्दस्य द्रव्यत्वेनाकाशविशेषगुणत्वाभावात्। अतः सर्वेन्द्रियाणां स्वस्व-विषयैः स्वस्वविषयप्रतियोगिकाभावेन च साक्षादेव रश्मिद्वारा सन्निकर्षः॥

(राघ.)यथार्थज्ञानप्रचुरमिति॥ बाहुल्येन यथार्थज्ञानजनकमित्यर्थः। एवमग्रेऽपीत्यर्थः। समज्ञानेति॥ भ्रमाभ्रमज्ञानेत्यर्थः। स्वरूपेन्द्रियमपीति॥

न केवलं स्वरूपज्ञानमित्यपेरर्थः । **प्रकार इति** ॥ सत्यत्वपारतन्त्र्यादितद्धर्म इत्यर्थः । यदत्रायथार्थज्ञानसाधनं तन्निर्दोषपदव्यावर्त्यमिति भावो ध्येयः । स्वमतं विवक्षुर्न्यायमतं तावदनूद्य निराह- **इन्द्रियार्थयोरिति** ॥ **तद्यथेति** ॥ तत् षाड्विध्यं यथा स्पष्टं भवति तथोच्यत इत्यर्थः । **तेषामिति** ॥ चक्षुस्त्वङ्मनसामित्यर्थः । **गन्धरसाभ्यामिति** ॥ संयुक्तसमवाय इति तथाशब्दार्थः । चक्षुस्त्वङ्मनो-रसनघ्राणसंयुक्तेषु स्वस्वविषयेषु गुणकर्मसामान्यगन्धरसानां समवायादिति भावः । **एतेषामिति** ॥ उक्तचक्षुरादिपञ्चेन्द्रियाणां गुणकर्मगतैः सामान्यैरिति चक्षुरादीन्द्रियसंयुक्तेषु घटादिविषयेषु समवेतानि गुणकर्माणि । तत्र रूप-त्वोत्क्षेपणत्वादिसामान्यानां समवायादिति भावः । **श्रोत्रस्येति** ॥ तस्या-काशात्मकत्वाद् वर्णध्वन्यात्मकशब्दस्य च तद्गुणत्वाद् गुणगुणिनोश्च समवाया-दिति भावः । **तद्गतेति** ॥ शब्दककखादिगतकत्वखत्वादिसामान्यैरित्यर्थः । श्रोत्रसमवेते शब्दे तेषां समवायादिति भावः । **एतेषामिति** ॥ चक्षुस्त्वङ्मनोघ्राण-रसनश्रोत्राणां संयोगादिभेदेन पञ्चविधविषयसम्बद्धा येऽर्था द्रव्यतद्गतगुणकर्म-सामान्यगुणकर्मगतसामान्यशब्दतद्गतसामान्यरूपाः पञ्चविधा अर्थाः । तत्त्रयाभावसमवायौ ताभ्यां सह पञ्चविधो विशेषणविशेष्यभावश्चेत्यर्थः । चक्षुः-संयुक्ते घटे रूपसमवाय इति घटो नास्तीति च समवायाभावौ संयुक्तविशेषण-विशेष्यभावेन, तथा घटरूपे रूपत्वसमवाय इति रसत्वाभाव इति संयुक्तसमवेत-विशेष्यविशेषणभावेन, रूपत्वे रूपसमवाये रसत्वाभाव इति संयुक्तसमवेत-समवेतविशेषणविशेष्यभावेन सङ्गृह्यते । सत्यन्तानां विशेषणत्वात् । प्रथमान्तानां विशेष्यत्वात् । एवं ककारे कत्वसमवाय इति गत्वाभाव इति समवेतविशेषण-विशेष्यभावेन, कत्वे ककारसमवाय इति गत्वाभाव इति समवेतसमवेतविशेषण-विशेष्यभावेन शक्यत इति संयुक्तविशेषणविशेष्यभावादिभेदेन पञ्चविध इत्यर्थः । तर्हि कः सन्निकर्षोऽर्थेन्द्रियाणामित्यत आह- **अत इति** ॥ परोक्तस्यायुक्तत्वादित्यर्थः । स्वस्वविषयप्रतियोगिकाभावेनेतीन्द्रिययोग्या-

भावेनेत्यस्योपलक्षणमेतत् । समवायसम्बन्धाव्यवधानेनेत्यर्थः । सर्वेन्द्रियाणां तैजसत्वाभिप्रायेणोक्तम्- **रश्मिद्वारेति** ।। यद्वा चक्षुरभिप्रायेण **रश्मिद्वारेति** ।। तदितरेन्द्रियाभिप्रायेण **साक्षादेवेति** ।।

(वेदे.) प्रत्यक्षलक्षणे यन्निर्दोषत्वमिन्द्रियविशेषणमुक्तं तत्स्वरूपेन्द्रिये स्वरूपकथनमात्रमितरत्र विशेषणमिति भावेन प्रकारान्तरेणेन्द्रियविभागमाह- **बाह्येन्द्रियमिति** ।। यथार्थज्ञानप्रचुरं यथार्थज्ञानसाक्षात्कारप्रचुरमित्यर्थः । एवमग्रेऽपि। **विषयस्वरूप इति** ।। धर्मिणीत्यर्थः । अत्र यथार्थज्ञानसाधनं स्वरूपं बाह्यं वा । यावदिन्द्रियं तावन्निर्दोषविशेषविशेषणेन व्यावर्त्यमिति भावः । एवं स्वमते प्रत्यक्षं निरूप्येन्द्रियार्थयोः सर्वत्र साक्षादेव सन्निकर्षो नतु क्वचित् साक्षात् क्वचित् परम्परयेति व्यवस्थापयितुं तावत् परमतमनूद्य दूषयति- **इन्द्रियार्थयोस्त्विति** ।। अत्र समवायस्याजन्यत्वेऽपि संयोगस्य जन्यत्वेन तद्घटित-संयुक्तसमवायादेर्जन्यत्वोपपत्तेरिन्द्रियव्यापारतोपपन्नेति ध्येयम् । एवं श्रोत्रेण शब्दग्रहे केवलसमवायस्याव्यापारत्वेऽपि शब्दसमवायस्य जन्यत्वसम्भवेन व्यापारत्वं युक्तमेवेति द्रष्टव्यम् । ननु विशेषणविशेष्यभावस्य भूतलघटा-भावादिमात्रवृत्तित्वेन इन्द्रियावृत्तित्वात् कथमिन्द्रियसन्निकर्षता तस्येत्यत आह- **एतेषामिति** ।। पूर्वोक्तेन्द्रियाणामित्यर्थः । एते संयोगादयः पञ्च सम्बन्धास्तैः सम्बद्धा येऽर्थास्तत्स्थौ विद्यमानौ यावभावसमवायौ ताभ्यामित्यर्थः । तथाच न विशेषणविशेष्यभावमात्रं सन्निकर्षो येन तस्येन्द्रियावृत्तित्वेन तत्सन्निकर्षता-नुपपत्तिः । किन्त्विन्द्रियसंयुक्तविशेषणतादिरेवेति भावः । पञ्चविध इत्युपलक्ष-णम् । अन्येऽपि विशेषणविशेष्यभावा इन्द्रियाभावसन्निकर्षभूताः सन्तीति ज्ञातव्यम् । तथाहि । शब्दाभावग्रहे केवलविशेषणविशेष्यभावः । शब्दाभावस्या-काशात्मकश्रोत्रविशेषणत्वात् । भूतलवृत्तिघटाभावग्रहे संयुक्तविशेषण-विशेष्यताऽपरा । भूतलवृत्तिरूपनिष्ठरूपत्ववृत्तिरसत्वाभावग्रहे संयुक्तसमवेत-

समवेतविशेषणविशेष्यतेत्याद्या विशेषणविशेष्यभावा अभावग्राहका अनेके द्रष्टव्याः। समवायग्रहार्थं तु विशेषणविशेष्यभावचतुष्टयमेव। तन्तुषु पटसमवाय-ग्रहे संयुक्तविशेषणता प्रथमा। द्वितीया तु तन्तुरूपरूपत्वसमवायग्रहे केवलविशेषणता। तृतीया शब्दसमवायग्रहे केवलविशेषणता। तुरीया शब्दत्वसमवायग्रहे समवेतविशेषणतेति। **गुणादीनामिति**॥ समवायस्य भेदनियतत्वादित्यर्थः। तथाच समवायघटिताः संयुक्तसमवायादयः सन्निकर्षा न युक्ता इति भावः।

गुणगुण्यादीनामभेद एव कुत इति चेत्। अस्ति तावद् गुणगुण्यादिप्रतीतेः कुण्डबदरादिप्रतीतितो वैलक्षण्यं साक्षिसिद्धम्। नचाभेदविषयत्वमन्तरेणान्यद् व्यावर्तकं तत्रास्ति। न वाऽयुतसिद्धविषयकत्वेनान्यथासिद्धिः। अभेदातिरिक्त-स्यायुतसिद्धत्वस्यानिर्वचनात्। निर्वचने वा कालान्तरभाविनः संविभागादेः प्रतीत्यनुपयोगात्। अभेदेऽपि गुणगुणिभावोऽपर्यायशब्दवाच्यत्वादिकं विशेषबलादुपपद्यते। विशेषश्च धर्मिग्राहकप्रमाणेन भेदकार्यकारित्वेनैव सिद्ध इत्यादिकं शास्त्रे समर्थितं द्रष्टव्यम्। विस्तरभयान्नेह प्रपञ्च्यते।

संयोगस्यान्यत्र प्रत्यासत्तित्वेऽपि नात्मनि तस्य तथात्वमित्याह- **आत्मन इति**॥ ततश्च यदुक्तं मनसश्चात्मनेत्यादि तद्गतमिति भावः। आत्मतद्धर्मज्ञानस्य मानसत्वे च तस्याबुभुत्सितग्राह्यत्वस्य च बुभुत्साया अपि तज्ज्ञानाधीनत्वेना-नवस्थापत्त्ययोगात्। साक्षिणश्च स्वप्रकाशत्वेन सुषुप्त्यादौ मनस उपरमेऽपि साक्षिरूपज्ञानाङ्गीकारेण चास्मन्मते न काचिदनुपपत्तिरिति ध्येयम्। **वर्णात्मकस्येति**॥ ध्वन्यात्मकस्य च वायुगुणत्वाङ्गीकारादाकाशगुणत्वाङ्गी-कारेऽपि न समवायः सन्निकर्षो भवेदिति भावः। द्रव्यत्वेनेति वस्तुगति-मनुरुध्योक्तम्। वस्तुतस्तु गुणत्वेऽपि न समवायः सन्निकर्षोऽभेदादिति बोध्यम्। नच सामान्यवत्त्वे सत्यस्मदादिबाह्यैकेन्द्रियग्राह्यत्वेन वर्णानां गुणत्वसिद्धेः कथं द्रव्यत्वमिति वाच्यम्। अस्मन्मते तमसि व्यभिचारात्। परमते

प्रदीपप्रभायां व्यभिचारात्। एवं परमतं दूषयित्वेदानीं स्वमते साक्षादेव सन्निकर्ष इत्याह- अत इति ।। परमतस्यायुक्तत्वादित्यर्थः । रश्मिद्धारेतीन्द्रियाणां तैजसत्वादुक्तम् । तथाच वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा शब्दः शब्दान्तरमारभते। यस्तु कर्णशष्कुल्यवच्छिन्नशब्दः स एव श्रोत्रेण गृह्यत इति यन्मतं तदसमञ्जसमित्युक्तं भवति। श्रोत्रस्यैव रश्मिद्धारा गमनोपपत्तेः। विवृतं चैतदन्यत्र तत्रैवानुसन्धेयम् । रश्मिद्धारेत्यस्य तत्तदिन्द्रियैकदेशद्धारेत्यर्थ इति केचित्। अन्ये तु चक्षुरभिप्रायेणेदमुक्तमित्याहुः ।।

निर्विकल्पकप्रत्यक्षनिराकरणम्

निर्विकल्पकसविकल्पकभेदेन च द्विविधं प्रत्यक्षमित्याचक्षते । तत्र वस्तुस्वरूपमात्रावभासकं निर्विकल्पकम् । विशिष्टाकारगोचरं सविकल्पकम् । तदष्टविधम् । तत्र द्रव्यविकल्पो यथा दण्डीति । गुणविकल्पो यथा शुक्ल इति । क्रियाविकल्पो यथा गच्छतीति । जातिविकल्पो यथा गौरिति । विशेषविकल्पो यथा विशिष्टः परमाणुरिति । समवायविकल्पो यथा पटसमवायवन्तस्तन्तव इति । नामविकल्पो यथा देवदत्त इति । अभावविकल्पो यथा घटाभाववद्भूतलमिति । एतदप्यसत् । विशेषसमवाययोरप्रामाणिकत्वात् । नाम्नः पश्चात् स्मरणेनाभावस्य च प्रतियोगिस्मरणाधीनज्ञानत्वेन तद्विकल्पस्य प्रथमाक्षिसन्निकर्षानन्तरमेवोत्पत्त्यभावेऽपि द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन निर्विकल्पकानुपपत्तेः ।।

(राघ.)एवं सन्निकर्षविषये वादिविवादं निरस्य तज्जन्यज्ञानेऽपि तन्निरसितुमाह- निर्विकल्पकेति।। प्रत्यक्षमिति।। ज्ञानमित्यर्थः। आचक्षत इति।।

तार्किकाः । **तत्र** तयोर्मध्ये । **वस्तुमात्रेति** ॥ गुणगुण्यादिसम्बन्धमगृहीत्वा द्रव्यस्वरूपं गुणकर्मादिस्वरूपमात्रं वा गृह्णाति यज्ज्ञानं तदित्यर्थः । **विशिष्टाकारेति** ॥ सम्बन्धमपि गृह्णदित्यर्थः । **अप्रामाणिकत्वादिति** ॥ विशेषविकल्पः समवायविकल्पश्चेति द्वावयुक्तावित्यर्थः । अन्ये तु षडपि युक्ताश्चेदपि निर्विकल्पकं नोपेयमिति भावेनाह- **नाम्न इति** ॥ द्रव्यादिविकल्पानां दण्डी शुक्ल इत्यादीनां **प्रथममेव** इन्द्रियसन्निकर्षोत्तरकालमेव । विशेषणीभूतदण्डादिज्ञानं विनैवेति यावत् । ननु नामविकल्पे पिण्डेन्द्रियसंयोगानन्तरं देवदत्त इति वर्णमालारूपनाम्नो गुणकर्मादेरिवेन्द्रियसंयुक्तार्थनिष्ठत्वाभावेन विशेषणीभूतनाम्नः पुरोवर्तिनि विशेषणरूपेण सम्बद्धतया भानार्थं तदुपनायकस्मरणमपेक्षितम् । तस्मिन् सति पश्चादेव नामविशिष्टनाम्नि प्रत्यक्षेण देवदत्त इति भाव्यम् । तथा घटाभाववद्भूतलमित्यत्राभावस्य ससम्बन्धिकत्वेन सम्बन्धिनः प्रतियोगिभूतस्य घटस्य स्मृतिं विना तन्निरूपिताभावविशेषणज्ञानायोगेन तत्र स्मरणमपेक्षितमिति कथं प्रथममेव तयोर्विकल्पयोरुत्पत्तिरित्यत आह- **नाम्नः पश्चादिति** ॥ दण्डेन्द्रियसंयोगानन्तरमित्यर्थः । तदर्थमपि न निर्विकल्पकापेक्षा । सविकल्पकस्मरणेनैव तयोर्विकल्पयोरुपपत्तेरिति भावः ॥

(वेदे.) अप्रामाणिकत्वादिति ॥ तथाचाष्टविधत्वमनुपपन्नमिति भावः । ननु समानगुणकर्मजातिमत्सु पृथिवीत्वाद्यवान्तरजातिविरहितेषु परमाणुषु परस्परं व्यावृत्तिबुद्धिर्योगिनामुदेति । सा च न तेषु व्यावर्तकधर्माभावे भवितुमर्हति । अतस्तेषु व्यावृत्तिबुद्ध्यन्यथाऽनुपपत्त्या व्यावर्तकधर्माः स्वीकार्यास्त एव विशेषनामान इति कथं विशेषोऽप्रामाणिक इति चेन्मैवम् । विशेषेष्विव परमाणुष्वपि स्वरूपेणैवासङ्कीर्णेन व्यावृत्तिबुद्ध्युपपत्तेः। अन्यथा विशेषेष्वपि विशेषान्तरकल्पनापत्त्याऽनवस्थापत्तेः । नचैवं घटादेरपि स्वव्यावृत्तिबुद्धिहेतुतोपपत्तौ रूपादिधर्माणामप्युच्छेदः स्यादिति वाच्यम् । तेषामनुभवसिद्धत्वेनापलापासम्भवात् ।

एवं समवायोऽप्रामाणिक एव । इमौ संयुक्तावितिवदिमौ समवेताविति

प्रत्यक्षेणाननुभवात्। समवायं जानामीत्यनुव्यवसायाभावाच्च। नापि 'गुणक्रिया-जातिविशिष्टा बुद्धयः सम्बन्धिभिन्नसम्बन्धविषयाः। भावमात्रविषयकविशिष्ट-लौकिकप्रत्यक्षत्वात्। इतरनिरूपणाधीननिरूप्यमात्रगोचरलौकिकप्रत्यक्ष-त्वाद्वा। दण्डीति प्रत्यक्षवत्' इत्याद्यनुमानं मानम्। समवायसिद्ध्यनन्तरं सम-वायेतरसम्बन्धिभिन्नसम्बन्धविषया इत्यपि प्रयोगसम्भवेन तृतीयस्यापि अति-रिक्तसम्बन्धस्य सिद्ध्यापत्त्याऽऽभाससमानयोगक्षेमत्वात्। अभावविशिष्ट-बुद्धिवत्स्वरूपसम्बन्धविषयत्वेनैवोपपत्त्याऽप्रयोजकत्वाच्च। नच लाघवादेक एव सम्बन्धः सिध्यतीति वाच्यम्। तथा सति प्रागभावादिविशिष्टबुद्धीः पक्षीकृत्य सम्बन्धविषयकत्वसाधने लाघवेन तत्राप्यभावमात्रानुगत एको नित्यः सम्बन्धोऽङ्गीकार्यः स्यात्। विनिगमकाभावात्। तस्मान्नानुमानं तत्र मानम्। नाप्यागमः। अपौरुषेयस्य समवायावेदकस्यागमस्यानुपलम्भात्। पौरुषेय-स्यापि स्वाचार्यवचनातिरिक्तस्यानुपलम्भात्। स्वाचार्यवचनस्यातिप्रसङ्गेन परं प्रत्यसाधकत्वात्। गुणादिविशिष्टबुद्धीनां कुण्डबदरादिविशिष्टप्रत्ययवैलक्षण्यं त्वभेदविषयकत्वेनोपपद्यत इत्युक्तत्वान्नार्थापत्तिस्तत्र मानम्। अभेदेऽपि विशेषणविशेष्यभावादिकत्वं ततः सर्वैरङ्गीकार्येण पदार्थस्वभावविशेषेणैवोप-पद्यते। कथमन्यथा सामान्यं सदित्यादिप्रत्यय इति।

ननु द्रव्यादिविकल्पानां विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यत्वावश्यम्भा-वाद्यदेव तज्जनकं विशेषणज्ञानं तदेव निर्विकल्पकं किञ्चिदङ्गीकार्यमित्यत आह-**नाम्न इति॥ बाधकाभावेनेति॥** नच विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वा-न्यथाऽनुपपत्तिरेव बाधिका। विशेषणविशेष्योभयसन्निकर्षाभ्यामेव विशिष्ट-ज्ञानोत्पत्तौ विशेषणज्ञानस्यापि तत्र कारणत्वे मानाभावात्। नचानुमिति-रूपविशिष्टज्ञानविशेषे साध्यप्रसिद्धिरूपविशेषणज्ञानविशेषस्य हेतुत्वदर्शनात् यद्विशेषयोरिति न्यायेन सर्वत्रापि विशिष्टज्ञाने विशेषणज्ञानस्य कारणतेति वाच्यम्। मन्मते सामान्यप्रत्यासत्त्यभावेन साध्यतावच्छेदकप्रकारक-

यत्किञ्चित्साध्यविषयकप्रसिद्धेरेव कारणत्वेन विशेषणीभूतपक्षीयसाध्यविषयकप्रसिद्धेरकारणत्वात्। अन्यथाऽनुमितावेव पक्षविशेष्यज्ञानस्य कारणतोपलम्भाद् यद्विशेषणयोरिति न्यायेनैव सर्वत्र विशिष्टज्ञाने विशेष्यज्ञानस्यापि कारणतापातादिति भावः। ननु द्रव्यादिविकल्पापेक्षया पूर्वं वस्तुदर्शनाभावेऽपि नामाभावविकल्पयोः पूर्वं वस्तुमात्रावगाहि ज्ञानमङ्गीकार्यम्। नहि नाम्यधिकरणयोरदर्शने नामप्रतियोगिनोः स्मृतिः। येन तद्विशिष्टज्ञानं स्यात्। एवञ्चेत् तदुभयविकल्पयोः पूर्ववस्तुमात्रावगाहिप्रथमाक्षिसन्निकर्षानन्तरमेवोत्पत्त्यभावेन नामप्रतियोगिस्मरणजनकं वस्तुमात्रावगाहिज्ञानं निर्विकल्पकरूपं सिद्धमित्यत उक्तम्- **नाम्न इत्यादिना**॥ **पश्चात्** नामिदर्शनानन्तरं प्रतियोगिस्मरणाधीनज्ञानत्वेनेत्यनन्तरम्। प्रतियोगिनश्च पश्चात्स्मरणेनेत्यावर्तनीयम्। **उत्पत्त्यभावेऽपीति**॥ तदुक्ताभ्युपगमो भिक्षुकपादप्रसरणन्यायेन। वस्तुतस्तत्रापि निर्विकल्पकानुपपत्तिरेव नामप्रतियोगिस्मरणजनकनाम्यधिकरणज्ञानयोरपि यत्किञ्चित्प्रकारावगाहित्वेन निर्विकल्पकत्वाभावादिति भावः॥

प्रत्यक्षस्य फलनिरूपणम्

हानोपादानोपेक्षाबुद्धयः प्रत्यक्षस्य फलमिति केचिदाहुः। तदप्यसत्। तासामनुमानफलत्वात्। तथाहि। कण्टकादिस्वरूपमात्रं प्रदर्श्य प्रत्यक्षं निवर्तते। अथेदानीं पूर्वानुभूतस्य कण्टकादेरनिष्टसाधनत्वमनुभूतं स्मृत्वाऽस्य च कण्टकादित्वेन तदनुमिमानस्य हानबुद्धिरुपजायते। एवं कदलीफलादाविष्टसाधनत्वानुमानानन्तरमुपादानबुद्धिरुत्पद्यते । तृणादौ चौदासीन्यमनुमायोपेक्षाबुद्धिः प्रतिपद्यते। अतो विशिष्टविषयसाक्षात्कार एव प्रत्यक्षस्य फलमिति॥

॥ इति श्रीमज्जयतीर्थपूज्यचरणविरचितप्रमाणपद्धतौ
प्रत्यक्षपरिच्छेदः समाप्तः ॥ १ ॥

(राघ.) प्रत्यक्षज्ञानफलेऽपि विवादमनूद्य निराह- **हानेति ॥ प्रत्यक्षस्य** अपरोक्षज्ञानस्येत्यर्थः । **अनुमानफलत्वात्** अनुमितिजन्यत्वादित्यर्थः । कण्टकादिस्वरूपं प्रदर्श्येत्युक्त्या प्रत्यक्षादिज्ञानजनन एव प्रत्यक्षस्योपयोगो दर्शितः । **अथ** कण्टकादिदृष्टचनन्तरम् । **इदानीं** तत्काले । स्मृत्वेत्यनेन व्याप्तिस्मृतिरुक्ता । इदानीमित्यनेन स्मृतेरेवावसरप्राप्तिरुक्ता । उपनयमाह- **अस्य चेति ॥** एतेन 'विमतं कण्टकादि अनिष्टसाधनं कण्टकादित्वात् प्रागनुभूतकण्टकादिवत्' इति प्रयोगः सूचितः । हानबुद्धिः परित्यागबुद्धिरित्यर्थः । एवमित्यनेन कदलीफलादिस्वरूपं प्रदर्श्य प्रत्यक्षं निवर्तत इत्यादेः परामर्शः । कण्टकादिपदस्थाने कदलीफलादिपदप्रक्षेपप्रयोगोऽत्रोत्तरत्र च पूर्वत्रेव ध्येयः । अभ्यासपाटवाच्छीघ्रं जायमानानुमितिफले हानादिबुद्धौ प्रत्यक्षफलत्वभ्रम इति भावः । **अत इति ॥** परोक्तस्यानुपपन्नत्वादित्यर्थः । **विशिष्टेति ॥** द्रव्यगुणादिविशिष्टेत्यर्थः । **प्रत्यक्षस्य** करणभूतस्य फलमित्यर्थः ॥

॥ इति श्रीप्रमाणपद्धतिभावदीपे श्रीराघवेन्द्रभिक्षुविरचिते प्रत्यक्षपरिच्छेदः ॥

(वेदे.) कण्टकादीत्यत्रादिपदेन सर्पादिसङ्ग्रहः । **प्रत्यक्षमिति ॥** तथाच लिङ्गविशिष्टपक्षग्रहोपक्षीणं प्रत्यक्षम् । कदलीफलादावित्यत्रादिपदेनापूपादिग्रहणम् । एवं तृणादावित्यत्रादिपदेन काकदन्तादिसङ्ग्रहः । **स्मृत्वेति ॥** कण्टकत्वनिष्ठव्याप्तिनिरूपकतयेति शेषः। नच प्रत्यक्षप्रयोज्यत्वमात्रेण तत्फलमिति वाच्यम् । तथात्वे घटादिपदप्रत्यक्षफलत्वप्रसङ्गात् । स्वाभिमतप्रत्यक्षफलमाह- **अत इति ॥** परोक्तस्य तत्फलत्वाभावादित्यर्थः ॥

॥ इति श्रीमद्वेदेशतीर्थविरचितप्रमाणपद्धतिटीकायां प्रत्यक्षनिरूपणं समाप्तम् ॥

लीनं अर्थं गमयति इति लिङ्गं, युज्यते अनेन इति युक्तिः

॥ अथानुमानपरिच्छेदः ॥

निर्दोषोपपत्तिरनुमानम् । उपपत्तिर्व्याप्यं युक्तिर्लिङ्गमिति पर्यायः। अविनाभावो व्याप्तिः । साहचर्यनियम इति यावत् । व्याप्तेः कर्म व्याप्यम् । तस्याः कर्तृ व्यापकम् । यथा धूमस्याग्निना व्याप्तिरव्यभिचरितः सम्बन्धः । यत्र धूमस्तत्राग्निरिति नियमात् । तत्र धूमो व्याप्यः । अग्निर्व्यापकः ॥

(राघ.) अवसरप्राप्तमनुमानं प्रमाणलक्षणोक्तदिशा लक्षयति- **निर्दोषेति** ॥ उपपत्तिर्घटनेति भ्रमं वारयन्नग्रेतनव्याप्त्युक्तिप्रसञ्जकतयोपपत्तिपदस्य विवक्षितमर्थमाह- **उपपत्तिर्व्याप्यमिति** ॥ **पर्याय इति** ॥ एतावत्येव वक्तव्ये युक्तिर्लिङ्गमित्युक्तिस्तु निर्दोषयुक्तिरनुमेति बृहद्भाष्येऽनुमा युक्तिरेवोक्तेत्यनुव्याख्याने लिङ्गं हेतुरिति मिथ्यात्वानुमानखण्डने च भगवत्पादोक्तेस्तत्तदविरोधायेति ज्ञेयम् । इतिपदस्य प्रत्येकमन्वयः । तेन पर्यायमित्येकवचनं साधु । ननु किं व्याप्यं नामेत्यतस्तत्स्वरूपमग्रे विवक्षुर्व्याप्तिस्वरूपं तावदाह- **अविनाभाव इति** ॥ नन्वविनाभावो नाम किं विनाऽभावो वाऽविनाऽपरित्यज्य साहित्येनेति यावत् भावो वर्तनं वा । नाद्यः । तस्य केवलान्वयिन्यभावात् । अस्य व्यतिरेकव्याप्तित्वेन वक्ष्यमाणदिशाऽनुमानानङ्गत्वात् । न द्वितीयः । व्यभिचारिण्यतिव्याप्तेरित्यत आह- **साहचर्येति** ॥ तथाच व्यभिचारीणि नातिव्याप्तिरिति भावः । इदानीं व्याप्यस्वरूपमाह- **व्याप्तेः कर्मेति** ॥ व्याप्तिर्नाम व्यापनक्रिया तां प्रति कर्मकारकं यत् तद् व्याप्यते कात्स्न्र्येन सम्बध्यतेऽनेनेति व्युत्पत्त्या व्याप्यमित्यर्थः । **कर्तृ व्यापकमिति** । व्याप्नोति कात्स्न्र्येन सम्बध्नातीति व्यापकम् । विपूर्वादापृव्याप्ताविन्यस्मात् कर्तरि ण्वुल्प्रत्यय इति भावः । उदाहृत्य दर्शयति- **यथेति** ॥ व्याप्तिः साहचर्यनियम इति प्रागुक्तिरयुक्ता । तथात्वे नियमस्य

व्याप्तिघटितत्वेनात्माश्रयापत्तेः । अतोऽभिप्रायमाह- **अव्यभिचरितस्सम्बन्ध इति** ॥

(वेदे.) उपपत्तिशब्दार्थमाह- **उपपत्तिरिति** ॥ अत्र यद्यप्युपपत्तिर्व्याप्यमित्येतावतैवालम् । तथाऽप्याचार्यैरनुव्याख्यानादौ 'अनुमा युक्तिरेवोक्ता, लिङ्गं हेतुः' इति चोक्तत्वात् तद्विरोध इत्याशङ्क्य युक्ति-लिङ्गग्रहणं कृतमिति ज्ञातव्यम् । अत्र यद्यप्युपपत्तिशब्दस्य व्याप्यपर्यायत्वेनाव्याप्ते हेतावतिव्याप्तिवारणाय न निर्दोषत्वं विशेषणम् । तथाऽप्यसिद्धे बाधितादौ चातिव्याप्तिवारकं तदिति बोध्यम् । नचैवमनुमा युक्तिरेवोक्तेत्यनुव्याख्यानेन नतु निर्दोषत्वविशेषितेति सुधया च विरोध इति वाच्यम् । तत्र युक्तिशब्देन यथार्थानुमितिजनकत्वरूपमुख्यार्थस्यैव विवक्षितत्वात् । अत्र व्याप्यत्वमात्रस्योपपत्तिशब्देन ग्रहणात् । अत एव सुधायाम् 'अत्र पुनरन्तर्गतनिर्दोषत्वं मुख्यमेवार्थमुपादाय युक्तिरित्येवोक्तम्' इत्युक्तम् । व्याप्तिघटितत्वेन व्याप्यस्य व्याप्तिलक्षणमाह- **अविनाभाव इति** ॥ अत्र भावः सत्ता । एवञ्च साध्येन विना साधनस्य भावो नेत्यनेन साध्याभाववन्निष्ठाभावप्रतियोगित्वं व्याप्तिरित्युक्तं भवति । नचैतत् सम्भवति । तुच्छस्यापि वह्निव्याप्यतापत्तेः । तदत्यन्ताभावस्य केवलान्वयित्वेन वह्न्यभाववन्निष्ठत्वात् । अत्र विवक्षितमर्थं स्वयमेवाह- **साहचर्येति** ॥ अत्र साहचर्यं स्वदेशकालविशेषगतस्य हेतोः स्वदेशकालविशेषगतेन साध्येन सम्बन्धमात्रं विवक्षितम् । नतु सामानाधिकरण्यमेव । अधोदेशे नदीपूरादावव्याप्तेः । सम्बन्धमात्रं तु तत्राप्यस्ति । वृष्टिमदूर्ध्वदेशनिरूपिताधोदेशगतत्वात् पूरस्य । एवमन्यत्रापि कृत्तिकोदयादौ हेतुसाध्यसम्बन्धमात्रमुपपादनीयम् । असतश्चोक्तरूपत्वाभावात् नातिव्याप्तिः । व्यभिचारिसम्बन्धव्यावर्तनाय नियम इत्युक्तम् । नन्वेवं नियमस्य व्याप्तिरूपतयाऽऽत्माश्रय इति चेन्न । नियमपदेनाव्यभिचारस्य विवक्षितत्वात् । तथाचाव्यभिचरितसाध्यसम्बन्धो व्याप्तिरित्युक्तं भवति । अत एवाग्रे वक्ष्यति-

'व्याप्तिरव्यभिचरितः सम्बन्धः' इति। अत्रच सम्बन्धस्याव्यभिचरितत्वं नाम स्वाभाविकत्वं विवक्षितम्। अतो हेतुधर्मस्य व्यभिचारस्य कथं सम्बन्धविशेषणत्वमिति चोद्यानवकाश इति ध्येयम्। केचित्तु हेतुसमानाधिकरणप्रतियोगिविरोध्यभावाप्रतियोगिसाध्यसामानाधिकरण्यमित्यर्थः। अतो न नियमस्य व्याप्तित्वेनात्माश्रयशङ्केत्याहुः। अत्र व्यधिकरणे नदीपूरादावव्याप्तिः कथं परिहरणीयेति चिन्त्यम्। यदर्थं व्याप्तिनिरूपणं कृतं तदिदानीमाह- व्याप्तेरिति॥ अत्र यद्यपि व्याप्त्याश्रयो व्याप्यमित्येव वक्तुमुचितः। तथाऽपि वह्निर्धूमं व्याप्नोतीति व्यवहारानुसारेणैवमुक्तमिति ध्येयम्। तत्र व्याप्तिसम्बन्धिनोर्मध्ये॥

चतुष्टयी खलु धर्माणां गतिः। केचित् समवृत्तयो यथा निषिद्धत्वपापसाधनत्वे। यत्र निषिद्धत्वं तत्र पापसाधनत्वं यत्र पापसाधनत्वं तत्र निषिद्धत्वमिति नियमात्। तत्र द्वयोरप्यन्योन्यं व्याप्यव्यापकभावः। केचिन्न्यूनाधिकवृत्तयः। यथा धूमवत्त्वाग्निमत्त्वे। तत्र न्यूनवृत्तिधूमवत्त्वं व्याप्यमेव। अधिकवृत्त्यग्निमत्त्वं व्यापकमेव। केचित् परस्परपरिहारेणैव वर्तन्ते। यथा गोत्वाश्वत्वे। यतो यत्र गोत्वं न तत्र सर्वथाऽश्वत्वम्। यत्रचाश्वत्वं न तत्र सर्वथा गोत्वम्। तेषां नान्योन्यं व्याप्यव्यापकभावः। सम्बन्धस्यैवाभावात्। केचित् क्वचित् समाविष्टा अपि क्वचित् परस्परपरिहारेणैव वर्तन्ते। यथा पाचकत्वपुरुषत्वे। तयोः पुरुषविशेषे समावेशेऽपि पाचकत्वं पुरुषत्वपरिहारेण स्त्रीषु वर्तते। पुरुषत्वमपि पाचकत्वपरिहारेणापचति पुरुषे वर्तते। तेऽपि नान्योन्यं व्याप्यव्यापकभाववन्तः। सत्यपि सम्बन्धे परस्परव्यभिचारित्वात्। तत्र व्याप्यो धर्मो व्यापकप्रमितिसाधनं भवन्ननुमानमित्युच्यते। व्यापकश्चानुमेय इति॥

(राघ.) अत्र विशेषणविशेष्ययोर्व्यावर्त्यं व्यक्तीकर्तुं तथाऽव्यभिचरितत्वं सम्बन्धिनोरन्योन्यसम्बन्धस्यान्यतरेणान्यतरसम्बन्धस्य चेति द्वेधा विवक्षितमिति दर्शयितुं च धर्माणां स्थितिमाह- **चतुष्टयीति** ॥ धर्माणां **गतिः** स्थितिः **चतुष्टयी** चतुरवयविका चतुष्प्रकारेति यावत्। सङ्ख्याया अवयवे तयबिति चतुश्शब्दादवयवार्थे तयप्। **व्याप्यमेवेति** ॥ एतेन समवृत्तयो न्यूनाधिकवृत्तयश्चोभयेऽपि लक्ष्या इति दर्शितम्। एवकारेण धूमस्याग्निसम्बन्धाव्यभिचारेऽप्यग्नेर्धूमसम्बन्धस्य व्यभिचारात् कथं तयोस्सम्बन्धोऽव्यभिचरित इति निरस्तम्। अग्नेर्धूमसम्बन्धस्यालक्ष्यत्वेनादोषतया तस्याव्यभिचरितत्वविशेषणेन व्यावर्त्यत्वादिति। सम्बन्धपदव्यावर्त्यमाह- **केचिदिति** ॥ अव्यभिचरितत्वविशेषणव्यावर्त्यमाह- **केचिदिति** ॥ एवमियता ग्रन्थेन व्याप्यमुपपत्तिरिति व्युत्पाद्याधुना करणसाधनल्युडन्तानुमानपदोक्तानुमितिकरणत्वं दर्शयन्नुपपत्तिशब्दोक्तव्याप्यस्यानुमानत्वं व्यनक्ति- **तत्रेति** ॥ व्याप्यव्यापकयोर्मध्य इत्यर्थः ॥

(वेदे.) ननु धर्माणां बहुविधत्वात् केचिद् व्यभिचारिणो येऽव्यभिचारपदव्यवच्छेद्याः। केचन व्याप्यव्यापकभावोपेता येऽत्र लक्ष्याः। नहि धूमानुमान इव सर्वत्र व्याप्य-व्यापकभावप्रकारः। कीदृशस्य व्याप्यत्वं व्यापकत्वं च ? व्याप्यव्यापकयोश्च कस्यानुमानत्वम् ? कस्य चानुमेयत्वमिति जिज्ञासायामाह- **चतुष्टयीत्यादिना** ॥ **गतिः** स्थितिः ॥

ननु पर्वते वर्तमानो धूमो गृहान्तर्वर्तिनः पुरुषस्य किमित्यग्निप्रमां न जनयति। उच्यते। न प्रत्यक्षवदनुमानमज्ञातकरणम्। किन्तु सम्यग्ज्ञातमेव। तथाऽपि नारिकेलद्वीपवासिनो देशान्तरं गतस्य धूमप्रमितावपि कस्मान्नाग्निप्रमोदयः। उच्यते। तस्य धूमस्वरूपज्ञानेऽप्यग्निव्याप्ततया तज्ज्ञानाभावात्। ज्ञातव्याप्तिकस्यापि कुतः

कदाचिदग्निप्रमाऽनुत्पत्तिः। व्याप्तिस्मरणाभावात्। व्याप्तिस्मरणवतः पर्वते धूमं दृष्टवतोऽपि कथं पर्वतादन्यत्राग्निप्रमाऽनुद्भवः। व्याप्ति-प्रकारमपेक्ष्य लिङ्गज्ञानस्य लिङ्गिज्ञानजनकत्वनियमात्। तथाहि। कयोश्चित् समानदेशकालयोर्व्याप्तिः। यथा रसस्य रूपेण। कयोश्चित् समानदेशत्वेऽपि भिन्नकालयोः। यथा धूमस्याग्निना। कयोश्चित् समानकालत्वेऽपि भिन्नदेशयोः। यथा कृत्तिकोदयस्य रोहिण्यु-दयासत्त्या। कयोश्चिद् भिन्नदेशकालयोः। यथाऽधोदेशे नदीपूर-स्योर्ध्वदेशवृष्टया। कस्यचित् कादाचित्कस्य समानदेशत्वेऽपि सार्वकालीनेन। यथा पतनस्य गुरुत्वेन। कस्यचित् समानदेशत्वेऽपि सार्वकालिकस्य कादाचित्केन। यथा शरीरत्वस्य विनाशेन। कस्यचित् प्रदेशवर्तिनो व्याप्यवर्तिना। यथा संयोगस्य द्रव्यत्वेन। कस्यचिद् व्याप्यवर्तिनः प्रदेशवर्तिना। यथा रूपस्य संयोगेन। कयोश्चिदेकावयवविवर्तिनोरप्यवयवभेदेन। यथा तुलोन्नमनावन-मनयोरित्यादि। तथाच व्याप्तिज्ञानतत्स्मरणसहितं लिङ्गस्य सम्यग्ज्ञानं सम्यग्ज्ञातं वा लिङ्गं व्याप्तिप्रकारानुसारेण समुचितदेशादौ लिङ्गिप्रमां जनयदनुमानमित्युक्तं भवति। अत एव लिङ्गिस्वरूपस्य ज्ञातत्वेऽपि देशविशेषादिसंसृष्टतया ज्ञापकत्वान्नानुमानस्य वैयर्थ्यम्। ततश्चानु-मानस्य द्वयं सामर्थ्यम्। व्याप्तिः समुचितदेशादौ सिद्धिश्चेति। नतु पक्षधर्मतानियमः॥

(राघ.) प्रमितिसाधनमित्युक्त्या यथार्थज्ञानसाधनत्वेनानुप्रमाणान्तर्गतिः सूचिता। व्याप्यस्य व्यापकप्रमितिसाधनत्वमसिद्धमिति भावेनाशङ्क्य व्याप्ति-स्मरणं व्याप्यज्ञानं वाऽनुमितिसामग्रीत्याह- नन्वित्यादिना व्याप्तिस्मरणा-

भावादित्यन्तेन ॥ उक्तसामग्र्या अप्यनुमितिसाधनत्वाभावमाशङ्क्य व्याप्ति-स्मृतिसापेक्षत्वमिव व्याप्तिप्रकारसापेक्षत्वमपि व्याप्यज्ञानस्य लिङ्गिज्ञानजनने सामग्रीति परिहरति- **व्याप्तिप्रकारमिति** ॥ व्याप्तिप्रकारं प्रतिज्ञापूर्वं नवधा दर्शयति- **तथा हीत्यादिनेत्यादीत्यन्तेन** ॥ **रसस्य रूपेणेति** ॥ यत्र रसस्तत्र रूपं, यदा रसस्तदा रूपमिति च पृथिवीजलयोर्व्याप्तिसत्त्वादिति भावः । **यथा धूमस्येति** ॥ यत्र धूमस्तत्राग्निरितिवन्न समानकालत्वम् । कार्यकारणभावापन्नत्वेन धूमाग्न्योः पूर्वापरकालत्वनियमादिति भावः । **रोहिण्युदयासत्त्या** रोहिण्युदय-सान्निध्येनेत्यर्थः । **शरीरत्वस्य विनाशेनेति** ॥ यच्छरीरं तद्विनाशीति व्याप्तेरिति भावः । **संयोगस्य द्रव्यत्वेनेति** ॥ यत्र संयोगस्तत्र द्रव्यत्वमिति व्याप्तेरिति भावः । **रूपस्य संयोगेनेति** ॥ यत्र रूपं तत्र संयोग इति पृथिव्यादित्रिषु व्याप्तेरिति भावः । **एकावयवीति** ॥ तुलारूपैकावयवीत्यर्थः । इत्यादीत्यादिपदेन भिन्नदेशयोः समानकालयोर्व्याप्यवर्तिनोर्पक्षिगमनतच्छायागमनयोर्व्याप्तिरित्यादेर्ग्रहः। ततश्च किं प्रकृत इत्यत आह- **तथाचेति** ॥ व्याप्तिप्रकारस्यानेकविधत्वे सतीत्यर्थः । **समुचितदेशादौ लिङ्गिप्रमां जनयदिति** ॥ एवञ्च धूमस्य स्वसमानदेशस्थेन वह्निना व्याप्तिरिति स्वसमानदेश एव लिङ्गिप्रमाजनकत्वं न पर्वतादन्यत्रेति भावः । व्याप्तिप्रकारस्यानेकविधत्वोक्त्या समानाधिकरणयोरेव व्याप्तिरिति तार्किकमतं निरस्तं ध्येयम् । ननु व्याप्तिग्रहदशायामेव वह्न्यादिसाध्यस्य ज्ञातत्वात् किमनु-मानेनेत्यत आह- **अत एवेति** ॥ समुचितदेशे लिङ्गिप्रमाजनकत्वादेवेत्यर्थः । **ततश्चेति** ॥ लिङ्गस्य व्याप्तिप्रकारमपेक्ष्य समुचितदेशे काले च लिङ्गिप्रमाजनक-त्वादेवेति वा भिन्नदेशकालयोरपि व्याप्तिप्रकारस्योक्तत्वादेवेति वाऽर्थः ॥

(वेदे.) ननु व्याप्यो धूमो व्यापकप्रमितिं जनयन्ननुमानं चेद् व्यवहित-धूमोऽप्यग्निप्रमां जनयेत् । नहि जनयति, अनुभवविरोधात् । तथा चाननुमानेऽपि तस्मिन्निर्दोषोपपत्तित्वसत्त्वादतिव्याप्तिरित्याशङ्कते- **नन्विति** ॥ व्याप्योऽपि धूमो

न सत्तामात्रेणेन्द्रियवत् प्रमाकरणं किन्तु प्रमित एव । तथाच तत्राज्ञातत्वरूपदोषस्यैव सत्त्वान्नातिव्याप्तिरित्याह- **उच्यत इत्यादिना** ।। एवमग्रेऽपि तथा-तथा ज्ञातव्यम् । न दोष इति च मन्तव्यम् । नन्वेवं यदुक्तरूपं लिङ्गं पर्वते इवान्यत्राप्यग्निप्रमां कुतो न जनयेत् । नहि कुठारो देशविशेष एव हेतुरित्याशङ्कते- **व्याप्तीति** ।। समुचितदेशे प्रकृष्टसम्बन्धवत्तया ज्ञातस्यैव लिङ्गस्यानुमानत्वेन फलबलेन कल्पनात् । नहि सर्वकरणैरेकविधैर्भाव्यमिति नियमोऽस्ति । अतिप्रसङ्गात् । अतो नोक्तदोष इति परिहरति- **व्याप्तीति** ।। व्याप्तिप्रकारं व्याप्तिप्रविष्टसम्बन्धम् । एवमग्रेऽपि । व्याप्तिप्रविष्टसम्बन्धमेवाह- **तथाहीत्यादिना** ।। एवमनुमानस्यानुमितिजनकत्वप्रकारं निरूप्योक्तार्थं सङ्गृह्योपसंहरति- **तथा-चेति** ।। सम्यग्ज्ञातं वा लिङ्गमिति वर्तमानलिङ्गाभिप्रायेण । वस्तुतस्त्वतीतानागतादावव्यभिचाराल्लिङ्गज्ञानमेव सर्वत्र मानमिति द्रष्टव्यम् । समुचितदेशादावित्यस्यावश्यकत्वे उपष्टम्भकमाह- **अत एवेति** ।। एवं सति पक्षधर्मतायाः नावश्यकतेत्याह- **ततश्चेति** ।। नन्वधोदेशगतनदीपूरकत्वादित्यादिप्रयोगेण सर्वत्र पक्षधर्मता सम्पादयितुं शक्या । अतः कथं तदनियम इति चेत् । किमेवं प्रयोगविपरिणामो लौकिकरीतिमाश्रित्योत स्वप्रक्रियासंरक्षणार्थः । नाद्यः । लौकिका ह्यूर्ध्वदेशे वृष्टिः कुत इति पृष्टा अधोदेशे नदीपूरादित्येव वदन्ति । न द्वितीयः । सिद्धे प्रयोगपरिणामे व्यभिचाराभावेन प्रक्रियाप्रामाण्यसिद्धिः । तत्सिद्धौ च प्रयोगपरिणामसिद्धिरित्यन्योन्याश्रयात् ।।

ननु व्याप्तिज्ञानं केन प्रमाणेन जायते । यथायथं प्रत्यक्षानुमानागमैरिति ब्रूमः । तत्र तावद् धूमस्याग्निना व्याप्तिः प्रत्यक्षगम्या । तथाहि । महानसादौ धूमाग्न्योः साहचर्यं पश्यतः पुरुषस्यैष विमर्शो जायते । किमत्रैवैतौ धूमाग्नी सहचरितावन्यत्र देशान्तरे कालान्तरे चैतज्जातीयौ परस्परपरिहारेण वर्तेते उतान्यतर एवान्यतर-

परिहारेण किंवा सकलदेशकालयोः सहचरितावेवेति। ततो भूयोभूयो धूमं पश्यन्नग्निं पश्यति। अग्न्यभावे च धूमाभावम्। तथा धूमाभावेऽपि क्वचिदग्निसद्भावम्। ततः पुनरेष विचारो भवति। यथा बहुषु स्थलेषु धूमेन सहचरितोऽप्यग्निः क्वचित् तं परित्यज्य वर्तते। तथा धूमो मत्परिचितस्थलेष्वग्निना सह वर्तमानोऽपि क्वचित् तं परित्यज्य वर्तते। किंवा सर्वत्र तत्सहचरित एवेति। ततः पुनरेषा बुद्धिरुत्पद्यते। अग्नेर्धूमसम्बन्धेऽस्त्यार्द्रेन्धनसंयोग उपाधिः। स च धूमव्यापकः स्वयं व्यावर्तमानस्तं व्यावर्तितवान्। न पुनरग्निम्। तदव्यापकत्वात्। तथा धूमस्याग्निसम्बन्धे यदि कश्चिदुपाधिः स्यात् तदा सोऽप्यग्निं व्यभिचरिष्यति। नचेन्निर्निमित्तस्य सम्बन्धस्य धूमस्वभावत्वेन न क्वापि तदभावो भविष्यतीतित्येवं निश्चित्य महानसादावुपाधिगवेषणे प्रवर्तते॥

(राघ.) ननु प्रत्यक्षस्य सन्निकृष्टमात्रग्राहितया नियमघटितसहचाररूपव्याप्तिग्रहे सामर्थ्यं नेति भावेन शङ्कते- **नन्विति**॥ यद्वा तर्केणैव व्याप्तिज्ञानम्। तर्कस्य च व्याप्तिसापेक्षत्वादनवस्थेति भावेन शङ्कते- **नन्विति**॥ भूयोदर्शनव्यभिचाराभावनिश्चयोपाध्यभावनिश्चयरूपसहकारिसामर्थ्यात् प्रत्यक्षाद्येव तद्ग्राहकं न तर्क इति भावेनाह- **यथायथमिति**॥ अव्ययं विभक्तीत्यादिनाऽव्ययीभावसमासः। स्वस्वयोग्यतामनतिक्रम्येत्यर्थः। जायते व्याप्तिज्ञानमित्यनुषङ्गः। प्रतिज्ञातं प्रत्यक्षगम्यत्वं भूयोदर्शनादिसहकारित्रयव्यक्तीकरणेन दर्शयति- **तथाहीत्यादिनाऽनुमानगम्यां त्वित्येतत्पर्यन्तग्रन्थेन**॥ एष **विमर्शो** वक्ष्यमाणो विचारः। **एतज्जातीयौ** एतत्सदृशौ। **अन्यतर एव** अग्निरेव। **सहचरितावेवेति** कृतकत्वानित्यत्वयोरिवेति भावः। इति विमर्श इति पूर्वेणान्वयः। **तत** एवं विमर्शानन्तरं **भूयोभूयः** पुनःपुनः। पश्यतीति पदमुत्तरवाक्यद्वयेऽप्यनुषज्यते।

एवं भूयोदर्शनप्रकारं प्रदर्श्योपाध्यभावनिश्चयेनैव व्यभिचाराभावनिश्चय इति भावेनोपाध्यभावनिश्चयप्रकारं दर्शयितुं व्यभिचारसन्देहप्रकारं तावदाह- **ततः पुनरेव विचार इति**॥ भूयः सहचारदर्शनानन्तरं व्यभिचारसन्देहगोचरो विचार इत्यर्थः। तं व्यनक्ति- **यथेति**॥ तथेत्यग्रेतनेनास्यान्वयः। इदानीमुपाधिभावाभावाधीनौ व्यभिचारतदभावावित्याह- **ततः पुनरेषा बुद्धिरिति**॥ व्यभिचारसन्देहानन्तरमुपाधिभावाभावाधीनौ व्यभिचारतदभावाविति बुद्धिरुत्पद्यत इत्यर्थः। तां व्यनक्ति- **अग्नेरिति**॥ यथेत्यनुषङ्गः। तथेत्यन्वयः। **तमिति**॥ धूममग्नितो **व्यावर्तितवान्** अयोगोलकादौ। न पुनरग्निं धूमवन्महानसादौ व्यावर्तितवानित्यर्थः। तत्र हेतुः तदव्यापकत्वादिति। एतेनार्द्रेन्धनसंयोगे साधनाव्यापकत्वे सति साध्यव्यापकत्वरूपोपाधिलक्षणमपि सूचितं भवति। **उपाधिः स्यादिति**॥ धूमाव्यापको वह्निव्यापकश्च धर्मः स्यादित्यर्थः। **सोऽपि** धूमोऽपीत्यर्थः। **तदभावः** अग्निसम्बन्धाभाव इत्यर्थः। **इति निश्चित्येति**॥ व्यभिचारभावाभावावुपाधिभावाभावाधीनाविति निश्चित्येत्यर्थः। **उपाधीति**॥ साधनधूमाव्यापकवह्निव्यापकधर्मगवेषण इत्यर्थः॥

तत्र केचिद् धर्मा उभयव्यापकाः। यथा प्रमेयत्वम्। नैतत् सम्बन्धं विघटयितुमीशते। केचिदुभयाव्यापकाः। यथा महानसत्वम्। तेऽपि नैतत्सम्बन्धविघटनाय समर्थाः। केचिद् धूमव्यापका अग्न्यव्यापकाः। यथाऽऽर्द्रेन्धनसंयोगः। तेऽप्यग्नेर्धूमवियोजने शक्ता अपि न धूमस्याग्निवियोजने। यस्त्वग्नेर्व्यापको धूमस्य त्वव्यापकः स स्वयं व्यावर्तमानः शक्ष्यत्येतत्सम्बन्धं विघटयितुम्। स तु नास्त्येव। अनुपलम्भात्। अतीन्द्रियोऽपि प्रमाणान्तरवेद्यः स्यात्। नच तत्प्रमाणमुपलभ्यते। नचाप्रामाणिकः शङ्कामप्यधिरोहति। अतो नात्रोपाधिरस्तीति निर्णीतवतोऽविनाभावप्रमितिरुत्पद्यते॥

(राघ.) अभावं निर्धारयितुमुपाधिं परिशेषयति- **तत्रेति** ।। व्याभिचार-भावाभावयोरुपाधिभावाभाधीनत्वे सतीति वा धर्मेषु मध्य इति वाऽर्थः। उपलक्षण-त्वेनैकमुदाहरति- **यथा प्रमेयत्वमिति** ।। एवमग्रेऽपि। अत एव त इत्यग्रे बहु-वचनोक्तिः । **तत्सम्बन्धं** धूमस्याग्निसम्बन्धमित्यर्थः । स्वनिवृत्तेरेवाभावेन कथमग्निसम्बन्धं धूमस्य व्यावर्तयेदिति भावः। **तेऽपि न शक्ता इति** ।। अव्यापकस्य साध्यव्यावर्तनेऽतिप्रसङ्गादिति भावः । **न धूमस्याग्निवियोजन इति** ।। शक्ता इत्यनुषङ्गः। धूमव्यापकः स्वयं व्यावर्तमानः स्वाव्याप्यं धूममेव व्यावर्तयति। नतु धूमं स्थापयित्वा तस्याग्निसम्बन्धं व्यावर्ततीत्यर्थः । एवं प्रसक्तांस्त्रिविधान् धर्मानुपाधित्वासम्भवेन निरस्योपाधित्वेन सम्भावितं धर्मं परिशेषयति- **यस्त्व-ग्नेरिति** ।। **तं सम्बन्धं** धूमस्याग्निसम्बन्धमित्यर्थः। सम्भावितं धर्मं परिशेष्याधुना तदभावनिर्धारणप्रकारमाह- **स तु नास्तीति** ।। **अत इति** ।। अप्रामाणिकत्वात् तादृशस्य शङ्कानर्हत्वाच्चेत्यर्थः । **उपाधिरिति** ।। व्याभिचारापादक इति योज्यम्। **अविनाभावेति** ।। साध्यत्वाभिमतवस्तुसाहित्येनैव सत्त्वरूपाव्यभि-चरितसम्बन्धप्रमितिरित्यर्थः।

नन्वत्र धूमस्याग्निसम्बन्धे उपाधिरैन्द्रियकश्चेदुपलभ्येत नोपलभ्यते। अतोऽ-नुपलम्भान्नास्तीति। अतीन्द्रियश्चेत् प्रमाणान्तरवेद्यः स्यात्। नच तत्प्रमाण-मुपलभ्यते। अप्रामाणिकं न शङ्कार्हम्। अतोऽत्र नास्त्युपाधिरिति तर्केणोपाध्य-भावं निश्चित्य तेन तदधीनव्यभिचाराभावनिश्चयेन व्याप्तिनिश्चये तर्कस्यापि व्याप्तिधीसापेक्षत्वादनवस्था स्यादिति चेन्न। उपाधिसन्देहे सत्येव तदपनयेन तदभावनिर्णयाय तर्कस्यावतारात्। अत एव प्रागुपाधिसन्देह एव प्रदर्शितः। यत्र तु नोपाधिसन्देहो न तत्र तर्कावतार इति नानवस्थेति तात्पर्यात्। वक्ष्यति चान्ततः प्रत्यक्षागममूलत्वादिति। उक्तं हीत्थमेव तर्कताण्डवे खण्डनोक्ति-व्याप्तिनिश्चयानुपपत्तिभङ्गे ।।

नन्वेवं सति न प्रत्यक्षं व्याप्तिग्राहकम् । मैवम् । यतः साहचर्यग्राहिणः प्रत्यक्षस्य भूयोदर्शनव्यभिचारादर्शनोपाध्यभावनिश्चयाः सहकारिणः । नच सहकारिभेदेऽपि प्रत्यभिज्ञायामिव प्रमाणान्तरत्वम् । वर्तमानसन्निकृष्टमात्रग्राहिप्रत्यक्षं कथमतीताद्यास्पदां व्याप्तिं गृह्णीयादिति चेन्न । सहकारिसामर्थ्येन करणानां शक्त्यन्तराविर्भावस्य वहुलमुपलम्भात् ॥

(राघ.) नन्वेवमिति ॥ तर्काधीनोपाध्यभावनिश्चयायत्तव्यभिचाराभावनिर्णयसहकृतभूयोदर्शनजन्यत्वे व्याप्तिज्ञानस्य स्वीकृते सतीत्यर्थः । यत इत्यस्य यतः सहकारिणोऽतो मैवमिति योजना । भूयोदर्शनव्यभिचारादर्शने द्वे एव सहकारिणी । उपाध्यभावनिश्चयस्तु व्यभिचाराभावनिश्चये हेतुरिति कृत्वा सोऽप्यत्र सहकारित्वेनोपात्त इति ध्येयम् । सहकारिभेदे मानान्तरापत्तिरित्यत आह- **नचेति** ॥ संस्काररूपसहकारिभेदेन चक्षुर्जन्यप्रत्यभिज्ञायां यथा न प्रमाणान्तरता तथा व्याप्तिनिश्चयस्यापि । किन्तु प्रत्यक्षत्वमेवेत्यर्थः । सन्निकृष्टकतिपयधूमादिव्यक्तिषु व्याप्तिग्रहेऽपि देशकालव्यवहितव्यक्तिषु कथं व्याप्तिग्रहः । तत्र न्यायमत इव सामान्यप्रत्यासत्तेरभावेन तत्र चक्षुषोऽसामर्थ्यात् । तत्र व्याप्त्यग्रहे चापूर्वधूमदर्शनाद् वह्निधीर्न स्यादितिभावेन शङ्कते- **वर्तमानेति** ॥ **बहुलमुपलम्भादिति** ॥ संस्काररूपसहकारिसामर्थ्याहितशक्तिकस्य चक्षुषोऽतीतवर्तमानविषयप्रत्यभिज्ञाजनकत्वदर्शनात् । तथा गन्धानुभवजन्यसंस्काराहितशक्तिकस्य चक्षुषश्चन्दनखण्डे सुरभिश्चन्दनखण्ड इति साक्षात्कारजनकत्वदर्शनाद् दोषाहितशक्तिकस्य चक्षुष इदं रूप्यमित्यसद्रूप्यविषयकधीजनकत्वदर्शनात् । दावदग्धवेत्रबीजस्य कदलीकाण्डजनकत्वदर्शनादित्यर्थः । तथाच भूयोदर्शनव्यभिचाराभावश्चियोपाध्यभावनिश्चयजन्यसंस्काराविर्भूतशक्तिकस्य चक्षुषोऽतीतादिधूमनिष्ठव्याप्तिविषयकत्वोपपत्तिरिति भावः । नचैवं धूमवह्नि-

गोचरभूयोदर्शनसहकार्याहितशक्तिकं चक्षू रूपरसादिविजातीयगतव्याप्तिं गृह्णीयादिति शङ्क्यम्।

'इति व्युत्पत्तिरपि हि सादृश्येनैव गम्यते।'

इत्यनुव्याख्यानसुधोक्तरीत्या भूयोदर्शनजनितसंस्काराविर्भूतशक्तिकं चक्षुः स्वसन्निकृष्टव्यक्तिनिष्ठसादृश्यप्रतियोग्यतीतादिग्राहकमित्यत्र तात्पर्यात्॥

(वेदे.) एवं सतीति॥ उक्तविचारसाध्योपाध्यभावज्ञानस्य व्याप्तिग्रहणहेतुत्वरूपेत्यर्थः। **यत इति**॥ अत्र भूयोदर्शनव्यभिचारादर्शनयोरेव सहकारित्वम्। उपाध्यभावनिश्चयग्रहणं तु उपाधिशङ्कास्थलाभिप्रायं नतु सार्वत्रिकाभिप्रायम्। अन्यथोपाध्यभावनिश्चयस्य व्याप्तिसापेक्षोक्तविमर्शाधीनत्वेनानवस्थानात्। नन्वेवं व्याप्तिज्ञानं न प्रत्यक्षफलमपितु विजातीयम्। प्रत्यक्षे क्लृप्तसामग्र्यजन्यत्वात्। तथाच तद्धेतोर्भूयोदर्शनादेः प्रमाणान्तरत्वमित्यत आह - **नचेति**॥ सहकारिभेदेऽपि प्रमाणान्तरत्वं नचेति सम्बन्धः। अयं भावः। स्यादिदं यदि भूयोदर्शनादिकमेव स्वातन्त्र्येण व्याप्तिग्राहकं स्यात्। नचैवम्। यतो भूयोदर्शनादिकं व्याप्तिग्राहकप्रत्यक्षस्य सहकारीत्युक्तम्। नच सहकारिमात्रभेदे फलस्य विजातीयत्वम्। प्रत्यभिज्ञाया अपि तथात्वापातादिति। **कथमतीतेति**॥ सर्वोपसंहारेण कथं व्याप्तिग्रहः। सामान्यलक्षणानभ्युपगमादिति भावः। **सहकारीति**॥ प्रत्यभिज्ञायामेव दर्शनादिति भावः। अञ्जनादिसहकारिसामर्थ्येन चक्षुषो व्यवहितधनादिज्ञानजनकत्वस्य दर्शनादित्याहुः। सहकारिसामर्थ्येनेत्युपलक्षणम्। सामान्यलक्षणप्रत्यासत्त्यभावेऽपि वक्ष्यमाणरीत्या सादृश्यस्यैवातीतादिना प्रत्यासत्तित्वसम्भवात् सर्वोपसंहारेण व्याप्तिग्रहोपपत्तिरिति ध्येयम्॥

किञ्च प्रतीतस्य धूमस्याग्निसम्बन्धे स्वाभाविकतया निश्चिते यद्यन्यत्रापि धूमः स्यात् तर्हि तस्याप्येवमित्येवं व्याप्तिग्रहो भवती-

त्यतः काऽत्रानुपपत्तिः । एतेन प्रमेयत्वाभिधेयत्वयोर्व्याप्तिं गृह्णतः सार्वज्ञ्यप्रसङ्ग इत्यपि परास्तम् ।

कुत एतत्सर्वं कल्प्यत इति चेत् । कार्यदर्शनादेव । अस्ति तावद् धूमदर्शनानन्तरमग्निज्ञानम् । नच तदयथार्थम् । संवादित्वात् । नचान्यदर्शनेनान्यज्ञानं निर्निमित्तं भवितुमर्हति । अतिप्रसङ्गात् । नच व्याप्तिप्रमां समुचितदेशत्वप्रमां चापहाय निमित्तान्तरमस्तीति कार्यमेवैतत् कल्पयति । यथा खलु शिलाशकलादावनुपलब्धामपि क्षितिसलिलादिसहकारिसमुद्भूतां बीजस्य शक्तिमङ्कुरदर्शनं कल्पयतीति । अनुमानगम्यां तु व्याप्तिमुत्तरत्रोदाहरिष्यामः । नच तस्याप्यनुमानस्य व्याप्त्यपेक्षायामनवस्था । अन्ततः प्रत्यक्षागममूलत्वात् । ब्राह्मणो न हन्तव्यो, गौर्न पदा स्प्रष्टव्येत्यागमगम्या व्याप्तिः । नचात्र कश्चित् क्षुद्रोपद्रवो नापि दृष्टान्तापेक्षेति ॥

(राघ.) अनुमानादिना तत्र व्याप्तिग्रह इति पक्षान्तरमाह- **किञ्चेति** ॥ **निश्चित इति** ॥ प्रागुक्तदिशा प्रत्यक्षेणाप्तोपदेशेन वा निश्चिते सति तस्याप्येवं व्याप्यत्वम् । पुरोवृत्तिधूमनिष्ठस्वरूपतत्सादृश्यप्रतियोगित्वेन व्यवहितधूमव्यक्त्युपस्थितौ सत्यां यद्यन्यत्र धूमः स्यात् तर्हि सोऽपि वह्निव्याप्यो धूमत्वादेतद्धूमवदित्यनुमानेन, यद्यन्यत्रापि धूमः स्यात् सोऽपि वह्निव्याप्यः स्यान्न चेद् वह्निव्याप्यस्तर्ह्येतत्सदृशो न स्यात् । एतन्निष्ठसादृश्यप्रतियोगी वा न स्यात् । भवति च तथा । अतो वह्निव्याप्य इति तर्केण वा तद्ग्रह इति न काऽप्यनुपपत्तिरित्यर्थः । **एतेनेति** ॥ विप्रकृष्टानुमितिरूपत्वेनेत्यर्थः । तर्कताण्डवे तु- व्याप्तिज्ञानं यद्यन्यत्रापि धूमः स्यात् तर्हि तस्याप्येवमिति विप्रकृष्टव्याप्यांशे सम्भावनारूपम् । न निश्चयरूपम् । व्याप्त्यंशे तु निश्चयरूपमिति नृसिंहाकारमिति पूर्ववाक्यार्थमुक्त्वा एतेन सर्वत्र निश्चय-

रूपत्वाभावेन न सार्वज्ञप्रसङ्ग इत्यर्थः उक्तः । विस्तरस्तु खण्डनोक्तसार्वज्ञ-प्रसङ्गभङ्गे ध्येयः । **एतत्सर्वमिति** ॥ लिङ्गप्रमितिव्याप्तिस्मृत्योरनुमितिहेतुत्वं भूयोदर्शनादेर्व्याप्तिधीहेतुत्वं व्याप्तिप्रकारमपेक्ष्यानुमितिजनकत्वं शक्त्यन्तर-कल्पनेत्यादिकं सर्वमित्यर्थः । **अतिप्रसङ्गादिति** ॥ घटज्ञानात् पटधीप्रसङ्गादि-त्यर्थः । **कार्यमेवेति** ॥ अग्निज्ञानरूपमेवेत्यर्थः । तत्र दृष्टान्तो यथेति ॥ छ ॥ **प्रत्यक्षेण व्याप्तिग्रहोक्तिः ॥ छ ॥**

उत्तरत्रेति ॥ केवलव्यतिरेक्युक्तिप्रस्तावे इत्यर्थः । **इत्यागमगम्येति** ॥ इत्यागमाभ्यां ब्राह्मणत्वाहन्तव्यत्वयोः, गोत्वपदाऽस्प्रष्टव्यत्वयोः व्याप्तिर्गम्ये-त्यर्थः । **नचात्रेति** ॥ व्याप्तेरागमगम्यत्वविषये भूयोदर्शनादिसापेक्षत्वं शक्त्यन्तर-कल्पनाऽनुमानगम्यव्याप्ताविवानवस्था अनाश्वासशङ्काव्यवहिते व्याप्तिग्रहायोग इत्यादिक्षुद्रोपद्रवो नास्ति । अनयोर्वाक्ययोः योयो ब्राह्मणस्स न हन्तव्य इति तात्पर्येण ब्राह्मणसामान्यस्यैव हननप्रतिषेधेन सर्वेष्वपि हननाभावावगतेरिति भावः । इतिशब्दः प्रत्यक्षादिप्रमाणत्रयगम्यव्याप्त्युक्तिसमाप्तौ ॥

(वेदे.) तुष्यत्विति न्यायेनाह- **किञ्चेति** ॥ माऽस्तु प्रत्यक्षेणातीतादिधूमे व्याप्तिग्रहः । वर्तमानधूमनिष्ठव्याप्तौ प्रत्यक्षेण निश्चितायां तद्धूमदृष्टान्तेन विप्रतिपन्नो धूमोऽग्निव्याप्तो भवितुमर्हति धूमात् परिदृश्यमानधूमवदिति धूमवत्त्वादिहेतुना तत्रापि व्याप्तिग्रह इति स्वीकारे बाधकाभावात् । नचैवमनुमानगम्यां त्वित्युत्तर-ग्रन्थविरोधः । अतीतादाविव वर्तमानेऽपि लिङ्गे व्याप्तेः केवलानुमानगम्यत्वस्य तदर्थत्वादिति भावः । यद्वा 'यद्यतिथिरागच्छेत् तर्हि स भोजयितव्यः' इत्यादौ वाक्यजन्यज्ञानस्य निमित्तांशे सम्भावनारूपत्वं तस्मिन् सति नैमित्तिकं कार्यमित्यंशे तु निश्चयरूपत्वमित्येवं नरसिंहाकारत्वं तथा प्रकृतेऽपि व्याप्यांशे सम्भावनारूपं व्याप्त्यंशे तु निश्चयरूपमिति नरसिंहाकारमतीतादिलिङ्गे व्याप्तिज्ञानमित्याह- **किञ्चेति** ॥ सर्वोपसंहारेण व्याप्तिग्रहे खण्डनोक्तदूषणं परिहरति- **एतेनेति** ॥

अत्रोक्तं खण्डने- एवं चेत् प्रमेयत्वाभिधेयत्वयोर्व्याप्तिं गृह्णतः सार्वज्ञं स्यात् । तथाच सर्वगताशेषविशेषाणां ज्ञातत्वादयं च न वेति संशयादिकं न स्यादिति । तदप्येतेनोक्तरीत्याऽतीतादिलिङ्गेऽनुमानेनैव व्याप्तिज्ञानाङ्गीकारेण नरसिंहाकार-ज्ञानाङ्गीकारेण वा निरस्तमित्यर्थः । येन सामान्यलक्षणयाऽशेषपदार्थान् ज्ञात्वा तत्र व्याप्तिर्गृह्यत इत्युच्यते । तं प्रतीदं त्वदीयं दूषणं नास्माकमिति भावः । ननु तथाऽपि सहकारिसामर्थ्येन वा सादृश्यरूपप्रत्यासत्त्या वा प्रत्यक्षेणैवातीतादौ व्याप्तिग्रह इति पूर्वोक्तपक्षे सार्वज्ञप्रसङ्गोऽनिवार्य इति चेन्न । 'सर्वं सामान्यतो यस्मात् सर्वैरेवानुभूयते' इत्याचार्यैरुक्तत्वेन सामान्यतः सार्वज्ञस्येष्टत्वात् । विस्तरस्तु तर्कताण्डवे द्रष्टव्यः ।

एवं प्रत्यक्षगम्यां व्याप्तिमुदाहृत्येदानीमनुमानगम्या व्याप्तिः केत्यपेक्षाया-माह- **अनुमानेति** ।। परोक्तकेवलव्यतिरेक्यनुमानदूषणावसरे व्यतिरेक-व्याप्त्याऽन्वयव्याप्तिरनुमेयेति वक्ष्याम इति भावः । **नचात्रेति** ।। अनुमानागम-गम्यव्याप्तावित्यर्थः । **क्षुद्रोपद्रवः** वर्तमानमात्रग्राह्यत्वात् कथमतीताद्यास्पद-व्याप्तिग्राहकत्वमित्यादिरूपः । प्रत्यक्षस्य तथा नियमेऽप्यनुमानागमयोर्वर्तमान-मात्रग्राहित्वनियमाभावादिति भावः । **नापि दृष्टान्तापेक्षेतीति** ।। येन तस्याप्यागमान्तरवेद्यत्वेऽनवस्थेति शङ्कावकाश इति भावः ।।

।। अथानुमान विभागः ।।

त्रिविधमनुमानम् । कार्यानुमानं कारणानुमानमकार्यकारणानु-मानं चेति । तत्राद्यं यथा । धूमोऽग्नेः । द्वितीयं यथा । विशिष्टमेघो-न्नतिर्वृष्टेः । इयांस्तु विशेषः । कार्यं कारणमात्रमनुमापयति । कारणं तु समग्रमेव कार्यमिति । तृतीयं यथा । रसो रूपस्येति । पुनर्द्विवि-धम् । दृष्टं सामान्यतो दृष्टं चेति । तत्र प्रत्यक्षयोग्यार्थानुमापकं

दृष्टम् । यथा धूमोऽग्नेः । प्रत्यक्षायोग्यार्थानुमापकं सामान्यतो दृष्टम् । यथा रूपादिज्ञानं चक्षुरादेः । अथवा यथाभूतयोर्व्याप्तिग्रहणं तथाभूतयोरेव लिङ्गलिङ्गिभावे दृष्टम् । यथा धूमाग्न्योः । व्याप्य-व्यापकयोरन्यादृशत्वेऽपि तत्सामान्याकारानुगमेन लिङ्गलिङ्गिभावे सामान्यतो दृष्टम् । यथा कृषीवलस्य कर्षणादिप्रवृत्तेर्धान्यादि-फलयत्त्वदर्शनेन यज्ञादेः स्वर्गादिफलानुमानम् । प्रेक्षावत्प्रवृत्तित्व-फलवत्त्वसामान्यानुगमात् ॥

(राघ.) पूर्वं कार्यमेवैतत् सर्वं कल्पयतीत्युक्त्या कार्यरूपमेकविधमेवानुमान-मिति धीनिरासाय वादिविप्रतिपत्तिनिरासाय चाह- **त्रिविधमिति** ॥ कार्यानुमान-मित्यादौ कर्मधारयः करणे ल्युट् । कार्यं सत्कारणस्यानुमापकं यत् तत् कार्यानु-मानमित्यर्थः । एवमग्रेऽपि । **विशिष्टेति** ॥ उदकपूर्णमेघस्यौन्नत्यमित्यर्थः । ननु कार्यात् कारणानुमाने धूमोऽग्नेरित्येवोक्तम् । न त्वार्द्रेन्धनाग्नेरिति विशेषणमुपा-त्तम् । कारणात् कार्यानुमाने तु विशिष्टमेघोन्नतिरिति कारणे विशेषणमुक्तम् । कुत एवमित्यतो वा कार्यानुमानसम्भवेऽपि न कारणानुमानं युक्तम् । अयोगोलके सत्यप्यग्नौ धूमाभावेन व्याप्त्यभावादित्यतो वाऽऽह- **इयांस्त्विति** ॥ कारणमात्रं न तत्र व्यापकीभूते समग्रत्वविशेषणम् । कारणमात्रेणापि व्याप्तिसत्त्वेन विशेषण-कृत्याभावात् । कारणं तु **समग्रमेव** कृत्स्नकारणकलाप एव कार्याव्यभिचारात् कार्यमनुमापयति । न त्वेकदेश इत्यर्थः । **यथा रूपादिज्ञानमिति** ॥ रूपज्ञानं करणसाध्यं जन्यक्रियात्वाच्छिदिक्रियावत् । करणं च न घ्राणादि । तस्य गन्धादि-ज्ञानकरणत्वादिति सामान्यपरिशेषाभ्यां वा रूपज्ञानं चक्षुःकरणकम् । तदन्वय-व्यतिरेकित्वादिति वा । अयं चक्षुष्मान् रूपज्ञानित्वात् सम्मतवदिति वा । चक्षु-षोऽनुमापकम् । एवं गन्धादिज्ञानं घ्राणादेरित्यर्थः । **व्याप्यव्यापकयोरिति** ॥ दृष्टान्ते व्याप्तिनिरूपकयोरित्यर्थः । **यज्ञादेरिति** ॥ यज्ञादिप्रवृत्तेरित्यर्थः । यज्ञादि-

प्रवृत्तिः स्वर्गादिफलवती प्रवृत्तित्वात्। कृषीवलस्य धान्यादिफलकर्षणादिप्रवृत्तिवदिति प्रयोगे कृषीवलस्य कर्षणादिप्रवृत्तेर्धान्यादिफलत्वेऽपि यज्ञादिप्रवृत्तेस्तत्कुत इति चोदिते प्रेक्षावत्प्रवृत्तित्वाविशेषादित्युक्त्वा यत्र प्रेक्षावत्प्रवृत्तित्वं तत्र फलवत्त्वमिति नियमादिति व्याप्यव्यापकभाव इत्युच्यते। तत्र यज्ञादिप्रवृत्तित्वस्वर्गादिफलत्वयोर्लिङ्गलिङ्गिशब्दितज्ञाप्यज्ञापकभावः प्रेक्षावत्प्रवृत्तित्वफलवत्वयोर्व्याप्यव्यापकभाव इत्यादिरूपमपि सामान्यतो दृष्टानुमानमित्यर्थः॥

(वेदे.) **अकार्यकारणानुमानम्** कार्यकारणभिन्नानुमानम्। **विशिष्टं इति॥** इतरकारणविशिष्ट इत्यर्थः। कारणमात्रं नेतरकारणविशिष्टम्। यत्कार्यं तत्कारणपूर्वकमिति नियमात्। अत एव धूमेनाग्निमात्रस्यैवानुमानं न धूमजनकस्वेतरसकलसहितस्य, व्यर्थत्वादिति भावः। कारणं यथा स्वयमेकमेव कार्येणानुमीयते न तथा स्वयं तदनुमापयति। किन्तु स्वेतरसकलकारणसहितमेवेत्याह- **समग्रमेवेति॥** स्वेतरसकलकारणसहितमेवेत्यर्थः। कारणमात्रस्य कार्यव्यभिचरितत्वेन सामग्र्या एव तदव्यभिचारादिति भावः। अत एव पूर्वं विशिष्टमेघोन्नतिरित्युक्तम्। **यथाभूतयोरिति॥** यद्धर्मावच्छिन्नयोर्व्याप्यव्यापकभावः तद्धर्मपुरस्कारेणैव साध्यसाधनभावे दृष्टानुमानमित्यर्थः। **अन्यादृश्यत्व इति॥** यद्धर्मपुरस्कारेण साध्यसाधनभावस्तद्धर्मभिन्नधर्मावच्छिन्नत्व इत्यर्थः। एवञ्च यद्धर्मपुरस्कारेण व्याप्तिग्रहस्तद्धर्मभिन्नधर्मपुरस्कारेण लिङ्गलिङ्गिभावे सामान्यतो दृष्टमित्यर्थः। नन्वेवमतिप्रसङ्गः। धूमत्ववह्नित्वपुरस्कारेण व्याप्तिग्रहे रूपत्वरसत्वपुरस्कारेण लिङ्गलिङ्गिभावस्यापि सामान्यतो दृष्टतापत्तेरित्यत उक्तम्- **तत्सामान्याकारानुगमेति॥ तयोः** व्याप्यव्यापकयोः **यत्सामान्याकारः** सामान्यधर्मो व्याप्यव्यापकतावच्छेदकरूपः तस्य लिङ्गलिङ्गिनोरपि साक्षाद्भानमेवेत्यर्थः। अत्रेत्थं प्रयोगः। यज्ञादिकं स्वर्गफलवत् प्रेक्षावद्यजमानप्रवृत्तिमत्त्वात्। यत् प्रेक्षावत्प्रवृत्तिमत् तत् फलवत्। यथा कर्षणादिकमिति। यज्ञादेः प्रवृत्तिमत्त्वं च विषयत्वेनेति ज्ञातव्यम्॥

पुनर्द्विविधम् । साधनानुमानं दूषणानुमानं चेति । तत्राद्यं यथा । धूमप्रमित्याऽग्निप्रमितिसाधनम् । दूषणानुमानमपि द्वेधा । दुष्टिप्रमितिसाधनं तर्कश्चेति । तत्राद्यं यथा । नेदं स्वसाध्यसाधनसमर्थनम् । प्रमाणबाधितत्वादित्यादि । कस्यचिद् धर्मस्याङ्गीकारेऽर्थान्तरस्यापादनं तर्कः ।

(राघ.) तर्कोऽनुमानमेवेति वक्ष्याम इत्युक्तम् । तदिदानीं व्यनक्ति- **पुनर्द्विविधमित्यादिना ॥ अग्निप्रमितिसाधनमिति ॥** अग्निप्रमित्युत्पादनमित्यर्थः । **दुष्टिप्रमितीति ॥** कार्याक्षमताप्रमितिजनकमित्यर्थः । **नेदमिति ॥** वह्निरनुष्णः पदार्थत्वादित्युक्ते परो वक्ति- पदार्थत्वादिति त्वदुक्तं साधनं न साध्यसाधनसमर्थमित्यादि। तर्कस्वरूपमाह- **कस्यचिदिति ॥** वह्न्यभावादेः। **अर्थान्तरस्य** धूमाभावादेरापादनं प्रसक्तताप्रतिपादनमित्यर्थः ॥

(वेदे.) **साधनानुमानमिति ॥** स्वपक्षसाधकानुमानमित्यर्थः । **दूषणानुमानमिति ॥** परपक्षप्रतिक्षेपानुमानमित्यर्थः । **दुष्टीति ॥** यद्यपि दुष्टिप्रमितिसाधनत्वं तर्केऽप्यस्ति । तर्कादपि परपक्षायुक्तता प्रमितिः । तथाऽप्यापादनरूपेण तस्य तथात्वमस्य तु साधनरूपेणेति भेदः । अत एवाह- **दुष्टिप्रमितिसाधनमिति ॥** परपक्षायुक्तताप्रमितौ साधनरूपमित्यर्थः । इत्यादीत्यादिपदेन प्रमाणलक्षणटीकाद्युदाहृतं नायं निरग्निकमित्यादिकमपि सङ्गृहीतमिति ध्येयम् । इयांस्तु विशेषः । हेत्वयुक्ताप्रमितिसाधनरूपमेकम् । अपरं साध्यायुक्तताप्रमितिसाधनरूपमिति । दुष्टिरसाधकतेति क्वचित् । तदसत् । प्रमाणलक्षणटीकादिगतोदाहरणाव्याप्तेः । **कस्यचिदिति ॥** व्याप्यस्येति शेषः । एवमर्थान्तरमपि व्यापकमेवानिष्टभूतं द्रष्टव्यम् ॥

।। तर्कस्य पञ्चाङ्गनिरूपणम् ।।

तस्य पञ्चाङ्गानि । आपादकस्यापाद्येन व्याप्तिः प्रतितर्केणाप्रतिघात आपाद्यस्यानिष्टत्वम् । तद् द्विविधम् । प्रामाणिकहानमप्रामाणिककल्पनं चेति । तत्राद्यं त्रेधा । दृष्टानुमितश्रुतहानभेदात् । द्वितीयमप्यदृष्टाननुमिताश्रुतकल्पनाभेदात् त्रिविधम् । एतदेव कल्प्यानेकत्वे कल्पनागौरवमित्युच्यते । आपाद्यस्य विपर्यये पर्यवसानं परस्याननुकूलत्वं चेति ।

आपाद्यमनिष्टं पुनः पञ्चधा भिद्यते । आत्माश्रयत्वमन्योन्याश्रयत्वं चक्रकाश्रयत्वमनवस्था केवलानिष्टं चेति । तद्भेदात् तदापादनरूपस्तर्कोऽपि पञ्चविधः । तत्र तस्यैवोत्पत्तिज्ञप्त्यर्थं तदुत्पत्तिज्ञप्त्यपेक्षाङ्गीकारे स्वापेक्षया पूर्वभावित्वरूपमात्माश्रयत्वमापाद्यते । यदि घटोऽयमस्यैव घटस्योत्पादकः स्यात् तर्हि स्वतोऽपि पूर्वभावी स्यात् । यद् यस्य कारणं तत् ततोऽपि पूर्वभावि दृष्टम् । यथा पटकारणं तन्तवस्तदपेक्षया पूर्वभाविनः । नचात्र प्रतिकूलस्तर्कोऽस्ति । यदि घटस्य घट एव कारणं न स्यात् तर्हीदमापद्यत इति । अनिष्टं चेदम् । स्वापेक्षया पूर्वभावित्वस्याप्रामाणिकत्वात् । व्याहतत्वेनाङ्गीकर्तुमनुचितत्वाच्च । पूर्वभावित्वं हि तदभाववति काले भावः । नच स्वाभाववति काले स्वयं भवतीति न व्याहतम् । न चेत् पूर्वभावित्वमङ्गीक्रियते तदा न स्वस्य स्वयं कारणम् । नचैवमेवापादकं प्रत्यापादयितुं शक्यत इति पञ्चाङ्गानि । एवं ज्ञप्तावपि तज्ज्ञानस्य तज्ज्ञानं प्रति पूर्वभावित्वमापाद्यम् ।

द्वयोरितरेतरकारणत्वाङ्गीकारे त्वन्योन्यापेक्षया पूर्वभावित्वरूपमन्योन्याश्रयत्वमापाद्यम् । बहूनां चक्रवत् कार्यकारणभावाभ्युपगमे पूर्वभावित्वलक्षणं चक्रकाश्रयत्वम् । अनवस्थितासिद्धकारणापेक्षायां
१ मूलक्षयापरनामकप्रतीतकार्यविलोपलक्षणानवस्था ॥

(राघ.) कथमस्यानुमानान्तर्गतिरित्यतो व्याप्तिबलेनार्थप्रमापकत्वादिति भावेनाह- **तस्य चेति** ॥ चस्त्वर्थस्सन्ननुमानान्तरवैलक्षण्यद्योतकः । यदि घटोऽत्र स्यात् पटोऽपि स्यादित्यादेः तर्कत्वव्यावृत्तये आपादकस्यापाद्येन व्याप्तिरित्युक्तम् । यदि शब्दोऽनित्यः स्यात् तर्ह्यश्रावणः स्यादित्यादेः यदि शब्दोऽनित्यो न स्यात् तर्हि कृतकोऽपि न स्यादिति प्रतितर्केण पराहतस्यातर्कत्वायोक्तं प्रतितर्केणेति । यदि धूमः स्यात् तर्हि वह्निः स्यादित्यादेरतर्कत्वायोक्तमापाद्यस्यानिष्टत्वमिति । यद्यग्निर्न स्यात् तर्हि धूमो न स्यात् । यदि घटो घटं प्रति हेतुः स्यात् तर्ह्यात्माश्रयः स्यादित्येवंविधयोस्तर्कत्वसङ्ग्रहायाह- **तद् द्विविधमिति** ॥ **हानं** त्यागः । यदि तेजोजातं प्रकाशकं स्यात् तर्ह्यनुष्णं न स्यादित्यादेरतर्कत्वायोक्तं विपर्यय इति । **अननुकूलत्वमिति** ॥ यदापादाने परस्यानुकूलता न भवति तथात्वमित्यर्थः । यदि शब्दो नित्यः स्यात् तर्हि कृतको न स्यात् । भवति कृतकोऽतोऽनित्य इत्युक्ते परो वक्ति यदि कृतकस्तर्ह्यनित्य एव शब्दो घटादौ तथा दृष्टेरिति परानुकूलस्यातर्कत्वाय पराननुकूलतेत्युक्तम् । आत्माश्रयादिचतुर्णां क्रमेणोदाहरणमाह- **तत्रेति** ॥ तेषु मध्य इत्यर्थः । पञ्चाङ्गानि क्रमेण दर्शयति- **यद् यस्येत्यादिना** ॥ **पञ्चाङ्गानीत्यन्तेन** ॥ अनिष्टत्वे हेतुद्वयम्- **स्वापेक्षयेत्यादि** ॥ व्याहतिं व्यनक्ति- **पूर्वभावित्वं हीति** ॥ न व्याहतमिति नच व्याहतमेवेत्यर्थः । विपर्यये पर्यवसानम्- **न चेत् पूर्वभावित्वमिति** ॥ **तदा** पूर्वभावित्वानङ्गीकारपक्षे स्वयं स्वस्य कारणमपि नेति । चरमाङ्गं व्यनक्ति- **नचैवमापादकं प्रतीति** ॥ तर्कप्रवक्तारं पुरुषमित्यर्थः । पूर्वभावित्वाभावो ममानु-

1. यदर्थमुत्पत्तिराश्रयणं तन्मूलं

कूल एव स्वस्य स्वात्मानं प्रति कारणत्व इति न प्रतिवादिना वक्तुं शक्यते। व्याहतेरिति भावः। **द्वयोरितरेति**॥ घटपटयोरित्यर्थः। **बहूनां** घटपटकुडचानाम्। **अनवस्थितेति**॥ अपर्यवसितेत्यर्थः। बीजाङ्कुरानवस्थाव्यावृत्तये- **असिद्धकारणापेक्षायामिति**॥

(**वेदे.**) अनुमानान्तर्भावसाधकव्याप्तिसापेक्षत्वादिकथनायाह- **तस्येति**॥ अत्राङ्गत्वं तत्कर्तृताप्रयोजकत्वम्। आत्माश्रयत्वमित्याद्यत्र गोबलीवर्दन्यायेनात्माश्रयादेरनिष्टात् पृथगुक्तिः। **तस्यैवोत्पत्तीति**॥ तस्यैवोत्पत्त्यर्थं तदुत्पत्त्यपेक्षाङ्गीकारे तस्यैव ज्ञप्त्यर्थं तस्यैव ज्ञप्त्यपेक्षाङ्गीकार इत्यर्थः। उत्पत्तौ तावदुदाहरति- **यदीति**॥ विपर्यये पर्यवसानं दर्शयति- **न चेत् पूर्वेति**॥ अननुकूलत्वं दर्शयति- **नचैवमिति**॥ यथा बाह्यार्थमपलपतो बौद्धस्य- यदीदमस्थूलं स्यात् तर्हि स्थूलतया न प्रतिभासेतेति अस्थूलतानिरासकतर्कः स्थूलसूक्ष्मबाह्यार्थवादिनोऽनुकूल एव। बाह्यार्थवादिनोऽपि स्वाभिमतस्थूलतासाधनायैवमेवापादकं बौद्धं प्रत्यापादयितुं शक्यत्वात्। यदीदमस्थूलं स्यात् तर्हि स्थूलतया न प्रतिभासेतेत्यस्थूलतानिरासकतर्कः स्थूलबाह्यार्थवादिनोऽनुकूल एव। बाह्यार्थवादिनाऽपि स्वाभिमतस्थूलतासाधनायैवमेवापादकं बौद्धं प्रत्यापादयितुं शक्यत्वात्। यदीदं स्थूलं स्यात् तर्हि स्थूलतया न प्रतीयेतेति। नच तथा प्रकृते। आपादकतर्कप्रयोक्तारं परं प्रति स्वेष्टसिद्ध्यनुकूलतया एवमेवापादयितुं **शक्यते** अयमेव तर्कः प्रयोक्तुं शक्यते वादिनाऽतोऽननुकूलत्वमस्येत्यर्थः। अनवस्थापादनप्रकारं दर्शयति- **अनवस्थितेति**॥ अनवस्थितेत्यनेन चक्रकव्यावृत्तिः। बीजाङ्कुरपरम्पराव्यावृत्तयेऽसिद्धेति। 'मूलक्षयकरीं प्राहुरनवस्थां हि दूषणम्' इत्युक्तदूषणकृताबीजप्रदर्शनाय मूलेत्यादि। मूलक्षयव्याख्यानाय प्रतीतेत्यादि। **अनवस्था** आपाद्येति शेषः। अन्यथोपक्रमविरोधात्। ततश्चायमापादनक्रमः। विवादास्पदे कस्मिंश्चित् कार्ये यद्यनवस्थितासिद्धकारणपरम्पराऽङ्गीक्रियते तर्ह्यनवस्था स्यात्।

नचैवमनवस्थाऽङ्गीकर्तुमुचिता । अप्रामाणिकत्वात् । तस्मात् प्रकृतकार्यं न सम्भवतीति । एवं ज्ञप्तावपि द्रष्टव्यम् ॥

केवलानिष्टापादनमपि त्रेधा । दृष्टानुमितश्रुतहानापादनभेदात् । अदृष्टाननुमिताश्रुतकल्पनापादनभेदाच्च । एतदेव कल्प्यानेकत्वे कल्पनागौरवमित्युच्यते । दृष्टहानं यथा । यदि पर्वतो निरग्निकस्तर्हि निर्धूमः स्यादिति । एवमन्यस्याप्युदाहरणं शास्त्रे द्रष्टव्यम् ॥

(राघ.)**शास्त्रे द्रष्टव्यमिति** ॥ अनुव्याख्यानसुधादौ । तथाहि । ईश्वरः सर्वज्ञः सर्वकर्तृत्वादित्यत्र हेतुरस्तु साध्यं माऽस्त्वित्युक्ते यदि सर्वज्ञो न स्यात् तर्हि कार्यत्वादिलिङ्गानुमितसर्वकर्तृत्वमपि न स्यादिति । आनन्दमयमात्मानमुपसङ्क्रम्येत्यत्रातिक्रम्येति यद्यर्थः स्यादुपशब्दो न स्यादिति । अदृष्टकल्पनं यथा । भोजनं यदि न तृप्तिहेतुस्तर्हि ममापि न तृप्तिहेतुः स्यादिति । ईश्वरो न कर्ता स्यात् तर्हि दुःखी स्यादित्यनुमितकल्पना उपसङ्क्रम्येत्यत्र यद्यतिक्रम्येत्यर्थस्तर्हि श्रुतावितिशब्दः स्यादिति । कल्पनागौरवं तु तत्त्वमसीत्यत्र जीवब्रह्मैक्ये पदद्वयलक्षणा, श्रुतिप्रत्यक्षयोरतत्त्वावेदकत्वकल्पनेत्यादि ध्येयमित्यर्थः ।

(वेदे.) **त्रेधेति** ॥ प्रमाणलक्षणटीकायामनुमितहानानुमितकल्पनयोरनुक्तिस्तु प्रायेण शास्त्रेषु तयोर्व्यवहाराभिप्रायेण ज्ञातव्यम् । **एवमन्यस्यापीति** ॥ अनुमितहानं यथा । चक्षुष्मन्तं प्रत्यक्षीकृत्योच्यते । अयं यदि चाक्षुषसाक्षात्कारवान्नहि तर्हि चक्षुष्मानपि न स्यादिति । श्रुतहानं यथा । यदीश्वरो न सर्वज्ञस्तर्हि जगत्कर्ता न स्यादिति । अदृष्टकल्पनं यथा । यदा पीतमुदकमन्तर्धक्ष्यति तर्हि मामपि दहेदविशेषादिति । अननुमितकल्पनं यथा । यथाऽन्धं लक्षीकृत्योच्यते । अयं यदि रूपज्ञस्तर्हि चक्षुष्मान् स्यादिति । अश्रुतकल्पनं यथा । यदीश्वरो जीवाभिन्नस्तर्हि दुःखी स्यादिति द्रष्टव्यमिति भावः ।

।। तर्के असिद्धेः विरोधस्य चादोषत्वम् ।।

अनुमानत्वेऽपि तर्कस्यापादकासिद्धिरदूषणम् । पराभ्युपगम-मात्रस्य तत्र सिद्धिपदार्थत्वात् । एवमापाद्यस्य प्रमाणविरोधोऽप-सिद्धान्तश्च न दूषणम् । निर्धूमो भवतीत्यसाधनात् । यथा साधनानु-माने न व्याप्तिमात्रं नापि पक्षधर्मतामात्रं साध्यप्रमितिसाधनं किन्तु मिलितमेव । एवमनिष्टापादनं विपर्यये पर्यवसानं चोभयं मिलित-मेवानुमितिसाधनं भवतीति तर्कस्य प्रामाण्यमुपपद्यते । सोऽयं क्वचिद् विपरीतशङ्कानिरसनद्वारेण प्रमाणानामनुग्राहकोऽपि भवतीति ।।

(राघ.) ननु तर्कस्यानुमानत्वे आपादकं निरग्निकत्वं लिङ्गमापाद्यं निर्धूमत्वं लिङ्गीति वाच्यम् । तथाच हेतोरसिद्धिर्बाधोऽपसिद्धान्तश्च । प्रतिवादिना निरग्नि-कत्वनिर्धूमत्वयोरस्वीकाराद् धूमस्य प्रमितत्वाच्चेत्यत आह- **अनुमानत्वेऽ-पीति** ।। साधनरूपत्वे हि स्वसिद्ध्या भाव्यं नत्वापादनरूपत्वे । अन्यथा यदीति स्यादित्यापादनत्वव्याघातात् । ततस्तत्रच परसिद्धिमात्रमेवाङ्गमिति भावेनाह- **पराभ्युपगमेति** ।। तत्र आपादने ।

ननु तर्के निरग्निकत्वनिर्धूमत्वरूपापादकापाद्यगोचरज्ञानयोर्यथाक्रमं करणत्वेन फलत्वेनाभिमतयोर्द्वयोरपि भ्रमत्वात् कथं तर्कस्य प्रामाण्यमित्यतो मैवं फलकरणभावः किन्त्वन्यथैवेति भावेन दृष्टान्तपूर्वकमाह- **यथेति** ।। पक्ष-धर्मतेति परमताभिप्रायेण समुचितदेशवृत्तित्वाभिप्रायेण चोक्तिः । निर्धूमः स्यान्नच निर्धूमस्तस्मान्न निरग्निक इत्यनिष्टापादनं विपर्यये पर्यवसानरूपं द्वयमपि मिलितमेवेत्यनेन निर्धूमत्वाभावज्ञानं करणम् । निरग्निकत्वाभावज्ञानं फलम् । ज्ञानद्वयमपि प्रमास्वरूपमेवेति तर्कस्य प्रामाण्यं प्रमितिकरणत्वमित्यर्थः । तर्कताण्डवे तु निर्धूमः स्यादित्यस्य निर्धूमत्वेनाभ्युपगमनीयः स्यादित्यर्थः ।

तथाच निरग्निकत्वाङ्गीकारज्ञानं करणम् । निर्धूमत्वेनाङ्गीकर्तव्यत्वज्ञानं फलमित्यापादकापाद्यगोचरज्ञानयोर्द्वयोरपि प्रमात्वमेव । तथाऽपि मिलितमेवेत्युक्तिस्तु न प्रामाण्योपपादनाय । किन्तु तर्कोद्देश्यिकायां निरग्निकत्वाभावप्रमायां विपर्ययपर्यवसानसापेक्षत्वाभिप्रायेणेत्युक्तम् । **सोऽयमिति** ॥ हेतुरस्तु साध्यं माऽस्त्विति हेतोरप्रयोजकत्वेनाव्याप्यत्वशङ्का हि लिङ्गपरामर्शात् पूर्वकालीना स्वारसिका परामर्शोत्पत्तिप्रतिबन्धिका । तदुत्तरकालीना तु साध्याभावविषयं प्रतिप्रमाणाहितानुमितिफलप्रतिबन्धिका । करणफलयोरुत्पत्तिप्रतिबन्धकशङ्काद्वयमपि तर्केण निरस्यत इत्येवंरूपविपरीतशङ्कानिरसनद्वारा करणस्वरूपफलस्वरूपनिष्पादनरूपोपकारकतयाऽनुमानानुग्राहकोऽपि न केवलं स्वतन्त्रप्रमाणमित्यर्थः । प्रमाणान्तरेत्युक्त्या प्रागुक्तदिशा प्रत्यक्षस्योपाध्यभावग्रहे सहकारिता सूचिता । क्वचिदित्युक्त्या विपरीतशङ्कास्थल एव नत्वन्यत्रेति दर्शितम् । इति **तर्कोक्तिः** ॥

(वेदे.) ननु तर्कस्यानुमानत्वे आपादकं निरग्निकत्वं लिङ्गम् । आपाद्यं निर्धूमत्वं साध्यमित्यङ्गीकर्तव्यम् । नचेदं युक्तम् । लिङ्गस्यासिद्धत्वाल्लिङ्गिनश्च प्रत्यक्षबाधात् । धूमस्यैव तत्राङ्गीकृतत्वेन तदभावसाधनेऽपसिद्धान्तापत्तेश्चेत्याशङ्क्य निराकरोति- **अनुमानत्वेऽपीति** ॥ **आपादकासिद्धिरिति** ॥ स्वमत इति शेषः । तर्हि कथं तर्कप्रवृत्तिरित्यत आह- **परेति** ॥ पराभ्युपगमेनैव तर्कः प्रवर्तते । परन्यायैश्च दूषणमित्युक्तत्वात् । अतः स्वमतेऽसिद्धिरदूषणमिति भावः । अदूषणादित्यनन्तरमनिष्टरूपे चानुमानिष्ठतोपपादकतया भूषणमेवेति वाक्यशेषः । इदुमुक्तं भवति । साधनानुमानेऽसिद्ध्यादिकदोषो, नानिष्टप्रसञ्जनरूपे दूषणानुमाने । तत्रह्यापादकस्य स्वमतेऽसिद्धेर्भूषणमेव पराभ्युपगमेनैव प्रवृत्तत्वात् तर्कस्य । एवमापाद्यस्य बाधितत्वादिकमपि न दोषः । तस्यापि साधनानुमान एव दोषत्वात् । अस्माभिश्च निर्धूमो भवतीत्यसाधनात् । आपादनरूपे च दूषणानुमाने

बाधादेरनिष्टतोपपादकत्वेन भूषणतैवेति। यद्वा। नात्र निरग्निकत्वरूपापादकस्य पक्षेऽसिद्धिः। यत् सर्वथा पक्षे न सम्बद्धं तदसिद्धमिति लोके प्रसिद्धम्। निरग्निकत्वं च पक्षे परेणाभ्युपगतम्। ततश्च पराभ्युपगमस्यैव यक्षानुरूपबलिन्यायेन सम्बद्धतया सिद्धिपदार्थत्वान्नासिद्धमित्याह- **परेति**॥

आपाद्ये बाधादिकं परिहरति- **एवमिति**॥ स्यादिदं बाधादिकमापाद्यस्य यद्यापाद्यं पक्षे केनापि सम्बन्धेन न स्यात्। नचैवं प्रकृतेऽस्ति। किं नाम निर्धूमत्वस्यापि पक्षे परेणाभ्युपगमनीयत्वरूपसम्बन्धेन सत्त्वात्। अत एवापादके आपाद्ये चोक्तसम्बन्धद्योतनाय यदीति तर्हीत्युभयत्र स्यादिति चोपपद्यते। अन्यथा निरग्निकत्वान्निर्धूमो भवतीति स्यादिति भावः। एतेनेदमपि निरस्तम्। अग्न्यभावज्ञानधूमाभावज्ञानयोर्करणफलयोरुभयोरप्यप्रमात्वात् कथं तर्कस्य प्रामाण्यमिति। उक्तसम्बन्धेनोभयज्ञानयोरपि प्रमात्वात्। नन्वेवमपि तर्कोत्पन्नया निर्धूमत्वेनाभ्युपगमनीयत्वप्रमया व्यभिचारशङ्काविधूननद्वारा धूमे वह्निव्याप्तिप्रमोदयेऽपि तर्केण परमप्रमेयवह्निसिद्धिः कथमित्यत आह- **यथेत्यादिना**। **अनुमितिसाधनं भवतीति**॥ साधनानुमानवत् स्वातन्त्र्येणाग्निप्रमापको भवतीत्यर्थः। पर्वतोऽग्निमान्न वेति प्रतिपत्तौ साधनानुमानं विनैव 'यदि निरग्निकः स्यात् तर्हि निर्धूमः स्यात्। नचायं निर्धूमः' इति तर्करूपानुमानेनैवाग्निसिद्धेरनुमानसिद्धत्वादिति भावः। अनेन तर्कस्य यदा स्वातन्त्र्येण साध्यसाधत्वं तदा विपर्ययपर्यवसानोपयोगः। यदा तु वक्ष्यमाणरीत्या मानान्तरानुग्राहकत्वं तदा न विपर्ययपर्यवसानोपयोग इत्युक्तं भवति।

तर्कः किमुक्तरीत्या स्वातन्त्र्येणैव सर्वत्र साध्यप्रमापकः? नेत्याह- **सोऽयमिति**॥ अनुमानस्थले तर्कनिवर्त्या शङ्का द्विविधा। एका लिङ्गपरामर्शात् पूर्वं धूमवानपि कश्चिन्निरग्निः किं न स्यादिति बाधसत्प्रतिपक्षशङ्का। ततश्चैतन्निवर्तकसाध्यानुग्रहोऽपि द्विविधः। आद्यः व्यभिचारशङ्कारूपं विपरीतशङ्कानिरसन-

द्वारेण व्याप्तिप्रमाफलकतया लिङ्गपरामर्शरूपप्रमाणनिष्पादनरूपः। द्वितीयस्तु निष्पन्ने लिङ्गपरामर्शे प्रतिप्रमाणशङ्कारूपविपरीतशङ्काविधानद्वारेण वह्नयनुमितिरूपकेवलप्रमाणानिष्पादनरूपः। ततश्चानुमानेऽयमुभयविधोऽप्यनुग्रहस्तर्कसाध्यो विवक्षित एव। प्रत्यक्षादावपि तर्कसाध्यानुग्रहप्रकारो द्रष्टव्यः।

नन्वनुमाने उक्तरूपानुग्रह एव तर्केणापादकोद्देश्यः तदा तर्के विपर्ययपर्यवसानस्यानपेक्षिततया प्रयोगेऽङ्गहीनस्य तस्य तर्काभासः स्यादिति चेन्न। तत्रापि विपर्ययपर्यवसानप्रयोगाङ्गीकारात्। अन्यथा कथकसम्प्रदायविरोधात्। नच वैय्यर्थ्यम्। निर्धूमताया अपाकर्तव्यत्वात्। साधनस्य सिद्धसाधनतानिरासार्थत्वेन स्यादित्यनेन बोधितप्रमाणविरोधोपपादनार्थत्वेन वा सार्थकत्वादित्याहुः। अनुग्राहकोऽपीति॥ न केवलमुक्तरीत्या स्वातन्त्र्येणानुमापकः किन्त्वनुग्राहकोऽपीत्यपिशब्दार्थः॥

॥ परोक्तानुमानविभागभङ्गः ॥

केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् त्रिविधमनुमानमित्येके। साध्यधर्मविशिष्टो धर्मी पक्षः। तत्र व्याप्त्या वर्तमानम्। निश्चितसाध्यसमानधर्माधर्मी सपक्षः। तत्र सर्वस्मिन्नेकदेशे वा वर्तमानम्। साध्यतत्समानधर्मरहितो धर्मी विपक्षः। तद्रहितं केवलान्वयि। तद् द्विविधम्। सर्वसपक्षतदेकदेशवृत्तिभेदात्। शब्दोऽभिधेयः प्रमेयत्वादिति सपक्षव्यापकम्। सर्वस्मिन्नभिधेयतया सम्प्रतिपन्ने प्रमेयत्वस्य वृत्तेः। गुणत्वादिति सपक्षैकदेशवृत्ति। रूपादौ वृत्तेर्घटादाववृत्तेः॥

(राघ.) सर्वमप्यन्वय एवेति विवक्षुः परोक्तं निरसितुमनुवदति- केवलेति॥ एके तार्किकाः।

'सर्वेषु केषुचिद्वाऽपि सपक्षेषु कृतान्वयि।
विपक्षशून्यं पक्षस्य व्यापकं केवलान्वयि॥'

इति परोक्तलक्षणं पक्षादिस्वरूपं वदन्नेवाह- **साध्येति**॥ यत्प्रतीतिर्लिङ्गेन जनयितव्या स साध्यधर्मः। सपक्षादिव्यावृत्तये धर्मेत्युक्तिः। वस्तुतोऽग्निविशिष्ट-पर्वतस्य साध्यत्वादन्यस्य पक्षत्वव्यावृत्तये धर्मेत्युक्तिः। धर्ममात्रस्य प्रागेव सिद्धेः साध्यत्वायोगाद् विशिष्ट इत्युक्तिः। तथाच धर्मस्य साध्यत्वं तत्सम्बन्धि-तयैव सिध्यति। साधनसाध्यधर्मेण वैशिष्टचसम्बन्धोऽस्तीति धर्मीत्युक्तिः। **तत्रेति**॥ उक्तरूपपक्षे। व्याप्या वर्तमानमित्यस्य केवलान्वयीति वक्ष्यमाणे-नान्वयः। **निश्चितेति**॥ निश्चितो यः साध्यसमानधर्मो व्यापकतावच्छेदकेन सदृशो यो धर्मः स यस्येति बहुव्रीहिः। इमौ पर्वतावग्निमन्तावित्यत्र व्यापकता-वच्छेदकाग्नित्वधर्मेण साध्यसमानधर्मवत्त्वमन्योन्यं द्वयोरप्यस्तीति तद्व्युदासाय निश्चितेति धर्मविशेषणम्। असम्भवनिरासाय समानेति। व्याप्तिरूपप्रत्यासत्त्या निश्चितसाध्यसमानधर्मवतः साधनस्य निरासाय धर्मीति। तादृशधर्मं प्रत्या-धारभूतेत्यर्थः। ननु कथं धर्मेति ? धर्मादनिच् केवलादित्युक्तेरिति चेन्मैवम्। धातुवृत्तावुक्तदिशा केवलादिति धर्मविशेषणम्। बहुव्रीह्याक्षिप्तपूर्वपदस्य विशेषणम्। तेन पूर्वपदीभवतः केवलादन्यनिरपेक्षात् परो यो धर्मशब्दस्तदन्ता-दित्यर्थः। तथाच निश्चितश्चासौ साध्यसमानश्च निश्चितसाध्यसमानः। तादृशो धर्मो यस्येति विग्रहे निश्चितसाध्यसमानपदस्य बहुव्रीहौ पूर्वपदीभवतोऽन्य-निरपेक्षत्वेनानिच्प्रत्ययोपपत्तेः। उक्ते विग्रहे केवलस्य धर्मविशेषणत्वेऽप्य-दोषादिति। **तत्रेति**॥ सपक्षे। वर्तमानपदस्य केवलान्वयिपदेनान्वयः। **तद्रहित-मिति**॥ विपक्षरहितमित्यर्थः। **अभिधेयो** वाच्यः। **प्रमेयत्वात्** प्रमाविषयत्वा-दित्यर्थः। शब्दोऽभिधेय इत्यत्रैव सपक्षैकदेशवृत्तिहेतुमुक्त्वोपपादयति- **गुणत्वादिति**॥ वृत्तीत्यनन्तरं केवलान्वयीत्यनुषङ्गः॥

(वेदे.) घटकतया पक्षादिकं लक्षयन्नेव केलान्वयादिलक्षणमाह-**साध्येति**॥ अत्र साध्यत्वं सिद्धिकर्मत्वरूपमतो न सपक्षेऽतिव्याप्तिरिति ध्येयम्। हेत्वादेरतिव्याप्तेराह- **धर्म इति**॥ **तत्रेति**॥ पक्ष इत्यर्थः। शब्दोऽभिधेयश्चाक्षुषत्वादिति स्वरूपासिद्धेऽतिव्याप्तिवारणाय पक्षे वर्तमानमित्युक्तम्। एवमपि तस्यामेव प्रतिज्ञायां वर्णात्मकत्वादिति भागासिद्धेऽतिव्याप्तिवारणाय व्याप्त्येत्युक्तम्। सर्वमसिद्धेयं प्रमेयत्वादित्यत्रातिव्याप्तिवारकं सपक्षवृत्तित्वविशेषणम्। अन्वयव्यतिरेकादिव्यावर्तकं विपक्षरहितमिति विशेषणमिति बोध्यम्॥

द्विविधा किल व्याप्तिः। अन्वयतो व्यतिरेकतश्चेति। साधनस्य साध्येन व्याप्तिरन्वयः। साध्याभावस्य साधनाभावेन व्याप्तिर्व्यतिरेकः। तत्रास्य केवलमन्वय एवास्ति। यत् प्रमेयं तदभिधेयं यथा घट इति। न तत्र व्यतिरेकः। यदभिधेयं न भवति तत् प्रमेयं न भवतीति निदर्शनाभावात्। सर्वस्याप्यभिधेयत्वेनानभिधेयासम्भवात्। तेनैतत् केवलान्वयीत्युच्यते॥ शब्दः अभिधेयः प्रमेयत्वात् घटवत्

(राघ.) ननु प्रमेयत्वहेतोः सर्वत्र सत्त्वेन केवलान्वयित्वेऽपि गुणत्वहेतोरसार्वत्रिकत्वात् कथं केवलान्वयित्वमित्यतो न हेतोः सार्वत्रिकत्वादिना केवलान्वयित्वतदभावौ। किन्तु केवलान्वयव्याप्तिमत्त्वेनैवेति भावेन व्याप्तिविभागात् पूर्वं केवलान्वयित्वं द्वयोरपि हेत्वोर्व्यनक्ति- **द्विविधमिति**॥ किलेति प्रसिद्धिमाह- **तत्रास्येति**॥ केवलान्वयित्वेनाभिमतस्य प्रमेयत्वादेरित्यर्थः। **न तत्रेति**॥ केवलान्वयिहेतावित्यर्थः।

(वेदे.) केवलान्वयशब्दवाच्यतायां निमित्तं वक्तुमाह - **द्विविधेति**॥

॥ केवलव्यतिरेकिस्वरूपनिरूपणम् ॥

पक्षव्यापकमविद्यमानसपक्षं सर्वस्माद् विपक्षाद् व्यावृत्तं केवलव्यतिरेकि । यथा जीवच्छरीरजातं सात्मकं प्राणादिमत्त्वादिति । अस्य हि यत् सात्मकं न भवति तत् प्राणादिमन्न भवति यथा घट इति व्यतिरेक एवास्ति । नतु यत् प्राणादिमत् तत् सात्मकमित्यन्वयः । सर्वस्यापि जीवच्छरीरस्य पक्षत्वात् । अन्यस्य सर्वस्य निरात्मकत्वात् । तेनैतत् केवलव्यतिरेकीत्युच्यते ॥

(राघ.) 'असपक्षं विपक्षेभ्यो व्यावृत्तं पक्षभूमिषु ।
सर्वासु वर्तमानं यत् केवलव्यतिरेकि तत् ॥'

इत्युक्तदिशा केवलव्यतिरेकिलक्षणमाह- **पक्षव्यापकमिति ॥ प्राणादीति ॥** प्राणा इन्द्रियाणि श्वासवायवश्चादिपदेनाङ्गचेष्टादयः ॥

(वेदे.) **पक्षव्यापकमिति ॥** अत्र जीवच्छरीरपक्षके सात्मकत्वसाध्यके नीलशरीरत्वादौ हेतौ भागासिद्धेऽतिव्याप्तिवारणाय पक्षव्यापकमित्युक्तम् । अन्वयव्यतिरेकिव्यावृत्तयेऽविद्यमानसपक्षमिति । जीवच्छरीरं सात्मकं प्रमेयत्वादित्यत्रातिव्याप्तिवारणाय विपक्षाद् व्यावृत्तमित्युक्तम् । तस्यामेव प्रतिज्ञायां कतिपयविपक्षव्यावृत्तये पृथिवीत्वादिहेतावतिव्याप्तिपरिहाराय सर्वस्मादित्युक्तमिति द्रष्टव्यम् । अत्रापि केवलव्यतिरेकिपदवाच्यत्वे निमित्तं वक्तुमाह- **अस्य हीति ॥**

॥ अन्वयव्यतिरेकिस्वरूपनिरूपणम् ॥

पक्षव्यापकं सपक्षवृत्ति सर्वविपक्षव्यावृत्तमन्वयव्यतिरेकीति । तदपि द्विविधम् । सर्वसपक्षतदेकदेशवृत्तिभेदात् । शब्दोऽनित्यः कृतक-

त्वादिति सपक्षव्यापकम्। सर्वस्मिन्ननित्ये कृतकत्वस्य वृत्तेः। पर्वतोऽग्निमान् धूमवत्त्वादिति सपक्षैकदेशवृत्ति। अग्निमत्यपि क्वचिद् वृत्तेः। क्वचिच्चावृत्तेः। इदं हि यद् धूमवत् तदग्निमद् यथा महानसः। यदग्निमन्न भवति तद् धूमवन्न भवति यथा ह्रद इति व्याप्तिद्वय-सद्भावादन्वयव्यतिरेकीत्युच्यते ॥

(राघ.) 'व्यावृत्तं यद् विपक्षेभ्यः सपक्षे तु कृतान्वयि।
व्याप्त्या पक्षे वर्तमानमन्वयव्यतिरेकि तत् ॥'

इत्युक्तरीत्याऽन्वयव्यतिरेकिलक्षणमाह- पक्षव्यापकमिति ॥

(वेदे.) पक्षव्यापकमिति ॥ अत्र वाङ्मनसी अनित्ये मूर्तत्वादित्यत्र केवल-व्यतिरेकिकेवलान्वयिनोश्चातिव्याप्तिवारणाय क्रमेण विशेषणानि द्रष्टव्यानि। अस्याप्यन्वयव्यतिरेकपदवाच्यायां निमित्तं वक्तुमाह- इदं हीति ॥ वक्ष्यमाण-रीत्याऽन्वयव्याप्तिरूपसाध्यसिद्ध्युपयोगात् कथमनुपयोग इत्यत उक्तम्- प्रकृत-साध्यसिद्धाविति ॥ सात्मकत्वरूपसाध्यसिद्धावित्यर्थः ॥

तदिदमसत्। व्यतिरेकव्याप्तेः प्रकृतसाध्यसिद्धावनुपयोगात्। नहि भावेन भावसाधनेऽभावस्याभावेन व्याप्तिरुपयुज्यते। व्याप्तिपक्ष-धर्मतयोः वैय्यधिकरण्यं चैवं सति स्यात्। कथं तर्हि केवलव्यतिरेकिणः शास्त्रे संव्यवहारः। इत्थम्। तत्रापि यत् प्राणादिमत् तत् सात्मक-मित्येव व्याप्तिः। किन्तु व्याप्तिग्रहणस्थानस्यैव विप्रतिपत्ति-विषयत्वप्राप्त्या सा दर्शयितुमशक्याऽभूत्। ततोऽनुमानेन तां साधयितुं व्यतिरेकव्याप्तिरुपन्यस्यते। प्राणादिमत्त्वादिति प्रयुक्ते कथमस्य व्याप्तिरित्याकाङ्क्षायां प्राणादिमत्त्वं सात्मकत्वेन व्याप्तं, तदभावव्याप-

काभावप्रतियोगित्वात् । यद् यदभावव्यापकाभावप्रतियोगि तत् तेन व्याप्तम् । यथा धूमवत्त्वमग्निमत्त्वेनेत्यस्यार्थस्य विवक्षितत्वात् । अन्वयव्यतिरेकिणि तु व्यतिरेकव्याप्तिरनुपयुक्तैव । विवक्षितव्याप्तेः प्रत्यक्षादिनैव सिद्धत्वात् । व्यभिचाराभावदर्शनमुखेन कथञ्चिदुपयुज्यते वेति ॥

(राघ.) त्रिविधमित्यादिनाऽनूदितं परमतमयुक्तमित्याह - **तदिदमसदिति** ॥ तत्र दूष्यांशं निराह- **व्यतिरेकेति** ॥ प्रकृतेत्युपक्रान्तसात्मकत्वादिसाध्यसिद्धावनुपयोगादित्युक्तं व्यनक्ति- **नहीति** ॥ प्राणादिमत्त्वेन सात्मकत्वसाधने कार्ये सात्मकत्वाभावस्य प्राणादिमत्त्वाभावेन व्याप्तिर्नह्युपयुज्यत इत्यर्थः। **एवं सतीति** ॥ भावयोर्लिङ्गलिङ्गिभावः तदभावयोर्व्याप्तिरित्युक्ते सतीत्यर्थः । व्यतिरेकिणः प्राणादिमत्त्वहेतोः शास्त्रेऽर्थसाधकत्वेनोपन्यासरूपसंव्यवहारः कथमित्यर्थः । एवं तर्हि व्यतिरेकोक्तिर्व्यर्थेति भावेन पृच्छति- **किन्त्विति** ॥ भावयोर्व्याप्तिग्रहानुमापकतयेति भावेनाह- **व्याप्तिग्रहणस्थानस्यैवेति** । पक्षभूतत्वादिति भावः । **तदभावेति** ॥ सात्मकत्वाभावं प्रति व्यापको योऽभावस्तत्प्रतियोगित्वादित्यर्थः । एतेनानुमानगम्यां तु व्याप्तिं वक्ष्याम इति प्रागुक्तं विवृतं ध्येयम् । सर्वथाऽनुपयुक्तैव किमित्यत आह- **व्यभिचाराभावेति** ॥ व्यतिरेकव्याप्त्या साध्याभाववति विपक्षे हेत्वभावप्रतिपादनादिति भावः । प्रागुक्तदिशोपाध्यभावनिश्चयेनापि व्यभिचाराभावनिश्चयसम्भवात् कथञ्चिदित्युक्तम् । इतिशब्दः परोक्तव्याप्तिद्वैविध्यादिनिराससमाप्तौ । **परोक्तानुमानत्रैविध्यनिरासः** ॥

(वेदे.) **वैयधिकरण्यमिति** ॥ तथाच व्याप्तिविशिष्टपक्षधर्मताज्ञानलक्षणलिङ्गपरामर्शासम्भवादनुमितिर्न स्यात् । नचात्र साध्याभावव्यापकाभावप्रतियोगित्वज्ञानमेवानुमितिकारणम् । अत उक्तपरामर्शासम्भवो न दोष इति

वाच्यम् । तृणारणिमणिजन्यवह्निष्विव लिङ्गपरामर्शादिरूपोक्तकारणद्वय-जन्यानुमित्योरवान्तरविशेषस्याननुभवात् । तत्कल्पनस्यान्योन्याश्रयेण योग्या-नुपलब्धिबोधेन चायुक्तत्वादिति भावः । **अनुमानेनेति** ॥ एतेनानुमानगम्यां व्याप्तिमित्यादिनोक्तं प्रदर्शितं भवति । व्यभिचारशङ्काया असार्वत्रिकत्वान्न सर्वत्रान्वयव्यतिरेकिणि व्यतिरेकव्याप्त्युपयोग इत्यभिप्रेत्य कथञ्चिदित्युक्त-मित्याहुः ॥

॥ पुनरनुमानस्य द्वैविध्यकथनम् ॥

पुनरनुमानं द्विविधम् । स्वार्थं परार्थं चेति । तत्र परोपदेशमनपेक्ष्य यत् स्वयमेव व्याप्तिज्ञानतत्स्मरणसहितं लिङ्गज्ञानमुत्पद्यते तत् स्वार्थानुमानम् । यत्तु परोपदेशापेक्षमुत्पद्यते तत् परार्थानुमानम् । तज्जनकत्वात् परोपदेशोऽपि परार्थानुमानमितिं क्वचिदुपचर्यते ।

परोपदेशस्तु पञ्चावयववाक्यानीति नैयायिकादयः । प्रतिज्ञाहेतू-दाहरणोपनयनिगमनान्यवयवाः । एत एव वैशेषिकैः प्रतिज्ञोपदेश-निदर्शनानुसन्धानप्रत्याम्नाया इत्युच्यन्ते । तत्र पक्षवचनं प्रतिज्ञा । यथा पर्वतोऽग्निमानिति । तत्र धर्मिणमुद्दिश्य पश्चाद् धर्मो विधा-तव्यः । साधनत्वख्यापकविभक्त्यन्तं लिङ्गवचनं हेतुः । यथा धूम-वत्त्वादिति । व्याप्तिग्रहणस्थलं दृष्टान्तः । स द्विविधः । साधर्म्य-दृष्टान्तो वैधर्म्यदृष्टान्तश्चेति । तत्रान्वयव्याप्तिग्रहणस्थलं साधर्म्य-दृष्टान्तः । यथा धूमानुमाने महानसः । व्यतिरेकव्याप्तिग्रहणस्थलं वैधर्म्यदृष्टान्तः । यथा तत्रैव महाह्रद इति । सम्यग्व्याप्तिप्रदर्शनपूर्वकं दृष्टान्ताभिधानमुदाहरणम् । तद् द्विविधम् । साधर्म्योदाहरणं

वैधर्म्योदाहरणं चेति । अन्वयव्याप्तिप्रदर्शनपूर्वकं साधर्म्यदृष्टान्ताभिधानं साधर्म्योदाहरणम् । यथा यो यो धूमवान् सः सोऽग्निमान् यथा महानस इति । व्यतिरेकव्याप्तिप्रदर्शनपूर्वकं वैधर्म्यदृष्टान्ताभिधानं वैधर्म्योदाहरणम् । यथा योऽग्निमान्न भवति स धूमवान्न भवति । यथा महाह्रद इति । दृष्टान्ते प्रसिद्धाविनाभावस्य लिङ्गस्य पक्षे व्याप्तिख्यापकं वचनमुपनयः । सोऽपि दृष्टान्तानुसारेण द्विविधः। तत्र महानस इव पर्वतो धूमवानिति साधर्म्योपनयः । नच ह्रद इवायं निर्धूमः पर्वत इति वैधर्म्योपनयः । पुनः सहेतुकं पक्षवचनं निगमनम् । यथा तस्मात् पर्वतोऽग्निमानिति ॥

(राघ.) यदिति ॥ भूयोदर्शनादिरूपप्रागुक्तसामग्रीत इत्यर्थः । यत्तु परोपदेशापेक्षमिति ॥ व्याप्तिज्ञानमित्यादेरनुषङ्गः । क्वचिदिति ॥

'युक्तिः प्रतिज्ञारूपा च हेतुदृष्टान्तरूपिका ।
तथोपनयरूपा च परा निगमनात्मिका ॥'

इत्यादिब्रह्मतर्कवाक्यादावित्यर्थः । वैशेषिकोक्तानामन्यत्वशङ्कानिरासायाह- एत एवेति ॥ क्रमेणावयवानां स्वरूपमाह- तत्रेति ॥ तेषु मध्ये । पक्षवचनमिति ॥ पक्षस्वरूपं प्रागुक्तम् । पश्चाद्धर्म इति ॥ अग्निमान् पर्वत इति न वाच्यमिति भावः । धूमेति ॥ प्रातिपदिकमात्रोक्तेरहेतुत्वायोक्तं विभक्त्यन्तं लिङ्गवचनमिति । धूमोऽस्तीत्यादेरहेतुत्वायोक्तं साधनत्वख्यापकविभक्त्यन्तमिति । सा च विभक्तिः पञ्चमीति भावः । उदाहरणलक्षणं वक्तुं दृष्टान्तस्वरूपमाह- व्याप्तिग्रहणेति ॥ तत्रैवेति ॥ धूमानुमाने । सम्यग्व्याप्तीति । योयो धूमवानसावसावित्येव नतु वैपरीत्येनेति सम्यक्शब्दार्थः । प्रसिद्धेति ॥ निश्चितव्याप्तिकस्य लिङ्गस्य व्याप्त्या वर्तमानत्वख्यापकवचनमित्यर्थः । तत्र तयोर्मध्ये ॥

(वेदे.) **परोपदेश इति** ॥ ससामर्थ्यलिङ्गप्रतिपादकं वाक्यमित्यर्थः । **पक्षवचनमिति** ॥ परं प्रति प्रतिपादयितुमिति शेषः । दृष्टान्तघटिततयोदाहरणं लक्षयितुं दृष्टान्तलक्षणमाह- **व्याप्तीति** ॥ तद्वैविध्यं वक्तुं दृष्टान्तद्वैविध्यमाह- **स इति** ॥ **सम्यग्व्याप्तीति** ॥ विपरीतव्याप्त्यभिधानेऽनुपदर्शितव्याप्तिके दृष्टान्तानभिधाने चोदाहरणाभासेऽतिव्याप्तिवारणाय क्रमेण विशेषणानि । प्रतिज्ञाव्यावृत्त्यर्थं सहेतुकमित्युक्तम् ॥

॥ परार्थानुमानेऽवयवनियमनिरासः ॥

प्रतिज्ञाहेतूदाहरणान्युदाहरणोपनयनिगमनानि वा त्रय एवावयवा इति भाट्टाः । उदाहरणोपनयौ द्वावेवेति बौद्धाः । तदेतदसत् । व्याप्तिद्वैविध्यनिराकरणेनोदाहरणोपनयद्वैविध्यस्यापि निराकृतत्वात् । नियमानुपपत्तेश्च । नहीदं वाक्यमागमतया व्याप्त्यादिबोधकम् । येनाकाङ्क्षाद्यनुसारेण पञ्चावयवादिनियमः स्यात् । परस्य परस्मिन्नाप्त्यनिश्चयात् । निश्चये वा प्रतिज्ञामात्रेण पूर्तेर्हेत्वाद्यभिधानवैय्यर्थ्यात् । किन्तु गृहीतव्याप्त्यादेः पुरुषस्य तत्स्मारकत्वादिनाऽगृहीतव्याप्त्यादेस्तु तज्जिज्ञासाजनकत्वेनोपयुज्यते । व्याप्तिस्मरणादिकं चैतैश्चतुर्भिरपि प्रकारैर्भवदनुभूयते । तत् किमनेन नियमेन ॥

(राघ.) **नियमानुपपत्तेश्चेति** ॥ पञ्चैवावयवास्त्रय एव द्वावेवेति नियमनामयोगाच्चेत्यर्थः । तां व्यनक्ति- **नहीत्यादिना** ॥ **आकाङ्क्षाद्यनुसारेणेति** । अग्निमानित्युक्ते कुत इति प्रमाणाकाङ्क्षायां धूमवत्त्वादिति हेतूक्तौ कथमस्याग्निसाधकतेति सामर्थ्यजिज्ञासायां प्राधान्यक्रमेण व्याप्तिपक्षधर्मतयोरुक्त्यर्थमुदाहरणोपनयौ सर्वस्य बुद्ध्यारोहाय निगमनमित्याकाङ्क्षायोग्यताद्यनुसारेणेत्यर्थः । **परस्य** प्रतिवादिनः । **परस्मिन्** वादिनि । गृहीतव्याप्त्यादेरित्यादिपदेन

पक्षधर्मतापरिग्रहः। व्याप्त्यादिस्मरणाद्यर्थमप्यवयवनियमोऽपेक्ष्यत इत्यत आह- **स्मरणादिकं चेति ॥ एतैश्चतुर्भिः प्रकारैरिति।** पूर्वोक्तप्रकारैरित्यर्थः। भट्ट-मतोक्तप्रकारद्वयं तथागतोक्तप्रकारं चोपेत्य चतुर्भिरित्युक्तम्॥

(वेदे.) ननु कथं नियमानुपपत्तिः। हेत्वाकाङ्क्षाप्रयोजकत्वेन प्रतिज्ञाया आवश्यकत्वे ततो हेत्वाकाङ्क्षायां लिङ्गस्वरूपमात्रबोधकहेतुवाक्यप्रयोगे कथमस्या गमकतेति जिज्ञासायां व्याप्तिपक्षधर्मतारूपसामर्थ्यद्वयबोधनायोदाहरणोपनययोः प्रवृत्तिः। ततः सर्वस्यैकबुद्ध्यारोहायैकवाक्यतामापादयितुं निगमनमपेक्षित-मित्याकाङ्क्षाद्यनुपपत्तिरेवावयवनियमकल्पिकेत्यत आह- **नहीदमिति ॥ आगमतया** आप्तवाक्यतया। **चतुर्भिरिति॥** नैयायिकसौगताभ्यामुक्तप्रकार-द्वयम्। मीमांसकोक्तं च प्रकारद्वयमिति प्रकारचतुष्टयं बोध्यम्। **अनुभूयत इति॥** अयं भावः। मीमांसकादीनां स्वस्वनियमानुसारेण त्र्यवयवद्व्यवयवप्रयोगे पञ्चावयवनियमवादिनां नैयायिकादीनां व्याप्त्यादिमल्लिङ्गोपस्थितिर्भवति न वा। नेति पक्षे नैयायिकादिर्मीमांसकादीन्न निराकुर्यात्। तदुक्तलिङ्गाबोधात्। एवं मीमांसकादयोऽपि न तान्निराकुर्युः। तदुक्तलिङ्गाबोधात्। प्रत्युत परस्परं स्वस्वावयवनियमसंरक्षणायैतेषां कथान्तरारम्भः स्यात्। तत्राप्युक्तरीत्या परस्पर-मबोधे स्वस्वावयवनियमसमर्थनानुपपत्तिरिति वादिप्रतिवादिनोर्मूकीभाव एवा-पद्येत। तस्मात् समयबन्धानुसारेण स्वस्वरीत्या प्रयोगे परस्परं बोधो भवतीत्याद्य एव पक्षोऽङ्गीकार्यः। एवं तर्हि पञ्चावयवादिनियमाभावेऽपि व्याप्त्यादि-मल्लिङ्गबोधोऽनुभूयत इति सर्वैरङ्गीकृतत्वान्न तन्नियमो युक्त इत्यर्थः॥

सम्भवन्ति चान्येऽपि प्रकाराः। पर्वतोऽग्निमान् धूमवत्त्वात् महानसवदिति वा। धूमवान् पर्वतोऽग्निमानिति हेतुगर्भं पक्षवचनं वा। विवादेनैव प्रतिज्ञासिद्धौ कुतः पर्वतोऽग्निमानिति प्रश्ने धूम-वत्त्वादिति हेतुमात्रं वा। पर्वतस्याग्निमत्त्वे किं प्रमाणमिति पृष्टे

धूमवत्त्वमिति लिङ्गोक्तिमात्रं वा। धूमवन्महानसवत्पर्वतोऽग्निमानिति सप्रतिज्ञं हेतुगर्भं दृष्टान्तवचनं वा। अग्निव्याप्यो धूमोऽत्र पर्वतेऽस्ती-त्युपनयो वा। व्याप्त्यादिमद्धूमवत्त्वात् पर्वतोऽग्निमानिति निगमनं वेति। सांव्यावहारिकैश्चैते प्रकाराः सर्वेषु शास्त्रेष्वित्येवंप्रकार-मनुमानमिति ॥

(राघ.) **सम्भवन्ति चेति॥** व्याप्तिस्मरणलिङ्गज्ञानजननविषय इति योज्यम्। महानसवदिति व्याप्तिग्रहस्थले उक्तेऽभिज्ञस्य व्याप्तिस्मृतिर्भवतीति भावः। **धूमवान् पर्वत इति॥** वह्निव्याप्यधूमवानिति विशेषणं ध्येयम्। लोके शास्त्रे च हेतुगर्भप्रयोगान् दृष्टवतो व्युत्पन्नस्य धूमवत्त्वं हेतुर्भवत्येवेति भावः। **विवादेनैवेति॥** अग्निमानिति कश्चिन्नाग्निमानित्यन्य इति विवादेनाग्निमान् पर्वत इति प्रतिज्ञासिद्धावित्यर्थः। अत्र पक्षे धूमवत्त्वादित्यस्य प्रश्नस्थेनाग्निमानि-त्यनेनान्वयान्नापार्थकता। अत्राप्यग्निव्याप्यधूमवत्त्वादिति विशेषणं ध्येयम्। धूमवत्त्वमित्यत्रापि अग्निव्याप्यधूमवत्त्वमिति ज्ञेयम्। **धूमवन्महानसवदिति॥** अस्मिन् पक्षे महानसवदित्यनेन व्याप्तिः। धूमवदिति दृष्टान्तविशेषणेन पक्ष(धर्म)तायाश्चोपस्थितिरिति भावः। इति पदस्येत्यन्ये प्रकारा इति पूर्वेणा-न्वयः। एते सप्तापि प्रकारा नालौकिका इत्याह- **सांव्यावहारिकाश्चेति॥** सम्यग्व्यवहारसिद्धा इत्यर्थः। उपसंहरति- **इत्येवंप्रकारमनुमानमिति॥** इति हेतोरस्मदुक्तप्रकारमेवानुमानमिति॥

(वेदे.) **अन्येऽपीति॥** प्रमाणलक्षणब्रह्मतर्काद्युक्ता इत्यर्थः। ननूक्तप्रकारेषु न्यूनाधिक्योद्भावनमेव कस्मान्न क्रियते। युक्तमेवायं ब्रवीतीति वादिनि प्रति-वादिनः प्रत्ययाभावादित्यत आह- **सांव्यावहारिका इति॥** प्रवृत्तिसामर्थ्यादर्थ-वत्प्रमाणमित्यादि तत्रतत्र शास्त्रे परीक्षकैर्व्यवहृताः सर्व एवैते प्रकारा इत्यर्थः। तथाच परीक्षकव्यवहारातिक्रम एव न्यूनाधिकमुद्भावनीयमिति भावः। उपसंह-रति- **इतीति॥** निरूपितमिति शेषः॥

॥ अनुमानदोषनिरूपणम् ॥

अथ निर्दोषोपपत्तिरनुमानमित्युक्तम् । के तत्रोपपत्तिदोषाः । यत्सद्भावे लिङ्गाभिमतं ज्ञानमेव न जनयति संशयविपर्ययौ वा करोति ते दोषाः । ते द्विविधाः । अर्थ-वचनदोषभेदात् । तत्र साक्षादुपपत्तेरेव दोषौ विरोधासङ्गती । तद्द्वारा वचनस्यापि । वचनदोषौ न्यूनाधिक्ये । वचनद्वारेणार्थस्यापि । तत्र योग्यताभावो विरोधः । आकाङ्क्षाविरहोऽसङ्गतिः । अवश्यवक्तव्यस्यैकदेशमात्रवचनं न्यूनं सान्निध्यभावविशेषः । आकाङ्क्षितस्यैवान्येन कृतकार्यस्य वचनमाधिक्यम् ॥

(राघ.) **अथेति** ॥ प्रश्नार्थोऽयमथशब्दः । पृच्छचत इत्यर्थः । उत्तरमाह- **यत्सद्भाव इति** ॥ प्रमाप्रतिबन्धकत्वं दोषत्वमित्यनुगमो ध्येयः । अर्थपदार्थं वदन्नेव तद्दोषं विभज्याह- **तत्रेति** ॥ तयोर्मध्ये । **साक्षात्** वचनद्वारमन्तरेणेत्यस्य विवरणार्थमेवकारः । **अर्थस्यापि** उपपत्तेरपीत्यर्थः । **योग्यताभाव इति** ॥ वह्निरनुष्णो वस्तुत्वादित्यादौ । पर्वतो नाग्निमानित्यादावाकाङ्क्षाविरहः । **अवश्येति** ॥ पर्वतो धूमवत्त्वादित्यादि । वचनदोषख्यापनायोक्तं सान्निध्याभावविशेष इति । **आकाङ्क्षितस्येत्यादि** ॥ पर्वतोऽग्निमानित्यादाविति ज्ञेयम् ॥

(वेदे.) अनुमानतदाभासविवेकाय पदव्यावृत्त्योपपत्तिदोषान् पृच्छति- **अथेति** ॥ **क इति** ॥ किंलक्षणकाः कति किंसञ्ज्ञकाश्चेत्यर्थः । अत्र क्रमेणोत्तरं वदन्नुपपत्तिदोषसामान्यलक्षणं तावदाह- **यत्सद्भाव इत्यादिना** ॥ इदमत्राकूतम् । यत्सद्भावे लिङ्गाभिमतमनुमितिप्रमां न जनयति स उपपत्तिदोषः । प्रमाजनकत्वाभावश्च संशयविपर्ययजनके ज्ञानाजनके च लिङ्गाभिमतेऽनुगत इति नाननुगमशङ्केति । ननूत्तरग्रन्थपर्यालोचनया समयबन्धादिसाधारणानामपि

विरोधादीनां लक्ष्यताप्रतीतेः तत्राव्याप्तमेतल्लक्षणमिति चेदुच्यते। अनुमानमात्र-निष्ठविरोधादीनामेवात्र लक्ष्यत्वेनाभिप्रेततया तेषामेतल्लक्षणलक्ष्यत्वाभावात् । तर्हि समयबन्धादिसाधारणविरोधादिलक्षणानुक्तिर्दोष इति चेत्। लिङ्गाभिमतं ज्ञापकत्वाभिमतमिति व्याख्यानेऽस्यैव तल्लक्षणत्वोपपत्तेः। अत एव ज्ञानमिति दोषा इति च सामान्येनोक्तम्। अन्यथाऽनुमित्युपपत्तिदोषा इति चावक्ष्यत्। एवञ्चात्रापि प्रमाप्रतिबन्धकत्वमेव दोषत्वम्। तत्प्रतिबन्धकत्वं च ज्ञानाजनकत्वेन क्वचिद्विपरीतज्ञानजनकत्वेन च विवक्षितमिति नाननुगतिरिति द्रष्टव्यम्। **साक्षात्** वचनोपधानेन विनोपपत्तेरेवेति प्रकृतत्वादुक्तम्। वस्तुतस्त्वर्थस्यैवेत्यर्थः। प्रायेण दोषाणां विरोध एवान्तर्भावात्। तमेवादावुद्दिशति- **विरोधेति**।। समयबन्धादि-साधारणविरोधादिलक्षणमाह- **तत्रेत्यादिना** ।। शब्ददोषोपपादनायाह- **सान्निध्येति**।। आकाङ्क्षितस्येत्यर्थान्तरनिरासायोक्तम्।।

एते च विरोधादयो द्विविधाः । समयवन्धप्रश्नस्वपक्षसाधनपर-पक्षनिराकरणात्मककथारूपसाधारणा अनुमाननिष्ठाश्च । तत्रानु-माननिष्ठास्तावदुच्यन्ते। त्रिविधोऽनुमानविरोधः। प्रतिज्ञाहेतुदृष्टान्त-विरोधभेदेन । तत्र प्रमाणविरोधः स्ववचनविरोध इति द्विविधः प्रतिज्ञाविरोधः । प्रमाणविरोधोऽपि द्वेधा । प्रवलप्रमाणविरोधः समबलप्रमाणविरोधश्चेति। हीनवलस्यानेनैव वाधितस्याकिञ्चित्कर-त्वात्। प्रावल्यं च द्विविधम्। वहुत्वेन स्वभावेन च। स्वभावश्चोप-जीव्यत्वं निरवकाशत्वमित्यादिरूपः। प्रत्यक्षादिविरोधभेदेन द्वावपि प्रत्येकं त्रिविधौ। समवलानुमानविरोधोऽपि द्वेधा। तेनैवानुमानेना-नुमानान्तरेण चेति। स्ववचनविरोधोऽपि द्विविधः। अपसिद्धान्तो जातिरिति। तत्र पूर्वाचार्यैर्यत् प्रामाणिकतयाऽभ्युपगतं तद्विरुद्धाङ्गी-

कारोऽपसिद्धान्तः । पूर्वाचार्यवचनस्यापि स्वयमङ्गीकृतत्वेन स्ववचनत्वात् ॥

(राघ.) परोदीरितहेत्वाभासानामनुमानदोषेषु विरोधादिष्वन्तर्भावोक्त्यर्थं तद्विभागमाह- **एते चेति ॥ कथारूपसाधारणाः** कथास्वरूपेऽप्युद्भावनीया इत्यर्थः । कीदृशी कथेत्यतस्तां विशिनष्टि- **समयबन्धेति ॥** तत्तत्सिद्धान्तानुसारेणावयवादिप्रयोगः कार्य इत्यादिसमयबन्धः । **तावदिति ॥** निरूप्यत इति शेषः । **अकिञ्चित्करत्वादिति ॥** अतो न परिगणनीय इत्यर्थः । इत्यादिरूप इत्यादिपदेन जातिकृतप्रावल्यग्रहः । **द्वावपीति ॥** प्रबलसमबलप्रमाणविरोधावपीत्यर्थः । **तेनैवेति ॥** वादिप्रयुक्तहेतुनैवेत्यर्थः । ननूक्तरूपापसिद्धान्तस्य कथं स्ववचनविरोधितेत्यत आह- **पूर्वाचार्यवचनस्यापीति ॥**

(वेदे.) परनिरूपताशेषनिग्रहस्थानानां विरोधादिष्वेवान्तर्भावं वक्तुं विरोधादिविभागमाह- **एत इति ॥** अनुमाननिष्ठास्तावदित्यत्र विरोधादय इत्यनुवर्तते । सामान्यलक्षणस्य पूर्वमेवोक्तत्वादनुमाननिष्ठविरोधं परोदीरिताशेषहेत्वाभासान्तर्भावकथनसौकर्याय विभजते- **त्रिविधेति ॥** साधारणोऽसाधारणश्च सम्भावित इति शेषः । कथं त्रैविध्यमित्यत आह- **प्रतिज्ञेति ॥** अत्र प्रतिज्ञापदेन पक्षोऽप्युपलक्ष्यते । हेतुपदेन लिङ्गं च । दृष्टान्तपदेनोदाहरणमपि । विरोधस्योभयदूषणत्वात् । तत्र प्रतिज्ञाविरोधः साधारणोऽन्यावसाधारणौ । तेन प्रतिज्ञाविरोधप्रभेदभूतानामपसिद्धान्तादीनां कथमनुमानमात्रदोषत्वमित्यादिदूषणमलग्नकं वेदितव्यम् । प्रतिज्ञातार्थप्रतिस्पर्धिसद्भावः प्रतिज्ञाविरोध इति प्रतिज्ञाविरोधलक्षणस्य स्फुटत्वात् तदनुक्त्वा विभागमेवाह- **तत्रेति ॥** यत्तु प्रमाणलक्षणटीकायां पक्षलक्षणराहित्यं प्रतिज्ञाविरोधलक्षणमुक्तं तदसाधारणप्रतिज्ञाविरोधाभिप्रायेणेत्यवगन्तव्यम् । हीनबलविरोधोऽपि कुतो नोक्तमत आह- **हीनेति ॥** प्रामाण्यातिरिक्तं किं प्राबल्यं नाम यद्धीनबलं नास्तीत्यत आह- **प्राबल्यं चेति ॥**

स्ववचन एव व्याहतिर्जातिः । सा त्रिविधा । एककर्तृके वाक्ये पदयोरवान्तरवाक्ययोर्वा मिथो व्याघातः स्वक्रियाविरोधः स्वन्याय-विरोधश्चेति ।

हेतुविरोधोऽपि द्विविधः । असिद्धिरव्याप्तिश्चेति । समुचितस्थले लिङ्गस्याप्रमितिरसिद्धिः । अव्याप्तिस्त्रिविधा । लिङ्गस्य साध्येन तदभावेन च सम्बन्धः साध्यसम्बन्धाभावे सति तदभावेनैव सम्बन्ध उभयसम्बन्धाभावश्चेति ।

दृष्टान्तविरोधोऽपि द्विविधः । साध्यवैकल्यं साधनवैकल्यं चेति ।

हेत्वादौ स्ववचनविरोधोऽसिद्ध्यादिनैव सङ्गृहीत इति नोक्तः । एवमसङ्गतिन्यूनाधिक्यान्यपि प्रतिज्ञाहेतुदृष्टान्तसम्बन्धभेदेन प्रत्येकं त्रिविधानि । एतेषामुदाहरणानि कथारूपसाधारणान् विरोधादींश्च परोदीरितनिग्रहस्थानानामेतेष्वेवान्तर्भावं वदन्तो दर्शयिष्यामः ।

॥ निग्रहस्थाननिरूपणम् ॥

न केवलमुपपत्तिदोषाणां विरोधादिभिः सङ्ग्रहः । किं नाम । नैयायिकनिरूपिताशेषनिग्रहस्थानानां वक्तृदोषाभ्यां संवादानु-क्तिभ्यां युतानामेतेष्वेवान्तर्भावः । ततश्च विरोधासङ्गती न्यूनाधिके संवादानुक्ती इति षडेव निग्रहस्थानानि । विप्रतिपन्नप्रमेयाङ्गीकारः संवादः । परबोधनार्थस्यावश्यं वक्तव्यस्यावचनमनुक्तिः । कथाया-मखण्डिताहङ्कारेण परेण परस्याहङ्कारखण्डनं पराजयो निग्रह इति चोच्यते । तन्निमित्तं निग्रहस्थानम् । अहङ्कारखण्डनं च स्वपक्ष-

साधनपरपक्षदूषणसङ्कल्पभ्रंशः । अत एव कथाबाह्यानि कथाया-मप्यपस्मारोन्मादादिदशापन्नानि झटिति संवरणेन तिरोहितोद्भाव-नावसराणि पुरस्फूर्तिकानधिकृतोद्भावितानि च व्यवच्छिन्नानि । परोक्तस्ववक्तव्ययोरज्ञानं विपरीतज्ञानं वा निग्रहः । तल्लिङ्गं निग्रह-स्थानमिति वा ॥

(राघ.) **स्ववचन एवेति** ॥ स्वकर्तृकवचन एव व्याहतिर्जातिरित्यर्थः । एवं प्रतिज्ञाविरोधं विभज्य क्रमप्राप्तं हेतुविरोधं विभजति- **हेतुविरोध इति** ॥ हेतुपदेन तदर्थपरिग्रहः । **अव्याप्तिः** व्याप्त्यभावः । **उभयसम्बन्धाभावश्चेति** ॥ साध्यवति सपक्षे साध्याभाववति विपक्षे चावर्तमानं पक्षमात्रे वर्तमानमिति यावत् । हेतुदृष्टान्तविरोधयोः प्रतिज्ञाविरोध इव स्ववचनविरोधः कुतो न गणित इत्यत आह- **हेत्वादाविति** ॥ धूमवत्त्वे सति निर्धूमत्वादित्यसिद्ध्युक्त्या स्ववचनस्य, तस्मिन्नेव हेतौ महानसवदित्युक्तौ साधनवैकल्येन स्ववचनविरोधः सङ्गृहीतः, तस्मिन्नेव हेतौ व्याप्त्यभावेनाव्याप्त्युक्त्या स्ववचनविरोधो लब्ध इति नोक्त इत्यर्थः । **एवं सङ्गतीत्यादि** ॥ गिरिरग्निमानित्युक्ते तरुशिलाद्यपि तत्रास्तीति प्रत्युक्तिरसङ्गतिः । हेतुरित्युक्ते हिनोतेस्तुन्प्रत्यये हेतुरिति रूपमिति प्रत्युक्ति-रसङ्गतिरित्येवं ध्येयम् । न्यूनाधिक्ये तु व्यक्ते । एवमनुमाननिष्ठा दोषा उक्ताः ।

कथारूपसाधारणाश्चेति प्रतिज्ञातं कुतो न प्रदर्शितमित्यत आह- **कथारूप-साधारणानिति** ॥ पुरुषदोषाणां निग्रहस्थानानां कथं विरोधादिष्वन्तर्भाव इत्यत आह- **संवादेति** ॥ संवादानुक्त्योः स्वरूपमाह- **विप्रतिपन्नेति** ॥ निग्रहस्थाना-नीत्युक्तनिग्रहस्थानशब्दार्थमाह- **कथायामिति** ॥ विचारगोचरानेककर्तृक-वाक्यप्रबन्धः कथा तस्यामित्यर्थः । **सङ्कल्पेति** ॥ स्वपक्षसाधनपरपक्षदूषणयोर्यः सङ्कल्पस्तद्भ्रंश इत्यर्थः । **अत एवेति** ॥ कथायामित्युक्तत्वादेव, कथाबाह्यानि व्यवच्छिन्नानीत्यन्वयः । **अत एव** अखण्डिताहङ्कारेणेति विशेषणस्याखण्डित-

साधनादिसङ्कल्पभ्रंशेनेत्यर्थकत्वादेव। कथायां प्रविष्टस्यापि वादिनोऽप-स्मारोन्मादसभाकम्पादिदशायां प्रतिवादिनोक्तान्यननुभाषणादीनि व्यवच्छि-न्नानि। तथा दूषणास्फूर्त्या क्षणं तूष्णीं स्थित्वा पुनर्दूषणस्फूर्तौ शीघ्रमप्रति-भातिरोहितस्य पुनः स्फूर्त्युद्भावनावसरे प्रतिवाद्युदितानि व्यवच्छिन्नानि। **कथाऽनधिकृतः** कथायामप्रविष्टो यस्तटस्थः। प्रतिवादिनो दूषणोक्तेः पूर्वमेव दूषणस्फूर्तिमान्। तेनोद्भावितान्यपि न पराजयकारणानि। परेण प्रतिवादिना अहङ्कारखण्डनमित्युक्तत्वादेवेत्यर्थः। तत्त्वाप्रतिपत्तिलिङ्गं वा निग्रहस्थानमिति परोक्तलक्षणं तदपि व्यक्तमाह- **परोक्तेति**॥ तल्लिङ्गं तज्ज्ञापकमित्यर्थः॥

(वेदे.) पदयोरवान्तरवाक्ययोर्वेति॥ स्ववाक्यविरोध इत्याद्या जातिः। सा पुनर्द्विधा। पदयोरवान्तरवाक्ययोर्वा विरोधभेदेनेत्युक्तं भवति। व्याघातो विरोधः। व्याप्तिविशिष्टस्य लिङ्गस्य समुचितस्थले प्रतीत्यभावो हेतुविरोध इति तल्लक्षणं स्फुटतयोपेक्ष्य तद्विभागमाह- **हेतुविरोध इति**॥ पक्षधर्मताया अनावश्यकत्वादाह- **समुचितस्थल इति**॥ अप्रमितिपदमज्ञानसिद्धिसङ्ग्रहाय। व्याप्तिसंवेदनस्थानत्वानुपपत्तिर्दृष्टान्तविरोध इति तल्लक्षणं शिष्यैरेवोह्यता-मित्यभिप्रेत्य तद्विभागमाह- **दृष्टान्तविरोध इति**॥

ननु स्ववचनविरोधस्य प्रतिज्ञायामिव हेत्वादावपि सम्भवाद्धेत्वादिविरोध-प्रभेदत्वमपि कुतो न तस्येत्यत आह- **हेत्वादाविति**॥ आदिपदेन दृष्टान्तवचनं गृह्यते। द्वितीयादिपदेन च साध्यवैकल्यादिसङ्ग्रहः। मूकत्वे सति वक्तृत्वादि-त्यादिरूपहेतावसिद्धिः। यथा डित्थोऽयं मूकत्वे सति वक्तेत्यादिरूपदृष्टान्त-वचने च साधनादिवैकल्यं स्पष्टमेव प्रतीयत इति भावः। एवं विरोधस्यानुमान-निष्ठत्वं निरूप्येदानीमसङ्गत्यादीनामपि तदाह- **एवमिति**॥ **एतेषाम्** अनुमान-निष्ठानां विरोधादीनाम्। नन्वननुभाषण-मतानुज्ञादीनां पुरुषदोषाणां कथ-

मेतेष्वन्तर्भाव इत्यत उक्तम्- **वक्तुर्दोषेत्यादि**॥ अविज्ञातार्थस्यान्तर्भावसिद्ध्यर्थं परबोधनार्थस्येत्युक्तम्। अशेषनिग्रहस्थानानां विरोधादिष्वन्तर्भाव इत्युक्तम्। तत्कथमित्यपेक्षायां परोक्तनिग्रहस्थानस्वरूपं सपरिकरमनुवदन् यथायोग्य-मुक्तान्तर्भावं दर्शयति- **कथायामित्यादिना**॥ पराजयनिमित्तं निग्रहस्थानमिति परलक्षणाभिप्रायानुसारेण पराजय इत्युक्त इति केचित्। वस्तुतस्तु पराहङ्कार-खण्डनरूपनिग्रहहेतूनामपि प्रतिज्ञाहान्यादीनां कथं पराजयहेतुतेत्याशङ्कायां निग्रहहेतुत्वोक्त्यैव पराजयहेतुता लभ्यते। निग्रहपराजयशब्दयोः पर्यायत्वा-दित्यभिप्रेत्याह- **पराजय इति**॥ ननु पराजयेऽप्यहन्त्वानपायादसम्भवीदं लक्षण-मित्यत आह- **अहङ्कारेति**॥ कथायामित्यखण्डिताहङ्कारेणेति च पदद्वय-कृत्यमाह- **अत एवेत्यादिना**॥ अत्र कथायामिति विशेषणादेव कथाबाह्यानि व्यवच्छिन्नानीति सम्बन्धः। अखण्डिताहङ्कारेणेति च विशेषणात् कथायामप्य-पस्मारोन्मादादिवशादापन्नानि व्यवच्छिन्नानि। तेषां तात्कालिकातत्त्वज्ञान-लिङ्गत्वेऽपि प्रतियोग्यपेक्षया तदभावात्। नचैवं प्रतियोगिनेत्येवास्तु किमखण्डि-ताहङ्कारेणेत्युक्तेति वाच्यम्। स्वस्याप्यहङ्कारखण्डने साम्यापत्त्या पर-पराजयासम्भवेन तथैव वक्तव्यत्वात्। **झटिति संवरणेति**॥ **झटिति** शीघ्रं **संवरणं** समीचीनाङ्गीकरणमित्यर्थ इत्याहुः। संवरणं स्वदोषाच्छादनमित्यप्याहुः। **तिरोहितेति**॥ तिरोहितो नाशित उद्भावनावसरो येषां तानीत्यर्थः।

अयं भावः।

'उक्तग्राह्याः केचिदन्येऽनुक्तग्राह्यास्तथा परे।
उच्यमानदशा ग्राह्या इति कालस्त्रिधा मतः॥'

इति परेण निग्रहस्थानोद्भावनकालस्त्रिविध उक्तः। तत्रोच्यमानकालोद्भावनीय-मपशब्दादिकं प्रमादादुक्त्वा वादी झटिति संवरणं कुर्यात् तदा प्रतिवादिना तस्मिन्

काले तन्निग्रहस्थानं न वाच्यम्। वादिकृतझटितिसंवरणेन तदुद्भावनावसरस्य नाशितत्वात्। दोषोक्तेः प्रागेव समाधानादिति। एवमुदयनोक्तं निग्रहस्थानशब्द-प्रवृत्तिनिमित्तं लक्षणमुक्त्वाऽप्रतिपत्तिर्विप्रतिपत्तिर्वा निग्रहस्थानमिति गौतम-सूत्रानुसारेण लक्षणान्तरमाह- **परोक्तेति**॥ अत्र तत्त्वाप्रतिपत्तिलिङ्गं निग्रह-स्थानम्। तत्त्वाप्रतिपत्तिश्च द्विविधा। अज्ञानरूपाऽप्रतिपत्तिर्विपरीतज्ञानरूपा विप्रतिपत्तिश्चेत्यर्थो विवक्षितः। अन्यथाऽनुगताकारालाभात्। उभयानुगताप्रति-पत्तिस्ताभ्यां लक्ष्यत इति परोक्तेः। लिङ्गमित्येतत् कथं सूत्रलब्धमिति चेत्। 'सा च परबुद्धेरप्रत्यक्षत्वात् स्वरूपतो न निग्रहस्थानं भवतीति स्वज्ञापकं भवति' इति परैर्व्याकृतत्वात्। एवं सति प्रमालक्षणटीकाऽप्यनुकूलिता भवतीति द्रष्टव्यम्॥

तानि च। १॥ प्रतिज्ञाहानिः॥ २॥ प्रतिज्ञान्तरम्॥ ३॥ प्रतिज्ञाविरोधः॥ ४॥ प्रतिज्ञासन्न्यासः॥ ९॥ हेत्वन्तरम्॥ ६॥ अर्थान्तरम्॥ ७॥ निरर्थकम्॥ ८॥ अविज्ञातार्थम्॥ ९॥ अपार्थकम्॥ १०॥ अप्राप्तकालम्॥ ११॥ न्यूनम्॥ १२॥ अधिकम्॥ १३॥ पुनरुक्तम्॥ १४॥ अननुभाषणम्॥ १५॥ अज्ञानम्॥ १६॥ अप्रतिभा॥ १७॥ विक्षेपः॥ १८॥ मतानुज्ञा॥ १९॥ पर्यनुयोज्योपेक्षणम्॥ २०॥ निरनुयोज्यानुयोगः॥२१॥ अपसिद्धान्तः॥ २२॥ हेत्वाभासश्चेति द्वाविंशतिः॥

(राघ.) तानि निग्रहस्थानानि। वक्ष्यमाणबहुत्वापेक्षया बहुवचनम्॥

प्रतिज्ञाहानिः॥ तत्र येन यद् यथा साध्यत्वादिना निर्दिष्टं तेन तस्य तथा परित्यागः प्रतिज्ञाहानिः। यथा पर्वतोऽग्निमान् प्रमेय-त्वादित्युक्तेऽनैकान्तिकत्वेन च प्रत्युक्ते मा भूत् तर्हि पर्वतोऽग्निमा-निति। अयं तु संवाद एव।

(राघ.)एतेषां क्रमाल्लक्षणोदाहरणानि वदन्नेव कानिचिन्ननिग्रहस्थानानि केषाञ्चिन्निग्रहस्थानत्वेऽपि स्वोक्तनिग्रहस्थानेषु यथासम्भवमन्तर्भाव इत्याह - **तत्रेति** ।। तेषु मध्य इत्यर्थः ।।

(वेदे.) **तत्रेति** ।। उद्दिष्टेष्वित्यर्थः । **येन** वादिना प्रतिवादिना वा । कथायामित्युपस्कर्तव्यम् । **यत्** पक्षहेतुदृष्टान्तानामन्यतमत् । **यथा** येन प्रकारेण । **तेन** वाद्यादिना । **तस्य** पक्षाद्यन्यतमस्य । **तथा** तेन प्रकारेण । अत्र कथायामित्युक्त्या कथाबाह्यपक्षादित्यागे, येन तेनेति समानार्थकर्तृकत्वोक्त्या भिन्नकर्तृकत्यागे, यत् तत्तस्येति प्रमेयैक्योक्त्या भिन्नप्रमेयत्यागे, यथा तथेति प्रकारैक्योक्त्यैकस्यैव पक्षादेः प्रमेयस्यैक्येनैव पुंसा प्रकारान्तरेण च त्यागे चातिव्याप्तिः परिहृतेति ज्ञातव्यम् । प्रतिज्ञाहानेर्बहुविधत्वेऽपि दिङ्मात्रप्रदर्शनायोदाहरति- **यथेति** ।। एवमग्रेऽपि द्रष्टव्यम् । विस्तरस्तु प्रमाणलक्षणटीकातोऽवगन्तव्यः । अयमिति त्यागपरामर्शः । विधेयलिङ्गत्वं वा ।।

प्रतिज्ञान्तरम् ।। प्रथममविशिष्टतयोक्ते साध्यभागे पुनर्विशेषणप्रक्षेपः प्रतिज्ञान्तरम् । प्रतिज्ञोदाहरणे प्रयोज्यभागो, निगमनं चेति साध्यभागः । यथा शब्दोऽनित्य इति प्रतिज्ञाते ध्वनिभिः सिद्धसाधनत्वोद्भावने वर्णात्मकः शब्दोऽनित्य इत्यादि ।

अत्र वक्तव्यम् । किं पूर्वैव कथाऽनुवर्ततेऽथ कथान्तरम् । नाद्यः । एकस्य साधनस्य दूषणस्य वा स्थितौ भङ्गे वा कथायाः परिसमाप्तत्वात् । साधनान्तरोपन्यास (स्यावसराभावात्)स्य व्यर्थत्वात् । नचेदं पूर्वोक्तमेव । तथात्वे पूर्वदूषणेनैव दुष्टत्वप्रसङ्गात् । न द्वितीयः । तथा सति प्रथममेव विशिष्टस्योपात्तत्वेन प्रतिज्ञान्तराभावात् । वादे तु कथैक्येऽपि न निग्रहस्थानम् । शङ्कानिवृत्तिपर्यन्तं प्रतिवक्तव्य-

त्वात्। सत्यम्। निवृत्तयोरपि जल्पवितण्डयोः पुनर्विशेषणं प्रक्षिपतः को दोष इति चेत्। असङ्गत्यादिकमिति ब्रूमः। तदपि कथाबाह्यत्वान्न निग्रहस्थानम् ॥

(राघ.) अत्रेति ॥ विशेषणप्रक्षेपणरूपप्रतिज्ञान्तर इत्यर्थः। **स्थितौ भङ्गे** वेति द्वयोः प्रत्येकमन्वयः। **पूर्वोक्तमेवेति** ॥ पूर्वोक्तपक्षवचनरूपमेव नाधिकम्। येन कथान्तरप्रसक्तिरिति भावः। **तथा सतीति** ॥ कथान्तरे सतीत्यर्थः। **विशिष्टस्य** विशेषणयुक्तस्य। ननु जल्पवितण्डयोः कथाभेदेन प्रतिज्ञान्तरस्योक्तदिशा प्रसक्त्यभावेऽपि वादकथायां स्यादित्यत आह- **वादे त्विति** ॥ **शङ्कानिवृत्तिपर्यन्तमिति** ॥ तत्त्वनिर्णयफलकत्वात् तस्येति भावः। शङ्कते- **सत्यमिति** ॥ प्रागुक्तं सत्यं यथार्थमित्यर्थः। असङ्गत्यादीत्यादिपदेनाप्राप्तकालताग्रहः। पदयोर्विरोधे वाक्ययोर्विरोधे च क्रमादुदाहरणे ॥

(वेदे.) हेत्वन्तरव्यावृत्तये साध्यभाग इत्युक्तम्। अस्य निग्रहस्थानत्वमेव नास्ति कुतोऽन्तर्भावचिन्तेत्याशयेनाह- **अत्रेत्यादिना** ॥ **साधनान्तरेति** ॥ हेत्वैक्येऽपि प्रतिज्ञान्तरकरणेन साधनान्तरत्वमिति भावः। **नचेदमिति** ॥ हेत्वैक्यादिति भाव इत्याहुः। वस्तुतस्तु विशिष्टस्य विशेष्यादिनाऽभेदादेवमुक्तमिति द्रष्टव्यम्। अत एवाह- **तथात्व इति** ॥ **प्रथममिति** ॥ कथान्तरस्यैव प्राथमिकत्वादिति भावः। ननु वादे कथैक्यसम्भवात् तत्रेदं निग्रहस्थानं भविष्यतीत्यत आह-**वाद इति** ॥ प्रतिज्ञान्तरमिति शेषः। तटस्थः पृच्छति-**सत्यमिति** ॥

प्रतिज्ञाविरोधः ॥ एकवक्तृके वाक्ये पदानामवान्तरवाक्यानां वा मिथो व्याघातः प्रतिज्ञाविरोधः। यथा मे माता वन्ध्येति। द्रव्यं गुणव्यतिरिक्तमव्यतिरिक्तत्वादिति। अयं च प्रथमजातित्वात् स्ववचनविरोध एव ॥

(राघ.) यथा मे माता वन्ध्येत्यादि ॥ 'वाक्यादौ न' इति निषेधो नञा निर्दिष्टमनित्यमिति न भवतीति मे मातेति साधु। **प्रथमेति** ॥ पूर्वोक्तजातिविभागे प्रथमजातित्वादित्यर्थः ॥

(वेदे.)**एकवक्तृक** इति भिन्नवक्तृकवाक्ये मिथो विरुद्धेऽतिव्याप्तिवारणाय। महावाक्येऽवान्तरवाक्यानामवान्तरवाक्ये च पदानां मिथो व्याघात इति विशब्दार्थ उक्तः । एकवक्तृकमिथोविरुद्धवाक्यत्वमेव लक्षणं द्रष्टव्यम् । अवान्तर-वाक्यगतपदयोर्मिथो विरोधमुदाहरति- **यथा मे मातेति** ॥ अवान्तरवाक्ययोर्मिथो विरोधमुदाहरति-**द्रव्यमिति** ॥ अन्तर्भावमाह-**अयमिति** ॥ **प्रथमजातित्वाद्** उक्तप्रथमजातिलक्षणाक्रान्तत्वात् । **स्ववचनविरोध एवेति** ॥ जातेश्च स्ववचनविरोधप्रभेदरूपत्वादिति भावः ॥

प्रतिज्ञासन्न्यासः ॥ स्वोक्तापलापः प्रतिज्ञासन्न्यासः । यथाऽग्नि-रनुष्ण इत्युक्ते प्रत्यक्षविरोधे चाभिहिते ब्रवीति 'न मयाऽग्निरनुष्ण इत्यभिहितः' इति । सोऽपि प्रमाणविरोध एव । उक्तेः प्रमित-त्वात् ॥

(वेदे.) स्वोक्तेत्यत्रोक्तमिति भावे क्तः । तथाच स्वोक्त्यपलाप इत्यर्थः । अत एवाह- **उक्तेरिति** ॥

हेत्वन्तरम् ॥ प्रथममविशिष्टतयोक्ते साधकांशे पुनरधिकप्रक्षेपो हेत्वन्तरम् । हेतुः, उदाहरणे प्रयोजकांशः, उपनयः, दूषणं चेति साधकांशः । यथा शब्दो नित्य ऐन्द्रियकत्वादित्युक्ते सामान्येना-नैकान्त्येऽभिहिते सामान्यवत्त्वे सतीत्यादि ।

एतत्प्रतिज्ञान्तरनिरासेनैव निरस्तम् । प्रतिज्ञाग्रहणस्योक्तोप-

लक्षणत्वेन पृथङ् न वक्तव्यं च । अनुपलक्षणत्वे तु उदाहरणान्तरादिकमपि पृथग्वाच्यं स्यात् । प्रतिज्ञापदेन साध्यांश एवोपलक्ष्यत इति चेन्न । वैयर्थ्यात् । अन्यथा प्रतिज्ञाहान्यादावपि किं विभागो न क्रियत इति ।।

(राघ.) **दूषणं चेति** ।। इदमसाधकमसिद्धत्वादिति दूषणं चेत्यर्थः । **प्रतिज्ञान्तरनिरासेनैवेति** ।। पूर्वकथाऽनुवर्तते कथान्तरं वेत्यादिविकल्पो दूषणानि चात्राप्यनुसन्धेयानीत्यर्थः । अतो नास्यान्तर्भावो वाच्य इति भावः । **प्रतिज्ञाग्रहणस्येति** ।। निग्रहस्थानपरिगणनसूत्रे प्रतिज्ञान्तरमित्यत्र प्रतिज्ञापदेन हेतोरप्युपलक्षणे सति प्रतिज्ञान्तरं हेत्वन्तरमिति द्वयोरपि ग्रहणसम्भवे पुनर्हेत्वन्तरमिति न वक्तव्यम् । **उदाहरणान्तरादिकमिति** ।। उपनयान्तरम् । दूषणेऽपि हेतावधिकप्रक्षेपेण दूषणान्तरमपीत्यादिपदार्थः । **किं विभाग इति** ।। हेतुहानिर्हेतुसन्न्यास उदाहरणहानिरुदाहरणसन्न्यास इत्यादिरपि पृथग्वाच्यः स्यादित्यर्थः ।।

(वेदे.) **साधकांश** इति च प्रतिज्ञान्तरव्यावृत्त्यर्थम् । **दूषणं चेति** ।। असाधकताहेतुरित्यर्थः । **वैय्यर्थ्यादिति** ।। साध्यांशमात्रोपलक्षणस्य प्रयोजनविशेषानुपलम्भेन व्यर्थत्वादिति भावः । **अन्यथेति** ।। यदि प्रतिज्ञापदेन साध्यांशमात्रमुपलक्ष्य हेत्वन्तरं पृथगुच्येत तदा प्रतिज्ञाहानिरित्यत्रापि प्रतिज्ञापदेन साध्यांशमात्रमुपलक्ष्य हेतुहान्यादिकमपि पृथग्वाच्यं स्यादित्यर्थः । आदिपदेन प्रतिज्ञाविरोधग्रहणम् । तस्मात् तत्र यथा प्रतिज्ञापदेन हेत्वादिकमुपलक्ष्य हेतुहान्यादिकं पृथङ् नोच्यते । तथा हेत्वन्तरमपि पृथङ् न वाच्यमिति भावः । अर्थान्तरलक्षणे आधिक्येऽतिव्याप्तिवारणाय **प्रकृतानुपयुक्तेति**। अपार्थकव्यावृत्तयेऽन्वितेति च विशेषणमुक्तमिति द्रष्टव्यम् ।।

अर्थान्तरम् ।। प्रकृतानुपयुक्तान्वितोक्तिरर्थान्तरम् । यथा शब्दो

नित्यः प्रमेयत्वादित्यत्र प्रमेयत्वं हेतुः । हेतुशब्दश्च हिनोतेर्धातोस्तुन्प्रत्यये कृते सति कृदन्तं पदमित्यादि । इदमनाकाङ्क्षितत्वादसङ्गतिरेवेति ॥

(राघ.) प्रकृतेति॥ अपार्थकेऽनतिव्याप्तयेऽन्वितेत्युक्तिः। उपयुक्तवचनेऽनतिव्याप्तये प्रकृतानुपयुक्तेत्युक्तिः ॥

निरर्थकम् ॥ अवाचकपदप्रयोगो निरर्थकम् । यथा शब्दो नित्यः कचटतपानां जबगडदत्वादित्यादि । इदं त्वनुक्तिरेव ॥

(राघ.) **अनुक्तिरेवेति॥** परबोधनार्थमवश्यवक्तव्यस्यावचनरूपत्वादिति भावः ॥

(वेदे.) **अनुक्तिरेवेति॥** परबोधनार्थं वक्तव्यस्यावचनादिति भावः ॥

अविज्ञातार्थम् ॥ त्रिवारमुक्तेऽपि परिषत्प्रतिवादिभ्यामविज्ञातार्थवाचकपदमविज्ञातार्थम् । यथा काश्यपतनयाधृतिहेतुरयं त्रिणयनतनयासनसमानननामधेययुक्तः इत्यादि । तद्ध्वजवत्त्वादित्यादि । इदमप्यनुक्तिरेव ॥

(राघ.) **त्रिवारमुक्तेऽपि**। वादिनेति योज्यम्। **काश्यपतनया** पृथिवी, तस्या धृतिहेतुर्धारणहेतुः पर्वत इति यावत्। **त्रिणयनतनयो** रुद्रपुत्रः स्कन्दः। तस्य **आसनं** मयूरापरपर्यायवाच्यः शिखी **तत्समाननामधेयः** शिखीति नामवान् वह्निरिति यावत्। तेन युक्त इत्यर्थः। **अनुक्तिरेवेति॥** परबोधनार्थत्वाभावादिति भावः ॥

(वेदे.) **त्रिवारेति॥** नियमस्यानवधानादिशङ्कानिवारणाय प्राश्निकैरपेक्ष-

णात्। सकृदुक्ताविज्ञातार्थव्यावृत्त्यर्थं त्रिवारमित्युक्तम्। अज्ञाननिरासाय परिषत्पदम्। प्रतिवादिविज्ञाते परिषदविज्ञाते परपराजयनिमित्तेऽतिव्याप्तिवारणाय प्रतिवादिपदं द्रष्टव्यम्। वाचकेत्युपलक्षणम्। अन्वितेत्यपि द्रष्टव्यम्। ताभ्यां च क्रमेण निरर्थकापार्थकोभयव्यावृत्तिः। **काश्यपतनया भूस्तद्धृतिर्धारणं तद्धेतुस्तद्धर्ता भूधर** इत्यर्थः। **त्रिणयनो** रुद्रस्तस्य **तनयः** षण्मुखः तदासनं मयूरस्तेन **समानं** साधारणं शिखीति नामधेयं यस्य वह्नेस्तेन युक्त इत्यर्थः। **अनुक्तिरेवेति**॥ परबोधनार्थत्वाभावादिति भावः॥

अपार्थकम् ॥ अनन्वितवाचकपदादिप्रयोगोऽपार्थकम्। यथा कुण्डमजाजिनं दशदाडिमानि षडपूपा इत्यादि। इदञ्च स्फुटमसङ्गतम्॥

(राघ.) **अनन्वितेति**॥ एतच्चार्थान्तरव्यावृत्त्यर्थम्। निरर्थकनिरासाय वाचकेति॥

(वेदे.) अनन्वितवाचकपदाभ्यां क्रमेणार्थान्तरनिरर्थकव्यावृत्तिः। आदिपदेन वाक्यपदप्रयोगसङ्ग्रहः। **स्फुटमिति**॥ आकाङ्क्षाविरहादिति भावः॥

अप्राप्तकालम् ॥ क्रमविपर्यासोऽप्राप्तकालम्। यथा कृतकत्वादनित्यः शब्द इत्यादि। इदं किञ्चिन्न निग्रहस्थानम्। प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणमित्यादिसंव्यवहारात्। निग्रहस्थानं त्वसङ्गतिरेव॥

(राघ.) **न निग्रहस्थानमिति**॥ न पराजयाहेतुरित्यर्थः। तत्र हेतुः प्रवृत्तीत्यादि। **प्रवृत्तिसामर्थ्यात्** समर्थप्रवृत्तिजनकत्वाद् **अर्थवत्** सदर्थविषयकं प्रमाणमित्यर्थः। न्यायसूत्रे प्रतिज्ञाहेत्वोर्व्यत्यासेन, तथा आम्नायस्य क्रियार्थत्वादानर्थक्यमिति जैमिनिसूत्रे, ईक्षतेर्नाशब्दमिति व्याससूत्रादौ च व्यत्यासेन निर्देशने

सतामेव व्यवहारादित्यर्थः। क्वचित् संव्यवहारादिति पाठः। नन्वेवमादेरनिग्रहस्थानत्वेऽपि प्रमाणलक्षणग्रन्थोक्तदिशाऽऽभासोद्धारानन्तरं साधनमुपन्यस्यति संवादविपर्यास इत्यादेरपि निग्रहस्थानत्वमस्तीत्यत आह- **निग्रहस्थानं त्विति** ॥

(वेदे.) **क्रमेति** ॥ कथायां विवक्षितक्रमेत्यर्थः । अयमिह वादजल्पयोर्विवक्षितक्रमः । सभ्यादिसङ्ग्रहपुरःसरं कथानियमबन्धे कृते वादिना प्रमाणत्वात् स्वपक्षे प्रमाणमभिधायाभासोद्धारः कर्तव्य इति। प्रतिवादिनाऽपि वादिसाधनमनूद्य दूषयित्वा स्वपक्षे प्रमाणमभिधायाभासोद्धारः कर्तव्य इति। तत्र यदि वादी साधनमुक्त्वा कथानिबन्धमिच्छति तदाऽऽरम्भविपर्यासः । यदाभासोद्धारानन्तरं साधनं प्रयुङ्क्ते तदा वादांशविपर्यासः। प्रतिवादी च यदा स्वपक्षसाधनमभिधाय परपक्षं दूषयति तदा वादविपर्यासः। धूमवत्त्वात् पर्वतोऽग्निमान् इत्याद्यवयवविपर्यासः । अग्निमान् पर्वत इत्याद्यवयवांशविपर्यासः । वितण्डायां तु प्रतिवादिनः स्वपक्षसाधनाभावाद् वादविपर्यासाभाव इति । तत्रोपलक्षणत्वेनावयवविपर्यासमेवोदाहरति- **यथेति** ॥ उक्तविपर्यासेष्ववयवांशविपर्यासरूपं किञ्चिन्निग्रहस्थानमेव न भवत्यतोऽन्तर्भावमेव नार्हति। अवशिष्टं तु भवति निग्रहस्थानम् । तच्चासङ्गत्यन्तर्भूतमित्याह- **इदमित्यादिना**॥ **अर्थवदिति**॥ अर्थाव्यभिचारीत्यर्थः। आदिपदेनानित्यः शब्द इत्याद्यभियुक्तप्रयोगसङ्ग्रहः । उक्तरीत्याऽवयवप्रयोगे नियमाभावादिति भावः । **असङ्गतिरेवेति** ॥ समयबन्धानुसारेणैवाकाङ्क्षोदयेन तद्विपर्यासेनाकाङ्क्षिताभिधानत्वेनासङ्गतित्वमिति भावः ॥

न्यूनम् ॥ **अवश्योपादेयानामन्यतमानुपपादनं न्यूनम् । यथा पर्वतोऽग्निमान् महानसवदित्यादि । एतन्न्यूनमेव** ॥

अधिकम् ।। अन्वितोपयुक्तापुनरुक्तकृतकार्यप्रयोगोऽधिकम् । यथा पर्वतोऽग्निमान् धूमवत्त्वात् प्रकाशविशेषवत्त्वाच्चेत्यादि । एतदधिकमेव ।।

(राघ.) अन्वितेति ।। अपार्थकेऽर्थान्तरे पुनरुक्तेऽसाधुप्रयोगे चानतिव्याप्तये क्रमाद् विशेषणानि ।।

(वेदे.) अन्वितेति ।। अत्रापार्थकार्थान्तरपुनरुक्तिसदुक्तिपरिहाराय क्रमेण विशेषणानि ।।

पुनरुक्तम् ।। प्रतीतार्थस्य पुनः स्ववचनेन प्रयोजनं विनाऽभिधानं पुनरुक्तम् । यथा पर्वतोऽग्निमान् पर्वतोऽग्निमानित्यादि । एतदधिकमेव ।।

(वेदे.) स्ववचनेन प्रतीतार्थस्येति सम्बन्धः । निगमनेऽतिव्याप्तिवारणाय प्रयोजनं विनेति ।।

अननुभाषणम् ।। वादिनोक्तस्य प्राश्निकैर्विज्ञातार्थस्य वादिना परिषदा वा पुनरनूद्य दत्तस्योच्चारणयोग्यस्य स्वाज्ञानमनाविष्कुर्वता कथामविच्छिन्दता यदप्रत्युच्चारणं तदननुभाषणम् । तत् पञ्च-विधम् । यत्तदित्याद्यनुवादो दूष्यैकदेशानुवादः केवलं दूषणोक्ति-रन्यथानुवादस्तूष्णींभावश्चेति । तत्राद्यत्रयं न्यूनम् । चतुर्थमसङ्ग-तम् । पञ्चममनुक्तिः ।।

(राघ.) वादिनोक्तस्येति ।। अनुक्तिनिमित्ताप्रत्युच्चारणव्यावृत्तये वादिनोक्तस्येत्युक्तम् । अविज्ञातार्थकस्य मनोव्यासङ्गनिमित्ताप्रत्युच्चारण-

स्यातितीव्रोच्चारितस्याज्ञाननिग्रहस्थानस्य विक्षेपस्य च व्यावृत्तये क्रमात् प्राश्नि-कैर्विज्ञातार्थकस्येत्यादिषष्ठ्यन्तानि त्रीणि तृतीयान्ते द्वे चेति पञ्च विशेषणानि ॥

(वेदे.) प्राश्निकैरित्यनेनाविज्ञातार्थव्यवच्छेदः । वादिनेति परिषदेत्युच्चार-णेति च दोषत्वोपपादनाय स्वरूपकथनं न व्यावर्तकम् । स्वाज्ञानमनाविष्कुर्वते-त्यनेनाज्ञानस्य व्यवच्छेदः । तत्राज्ञानाविष्करणस्य वक्ष्यमाणत्वात् । कथा-मविच्छिन्देत्यनेन विक्षेपस्य निरासः । अन्तर्भावकथनसौकर्याय तद्विभागमाह-तदिति ॥

अज्ञानम् ॥ वादिना त्रिवारमभिहितस्य परिषदा विज्ञातार्थस्य वाक्यस्यार्थाप्रतिपत्तिरज्ञानम् ॥

(राघ.) अज्ञानाप्रतिभाविक्षेपाणां त्रयाणां क्रमेण लक्षणानि वदन्नन्तर्भाव-माह- **वादिनेति** ॥ अविज्ञातार्थव्यावृत्तये परिषदा विज्ञातार्थस्येत्युक्तिः ॥

(वेदे.) वादिनाऽसकृद् द्विवारं चोक्ते तदर्थाप्रतीतेरदूषणत्वात् तत्राति-व्याप्तिपरिहाराय त्रिवारमभिहितस्येत्युक्तम् । परिषदेत्यविज्ञातार्थनिषेधः ॥

अप्रतिभा ॥ वादिनोक्तस्य प्रत्युत्तराप्रतिपत्तिरप्रतिभा ॥

(वेदे.) **अप्रतिपत्तिरिति** ॥ अप्रतिपत्त्युद्भावनमित्यर्थः । अन्यथाऽननु-भाषणेऽतिव्याप्तेः । अत एव स्वाज्ञानमुद्भावयति तदा ज्ञानेन निग्रह इत्यपर आह । प्रमाणलक्षणटीकायामपि तच्चाविष्कारेण ज्ञातव्यमित्यादिपदेनेदमेव-मभिहितम् । अप्रतिभालक्षणेऽनूदितस्येत्यपि ग्राह्यम् । अन्यथाऽननुभाषणेऽ-तिव्याप्तेः । उक्तञ्च तथा प्रमाणलक्षणटीकायाम् ॥

विक्षेपः ॥ केनचिद् व्याजेन कथाविच्छेदो विक्षेपः । यथा

कथामारभ्याह- अद्य मे महत्प्रयोजनमस्ति तस्मिन्नवसिते वक्ष्यामीति । एतत्त्रयमनुक्तिरेव ॥

(राघ.) तृतीयं व्यनक्ति- कथामारभ्येत्यादिना ॥ अवसिते समाप्ते ॥

(वेदे.) व्याजेन व्याजवचनेन। अत्रापि कथामुपक्रम्येति वक्तव्यम्। अन्यथा कथोपक्रमाभावकालीने व्याजवचनेऽतिप्रसक्तेरिति बोध्यम्। अत एवाह- यथा कथामारभ्याहेति ॥ परोऽपि कथामभ्युपगम्यैवेति ॥ अनुक्तिरेवेति ॥ यत्किञ्चिदुक्तावपि वक्तव्यस्यावचनादिति भावः ॥

मतानुज्ञा ॥ इष्टापादनं मतानुज्ञा । यथा केनचित् स्वस्य चोरत्वमभ्युपेत्य त्वं चोरः पुरुषत्वादित्युक्ते तर्हि तवापि चोरत्वं प्रसज्येतेति । इयमसङ्गतिरेव ॥

(राघ.) इयमसङ्गतिरेवेति ॥ तर्केऽनिष्टापादनस्य सङ्गतत्वेनेष्टापादनस्यानाकाङ्क्षितत्वादिति भावः ॥

(वेदे.) इष्टापादनमिति ॥ कथायामित्युपस्कर्तव्यम् । अत्रानिष्टभ्रमत इति पूरणीयम्। तच्चेष्टस्यापादनासम्भवेनासम्भववारणाय। तथाचोक्तम्- अनिष्टभ्रमतोऽन्येषामिति। असङ्गतिरेवेति॥ अनिष्टापादनस्यैव सङ्गतत्वादिति भावः॥

पर्यनुयोज्योपेक्षणम् ॥ अवश्योद्भाव्यतया प्राप्तनिग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणम् । इदमप्यनुक्तान्तर्गतम् ॥

(राघ.) अनुद्भावनमिति ॥ अल्पत्वादिबुद्ध्येति भावः ॥

(वेदे.) अवश्योद्भाव्येति ॥ पर्यनुयोज्योपेक्षणव्यतिरिक्तनिग्रहप्राप्तौ तदनुद्भावनमेव निग्रहहेतुर्नतु पर्यनुयोज्योपेक्षेणानुद्भावनमपि साम्यापादकत्वादिति

परैरङ्गीकृतत्वेन पर्यनुयोज्योपेक्षणानुद्भावनस्योद्भावनयोग्यताभावेन तदनुद्भावनेऽतिव्याप्तिनिरासायोद्भाव्येत्युक्तम्। तथाऽप्यनेकदोषसम्पाते यदाधिक्यभयेनैकमेवोद्भाव्यते तदा तदितरानुद्भावनेऽतिव्याप्तिनिरासायावश्येति। तत्रचोद्भावितेतरेषामुद्भावनयोग्यतारूपोद्भाव्यत्वे सत्त्वेऽप्यन्यतमोद्भावनेनैव परपराजयस्य जातत्वान्न तावताऽवश्योद्भाव्यत्वमिति भावः। वादे न्यूनादेरुद्भाव्यतया प्राप्तस्यानुद्भावनेऽतिप्रसङ्गपरिहारायेदमित्यप्याहुः। एवमपि झटितिसंवरणेन तिरोहितोद्भावनावसराणामपशब्दादीनामनुद्भावनेऽतिव्याप्तिपरिहाराय प्राप्तेति प्राप्तकालेत्यर्थः। नच तदुद्भावनायोग्यतैव नेति वाच्यम्। तत्र झटिति संवरणेनोद्भावनावसरस्यापगमेनोद्भावनविषयतावच्छेदकनिरर्थकत्वादिरूपयोग्यतानुगमात्। एवञ्चोक्तस्थले उद्भाव्यत्वसत्त्वेन तन्नियतप्राप्तेरवश्यम्भावेऽपि प्राप्तकालत्वाभावान्नातिव्याप्तिरिति ध्येयम्॥

निरनुयोज्यानुयोगः ॥ अतन्निग्रहप्राप्तौ तन्निग्रहोद्भावनं निरनुयोज्यानुयोगः। स चतुर्विधः। छलं, जातिः, हान्याद्याभासः, अप्राप्तकाले ग्रहणं चेति। तत्र परोक्तस्य तदभिप्रेतार्थान्तरं परिकल्प्य तद्दूषणेन परोक्तभङ्गः छलम्। यथा गृष्टिविवक्षया गामानयेत्युक्ते पृथिवीविवक्षया गवानयनमशक्यमिति। एतदसङ्गतम्। विवक्षितदूषणस्यैवाकाङ्क्षितत्वात्। छलवाक्यस्याप्यर्थान्तरं परिकल्प्य 'गवा नयनम्' इत्यनन्वितमिति दूषणसम्भवेन स्वन्यायविरोधेऽप्यन्तर्भवति छलम्॥

(राघ.) अतन्निग्रहेति॥ यो निग्रहो यन्निग्रहस्थानमुद्भाव्यते तस्याप्राप्तावपि तस्योद्भावनं निरनुयोज्यानुयोग इत्यर्थः। निग्रहशब्दोऽत्र निगृह्यते पराजीयतेऽनेनेति निग्रहस्थानपरः। गृष्टीति॥ 'एकवारप्रसूता गौर्गृष्टिरित्यभिधीयते' इत्युक्तेः सकृत्प्रसूता गौर्गृष्टिः। छलोत्तरवादिना वादिवाक्यस्य तदनभिप्रेतार्थान्तरं

परिकल्प्य यथा दूष्यते तथा छलवादिवाक्यस्यापि तदनभिप्रेतार्थान्तरं परिकल्प्य दूषयितुं शक्यत इति प्रागुक्तस्वन्यायविरोधरूपतृतीयजातावन्तर्भवति छलोत्तर-मित्याह- **छलवाक्यस्यापीति** ।। षष्ठीतत्पुरुषाश्रयेण गवानयनमशक्यमित्युक्त-छलवाक्येऽपि गवेति तृतीयान्तं नयनमिति चक्षुर्वाचकमित्यर्थमुपेत्यानन्वित-मेतत्पदकदम्बकमिति दूषणसम्भवादिति भावः ।।

(वेदे.) **अतन्निग्रहेति** ।। सर्वथा निग्रहस्थानाप्राप्तौ निग्रहस्थानान्तर-प्राप्तावप्युद्भाव्यमाननिग्रहस्थानाप्राप्तौ चेत्यर्थः । एकवारप्रसूता गौर्गृष्टिः । छल-मसङ्गतमिति मूलानुसारेणाह- **एतदसङ्गतमिति** ।। अन्यच्चेति मूलमनुसृत्याह- **छलवाक्यस्यापीति** ।।

।। जातिनिरूपणम् ।।

जातिः ।। सिद्धमपि दूषणासमर्थमुत्तरं जातिः । असामर्थ्यं च द्विविधम् । साधारणमसाधारणं च । तत्र साधारणं स्वव्याहतिः । असाधारणं तु युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वमविषयवृत्तित्वं चेति । सा च साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्य-प्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोप-पत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमभेदाच्चतुर्विंशतिधा । तत्र वादिना स्थापनाय हेतौ प्रयुक्तेऽनभ्युपेतयुक्ताङ्गेन प्रतिपक्षोद्भावनं प्रतिधर्मसमा जातिः । सा च प्रत्यक्षाभासादिभेदेन बहुविधा ।।

(राघ.) स्वोक्तेष्वन्तर्भावयितुं जातिसामान्यलक्षणतद्विभागादीनाह- **सिद्ध-मपीति** ।। छलव्यावृत्त्यर्थं सिद्धमपीति विशेषणम् । जातिवादिना हि महानस-साधर्म्याद् धूमवत्त्वाद् गिरिरग्निमांश्चेत् तर्हि ह्रदसाधर्म्याद् द्रव्यत्वादनग्निकोऽपि स्यात् । तथाच धूमवत्त्वहेतुरसाधकः । सत्प्रतिपक्षत्वादित्युक्तो हेतुः सिद्धः ।

छलवादिना गामानयेति वादिवाक्यं नाभिमतार्थसाधकम्। अशक्यार्थबोधकत्वादित्युक्तो हेतुर्वाद्यनभिमतार्थकल्पनालब्धत्वादसिद्धः। अतोऽनेन तद्व्यावृत्तिः। अन्यविशेषणं तु सदुत्तरव्युदासाय। **साधारणमिति**॥ यावन्तो जात्यवान्तरभेदास्तावत् सर्वानुगतमित्यर्थः। **असाधारणम्** एकैकमात्रनिष्ठमित्यर्थः। तद् विभज्याह- **असाधारणं त्विति**॥ सामर्थ्यमित्यनुषङ्गः। सदुत्तरे यद् योग्यमङ्गं व्याप्त्यादि तद्राहित्यम्, अयोग्याङ्गाधिक्यमनुचितविषयवृत्तित्वमिति त्रिविधमिति शेषः। **सा चेति**॥ जातिरित्यर्थः। नतु जातित्वम्। समशब्दस्य प्रत्येकं साधर्म्यसमवैधर्म्यसम इत्यादिरूपेणान्वयः। न्यायसूत्रे प्रतिधर्मसमेति पठितव्यम्। साधर्म्यवैधर्म्येति प्रतिधर्मसमावान्तरभेदनिर्देशेन पाठो जात्यन्तरेऽप्यवान्तरभेदोऽस्तीति ज्ञापनायेत्युक्त्वा तत्रैव प्रतिधर्मसमं लक्षयित्वा तद्विभागस्य तदभियुक्तैर्दर्शितत्वात्। तदनुरोधेन लक्षणविभागाद्याह- **तत्रेत्यादिना**॥ तेषु मध्य इत्यर्थः। सदुत्तरव्युदासायानभ्युपेतयुक्ताङ्गेनेत्युक्तिः। बाधोद्भावनरूपप्रकारसमजातिनिरासाय प्रतिपक्षोद्भावनमित्युक्तिः॥

(वेदे.) सिद्धमपीति॥ पक्षधर्मत्वोपेतमित्यर्थः। तेन छलव्यावृत्तिः। छलवादिविवक्षितहेतोरसिद्धत्वात्। तथाहि। आढ्योऽयं नवकम्बलवत्त्वादिति प्रयुक्ते कुतोऽस्य नवकम्बल इति वदतश्छलवादिनो नेदं साध्यसाधकमसिद्धत्वादिति हि विवक्षितम्। तत्रासिद्धत्वादिति हेतोर्व्याप्तौ सत्यामपि पक्षभूते वादिहेतावसिद्धिः। अविवक्षितस्यैव सङ्ख्याविशेषस्य हेतुवाक्यार्थत्वेन कल्पनात्। जातिवाद्यभिमतहेतौ च व्याप्त्यभावेऽपि पक्षधर्मत्वमस्ति। वादिना हेतौ प्रयुक्ते नेदं साध्यसाधकं युक्ताङ्गानप्रतिप्रमाणविरुद्धत्वादिजातिवादिहेतोर्वादिसाधननिष्ठत्वात्। अतो नासम्भव इत्यकल्पितदूषणमित्यर्थः। तेन छलनिरास इत्यन्ये। **असामर्थ्यमिति**॥ उत्तरस्येति शेषः। **साधारणं** सर्वजात्यनुगतम्। **असाधारणं** न सर्वजात्यनुगतम्। **युक्ताङ्गं** व्याप्त्यादि। **अयुक्ताङ्गं** व्यभिचारादि। **अविषय**-

वृत्तित्वमिति ।। अनुचितस्थलसञ्चाराभ्युपगम इत्यर्थः । एतच्चोत्तरत्रोदाहरण-प्रदर्शनावसर एव स्फुटं भविष्यति ।

जातिविभागमाह- **सा चेति** ।। द्वन्द्वान्ते निर्दिष्टः समशब्दः प्रत्येकमभि-सम्बध्यते । यद्यपि साधर्म्यवैधर्म्यसमौ प्रतिधर्मसमाववान्तररूपभेदौ । अतः प्रतिधर्मसमैव जातिरत्रोद्देशमर्हति । तथाऽपि सर्वजातीनामवान्तरभेदवत्त्वसूचनाय प्रतिधर्मसमोद्देश एवात्र तदवान्तरभेदरूपसाधर्म्यवैधर्म्यसमोद्देशमुखेन तात्पर्यतो विवक्षित इति द्रष्टव्यम् । अत एव प्रतिधर्मसममेव लक्षयति- **तत्रेत्यादिना** ।। तत्रोद्दिष्टास्वित्यर्थः । निराश्रयस्य प्रतिपक्षोद्भावनस्यासम्भवपरिहाराय वादिना स्थापनाहेतौ प्रयुक्त इत्युक्तम् । सदुत्तरप्रकरणसमव्यवच्छेदायानभ्युपेत-युक्ताङ्गेनेत्युक्तम् । तत्रावश्याभ्युपगन्तव्यानां तत्तत्प्रमाणाङ्गानां वास्तवसत्त्वा-भावेऽप्याभिमानिकं तदस्ति । अत्रतु आभिमानिकमपि तत्सत्त्वं नेति भावः । प्रत्यक्षादिनाऽपि प्रतिपक्षचोदनसङ्ग्रहाय सामान्यतः प्रमाणेनेत्युक्तम् । प्रमाणत्वेनाभिमतेनेत्यर्थः । अयुक्ताङ्गहीनस्य वास्तवप्रामाण्यासम्भवात् । प्रकरणसमजातिव्यवच्छेदाय प्रतिपक्षेत्युपात्तम् । तत्र बाधोद्भावनस्य वक्ष्य-माणत्वात् ।

ननु साधर्म्यवैधर्म्यसमयोः स्वतन्त्रजातितैव किं न स्यात् । किं पूर्वं मुखतोऽनु-दिष्टप्रतिधर्मसमावान्तरभेदरूपताङ्गीकारेणेत्यत आह-**सा चेति** ।। **प्रत्यक्षा-भासादिभेदेनेति** ।। प्रत्यक्षाभासादिना प्रतिपक्षोद्भावनभेदेनेत्यर्थः । इदमुक्तं भवति । यदि साधर्म्यवैधम्यसमयोः प्रतिधर्मसमावान्तरभेदरूपता न स्यात् तदाऽ-नङ्गीकृतयुक्ताङ्गेन प्रत्यक्षशब्दाभासादिना प्रतिपक्षचोदनस्य जात्यन्तरा-नन्तर्भावात् पृथग्जातित्वं स्यादतोऽस्य सङ्ग्रहाय प्रतिधर्मसमैव स्वतन्त्रजातिः साधर्म्यसमादिकं तु तदवान्तरभेद इत्येवोचितमिति ।।

साधर्म्यसमः ।। तत्र व्याप्तिहीनेनानुमानेन यत् प्रतिपक्षचोदनं

तद् द्विविधम् । साधर्म्येण वैधर्म्येण च । तत्र साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः प्रतिषेधः । यथा यदि महानससाधर्म्याद् धूमवत्त्वादग्निमान् पर्वत इष्यते तर्हि ह्रदसाधर्म्याद् द्रव्यत्वादनग्निरपि किं नेष्यत इति ॥

(राघ.) अनभ्युपेतयुक्ताङ्गेनेत्यस्य विवरणेनानुवादो व्याप्तिहीनेनेति ॥ जातेर्विशेष्यत्वेन साधर्म्यसमेति वाच्ये कथं पुल्लिङ्गप्रयोग इत्यत उक्तम्- प्रतिषेध इति ॥ जातिपर्यायः प्रतिषेधशब्दः । साधर्म्यसमरूपः परहेतुप्रतिषेध इत्यर्थः । इतीतिपदस्य, तथाच त्वदीयं धूमवत्त्वानुमानमसाधकं द्रव्यत्वेन सत्प्रतिपक्षत्वात्, इति शेषपूरणं कृत्वेति प्रतिषेध इति पूर्वेणान्वयो बोध्यः ॥

वैधर्म्यसमः ॥ वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः प्रतिषेधः । यथा यदि ह्रदवैधर्म्याद् धूमवत्त्वात् पर्वतोऽग्निमानिष्यते तर्हि महानसवैधर्म्यात् पर्वतत्वादनग्निः किं नेष्यत इति ।

अत्र व्याप्तिलक्षणयुक्ताङ्गराहित्यमेव प्रथममुद्भाव्यम् । नतु जातित्वम् । परचित्तवर्तिनो व्याप्त्यनभ्युपगमस्याद्यापि ज्ञातुमशक्यत्वात् । यदा तु परो ब्रूयात् साधर्म्यवैधर्म्यमात्रं प्रयोजकं किं व्याप्त्येति? तदा वक्तव्यम्- एवं सति नेदं साधकं सत्प्रतिपक्षितत्वादिति । त्वदनुमानस्यापि व्याप्तिहीनेन साधर्म्येण वैधर्म्येण वा प्रतिपक्षसम्भवात् व्याघात इति । तथाच प्रतिषेधे स्वन्यायविरोधात्मकतृतीयजातावन्तर्भावः इति ॥

(राघ.) जात्युत्तरस्य निरासप्रकारमाह- अत्रेति ॥ परोक्तनिषेध इत्यर्थः । नतु जातित्वमिति ॥ स्वव्याहतिरूपं साधारणमसामर्थ्यमित्यर्थः । कुत इत्यत

आह- **परचित्तेति** ।। **अद्यापीति** ।। एवं प्रत्यवस्थानवेलायामपीत्यर्थः । **तदा वक्तव्यमिति** ।। जातिवादिनं प्रति वक्तव्यमित्यर्थः । तदाह- **एवं सतीति** ।। व्याप्तेरप्रयोजकत्वे सतीत्यर्थः । **साधर्म्येण वैधर्म्येण वेति** ।। यदि सत्प्रतिपक्षान्तर-साधर्म्यात् सत्प्रतिपक्षत्वादिदमसाधकं तर्हि सद्धेतुसाधर्म्यात् पञ्चम्यन्त-पदोक्तत्वाद् धूमवत्त्वं साधकम् । असिद्धहेतुवैधर्म्यात् पक्षवृत्तित्वात् साधकं किं न स्यादित्यपि वक्तुं शक्यत्वाद् व्याघात इत्युत्तरं वक्तव्यमित्यर्थः । आदावेव व्याघातोक्तौ तु मया व्याप्तिरङ्गीक्रियत इति जातिवादिनोक्ते सति स्वव्याघातं वदन् छलेन जीयेत । अतो न प्रथमतो व्याघातो वक्तव्य इत्युक्तम् । एतज्जाते-रन्तर्भावमाह- **तथाचेति** ।। स्वव्याघाते सति नेदं साधकमित्युक्तप्रतिषेधे प्रतिषेधविषये तद्रीत्या तद्वचनस्य प्रतिषेधे कृते वा स्ववचनस्वक्रियास्वन्यायविरोध इति प्रागुक्ततृतीयजातावन्तर्भवतीयं जातिरित्यर्थः ।।

(वेदे.) प्रतिपक्षसम्भवादिति ।। यदि प्रसिद्धसत्प्रतिपक्षसाधर्म्यात् सत्प्रति-पक्षत्वादसाधकस्तर्हि साधकधूमादिसाधर्म्याद् धर्मवत्त्वात् साधकोऽपि किं न स्यादिति साधर्म्येण, यदि धूमादिवैधर्म्यात् सत्प्रतिपक्षत्वादसाधकता तर्हि प्रसिद्धसत्प्रतिपक्षवैधर्म्यात् तत्साधकताऽपि किं न स्यादिति वैधर्म्येण प्रत्यवस्थान-सम्भवादित्यर्थः । अन्तर्भावमाह- **तथाचेति** ।। स्थापनां गते स्वन्यायविरोधे द्वितीयाद्युत्तरकक्षाभाविपरोक्तजातेरन्तर्भावासम्भवादाह- **प्रतिषेध इति** ।। परनिराकरणोत्तररूप इत्यर्थः । अत एव दूषणासमर्थमुत्तरं जातिरित्युक्तम् । प्राप्तायामिति शेषः । अथवा प्रतिषेधे तृतीयजाताविति सामानाधिकरण्यम् । तथाच परप्रतिषेधरूपा स्वन्यायविरोधात्मिकाऽस्मदुक्ततृतीयजात्युत्तर इत्यर्थः । बहु-व्रीहिणोक्तार्थलाभात् । अत एव प्रमाणलक्षणटीकायां प्रतिषेधात्मकतृतीय-जातावित्युक्तम् ।।

उत्कर्षसमः ।। वादिसाधनसामर्थ्येन साध्यस्येव व्याप्तिं विना

कस्यचिदनिष्टधर्मस्य दृष्टान्तात् पक्ष उत्कर्ष उत्कर्षसमः । यदि धूमवत्त्वान् महानसवदग्निमान् पर्वतस्तर्हि तत एव तद्वदेव स्थाल्यादिमानपि स्यादिति ।

अत्रापि व्याप्तिवैकल्यात् तर्काभासोऽयमित्युत्तरं वक्तव्यम् । साहचर्यमात्रेण तर्कस्य प्रवृत्तेः किं व्याप्त्येति वदतः स्वन्यायविरोधेन व्याघात इति ॥

(राघ.) वादिसाधनसामर्थ्येनेत्येतत् साध्यस्येत्यत्रेव कस्यचिदनिष्टधर्मस्येत्यादावप्यन्वेति । उत्कर्षः सद्भावापादनं वाद्युक्तहेतुना पक्षे साध्यस्य दृष्टान्तादुत्कर्षो यथा तथा तेनैव हेतुना दृष्टान्तात् पक्षेऽनिष्टधर्मस्योत्कर्षः सत्त्वापादनमित्यर्थः । हेत्वन्तरेण कस्यचिद्धर्मस्य पक्षे सत्त्वापादनरूपविशेषसमव्यावृत्तये वादिसाधनसामर्थ्येनेत्युक्तम् । सदुत्तरव्युदासाय व्याप्तिं विनेति । **तत एव** धूमवत्त्वादेव । **तद्वदेव** महानसवदेवेत्यर्थः । **अत्रापीति** ॥ एतज्जात्युत्तरेऽपीत्यर्थः । **इत्युत्तरं** वक्तव्यमित्यन्वयः । **साहचर्येति** ॥ आपाद्यापादकयोरिति योज्यम् । **इति वदतो** जातिवादिनो व्याघात इत्युत्तरं वक्तव्यमित्यनुषङ्गः । कथमित्यत उक्तम्- **स्वन्यायविरोधेनेति** ॥ धूमवत्त्वानुमानमसाधकं मदुक्ततर्कविरुद्धत्वात् । तर्कविरुद्धनित्यत्वासाधककृतकत्वरूपानुमानान्तरवदिति जातिवादिनोक्ते प्रतिषेधानुमानेऽपि तर्कविरुद्धत्वरूपत्वदुक्तहेतुना नित्यत्वासाधककृतकत्ववदसाधकत्वमिव तर्कविरुद्धत्वहेतुनैव दृष्टान्तभूतकृतकत्ववदमूर्तवृत्तित्वमपि धूमवत्त्वे स्यादिति स्वोक्तन्यायेनैव व्याप्तिहीनतर्केण जातिवाद्यनिष्टापादनसम्भवादेवंरूपस्वन्यायविरोधेनेत्यर्थः । एतेनेयमपि जातिरस्मदुक्ततृतीयजात्यन्तर्गतेति सूचितम् । एवमग्रेऽपि ॥

(वेदे.) **वादिसाधनेति** ॥ अत्र विशेषणसमव्यवच्छेदाय वादिसाधन-

सामर्थ्येनेत्युक्तम् । तत्रच हेत्वन्तरेणोत्कर्षं वक्ष्यति । सदुत्तरव्यावृत्त्यै व्याप्तिं विनेति । शिष्टं स्वरूपकथनायैवेति द्रष्टव्यम् । अत्रेति ।। तथाच युक्ताङ्गहानि-रिति भावः । स्वन्यायेति ।। तथाच तृतीयजात्यन्तर्भाव इति भावः । एवमुत्तरत्रापि द्रष्टव्यम् ।।

अपकर्षसमः ।। पक्षादिष्टधर्मापकर्षणमपकर्षसम इत्येके । यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते तर्हि तत एव तद्वदेव शब्दः श्रावणोऽपि मा भूदिति ।

अत्र वक्तव्यम् । किमिदं साधनमुतापादनमिति । नाद्यः । अर्थान्त-रत्वेन निरनुयोज्यानुयोगत्वाभावात् । द्वितीये तु उत्कर्षसम एवा-यम् । नहि भावोत्कर्षोऽभावोत्कर्ष इत्येतावता भेदः सम्भवति ।

उदयनस्तु दृष्टान्ते साध्येन साधनेन वा सहचरितस्य कस्यचिद्धर्मस्य निवृत्त्या पक्षे तयोरन्यतराभावसाधनमपकर्षसम इत्याह । यथा महानसेऽग्निमत्त्वेन धूमवत्त्वेन वा सहदृष्टस्य स्थाल्यादिमत्त्वस्य पर्वतेऽभावात् तयोरप्यभावः । तत्र साध्याभावसाधने सत्प्रतिपक्षत्वं बाधो वाऽऽरोप्यः । साधनाभावसाधने त्वसिद्धिरिति ।

इदमप्यसत् । साध्याभावसाधने साधर्म्यसमप्रकरणसमाभ्यां भेदाभावप्रसङ्गात् । तस्माद् व्याप्त्यनपेक्षया पक्षे साधनाभाव-साधनमेवापकर्षसमः । तत्र व्याप्त्यभावः, साधनग्राहकप्रमाण-विरोधश्चेत्युत्तरं वाच्यम् । साहचर्यमेव प्रयोजकं किं व्याप्त्यादिनेति ब्रुवाणं प्रति स्वन्यायविरोध इति ।।

(राघ.) पक्षादिष्टधर्मेति ।। वादिसाधनसामर्थ्येनेति योज्यम् । तत एव तद्वदेव

इत्यग्रेऽभिधानात्। नेदं लक्षणं युक्तमित्याह- **अत्र वक्तव्यमिति**॥ एतल्लक्षणक-जातिविषये साधनमापादनं वेदमिति वक्तव्यम्। **अर्थान्तरत्वे(नेति)ऽपीति**। प्रकृतानुपयुक्तान्वितोक्तिरूपत्वात् जातीनां च निरनुयोज्यानुयोगरूपनिग्रह-स्थानप्रभेदत्वादित्यर्थः। **उदयनस्त्विति**॥ आहेत्यन्वयः। व्यापकधर्मनिवृत्त्या व्याप्याभावसाधनस्य सदुत्तरत्वेन तद्व्यावृत्तये सहचरितस्येत्येवोक्तम्- **आरोप्य इति**॥ जातिवादिनेति योज्यम्। **असिद्धिरिति**॥ आरोप्येत्यनुषङ्गः। **साधर्म्यसमप्रकरणसमाभ्यामिति**॥ सत्प्रतिपक्षत्वारोपे साधर्म्यसमः। बाधारोपे प्रकरणसम इति विवेकः। **व्याप्त्यनपेक्षयेति**॥ दृष्टान्ते साधनेन सहचारमात्रवतः कस्यचिद्धर्मस्य निवृत्त्या पक्षे साधनाभावसाधनमित्यर्थः। एवकारेण साध्याभाव-साधनं व्यावर्तयति। उदाहरणमत्र- महानसे धूमवत्त्वेन सहचरितस्य स्थाल्यादे-रभावेन पर्वते धूमवत्त्वाभावः। असिद्धिरारोप्येति स्पष्टमिति नोक्तम्। **तत्रेति**॥ उक्तजात्युत्तर इत्यर्थः। **किं व्याप्त्यादिनेति**॥ किं प्रमाणविरोधेन चेत्यादि-पदार्थः। तृतीयजातावन्तर्भावं सूचयंस्तदनन्तरमुत्तरप्रकारमाह- **इति ब्रुवाणं प्रति स्वन्यायेत्यादि**॥ नेदं धूमवत्त्वं साध्यसाधकम्, असिद्धत्वाच्छब्दानित्य-त्वासाधकचाक्षुषत्ववदिति जातिवादिनोक्ते सति स्थापनावादिना दृष्टान्तीकृते चाक्षुषत्वेऽसिद्धत्वेन सहदृष्टस्य जातिवृत्तित्वस्य त्वया पक्षीकृते धूमवत्त्वेऽ-भावेनासिद्धत्वस्याप्यभाव इति त्वदुक्तो हेतुरसिद्ध इति स्वन्यायेन जातिवादि-नोक्तन्यायेन तस्य विरोध इत्युत्तरं वाच्यमित्यर्थः॥

(वेदे.) **निरनुयोज्यानुयोगत्वाभावादिति**॥ जातेश्च निरनुयोज्यानुयोग-प्रभेदरूपत्वादिति भावः। **भेदाभावप्रसङ्गादिति**॥ यदि सत्प्रतिपक्षत्वमारोप्यं तदा साधर्म्यसमाभेदप्रसङ्गः। यदातु बाध आरोप्यस्तदा प्रकरणसमाभेदप्रसङ्ग इति विवेकः। तर्ह्यपकर्षसमजातिरेव किं नास्तीत्यतस्तस्य लक्षणमाह- **तस्मा-दिति**॥ सदुत्तरव्यावृत्त्यै **व्याप्त्यनपेक्षयेति**। अत्रापि युक्ताङ्गहानिमाह- **व्याप्त्य-**

भाव इति ॥ साधनग्राहकेति ॥ तथाच तदभावसाधनेऽविषयवृत्तित्वं चेति भावः ॥

वर्ण्यसमः ॥ पक्षवद् दृष्टान्तस्यापि साध्यत्वचोदनं वर्ण्यसम इत्येके । तदसत् । दृष्टान्ते साध्यसाधनविप्रतिपत्त्या चोदने सदुत्तरत्वात् । एवमेव चोदनस्य निर्बीजतयाऽसम्भवदुक्तिकत्वात् । एवं तेनैव हेतुना साध्यत्वचोदनमपि निर्बीजम् । पक्षे हेतुः साध्येन सहचरित उपलब्धो दृष्टान्तस्यापि तदापादयतीत्येवं चोदनायामुत्कर्षसम एव । पक्षे दृष्टान्ते चोत्कर्षणमित्येतावता भेदेऽतिप्रसङ्गः । साध्यसमाच्च भेदाभावः ।

तस्मात् पक्षमात्रविवक्षितासिद्धार्थत्वादिरूपवद्धेतुमत्त्वतदभावयोर्दृष्टान्तस्य साध्यत्वापादनं वर्ण्यसम इत्युदयनः । यथाऽसिद्धार्थं धूमवत्त्वं पर्वत इव महानसेऽस्ति चेत्सोऽपि साध्यवत्तया साध्यः स्यात् । न चेत् साधनवत्तया साध्यः स्यादिति ।

अत्रापि हेतुस्वरूपस्य सद्भावमात्रेण दृष्टान्तत्वोपपत्तौ रूपविशेषचिन्ता व्यर्थेति वाच्यम् । तदावश्यकत्वाभ्युपगमे तु स्वन्यायविरोध इति ॥

(राघ.) साध्यत्वचोदनं साध्यसाधनवत्त्वेन साध्यत्वापादनम् । साध्यवत्त्वेन साध्यत्वापादनं वेत्यर्थः । विवादे सति साध्यत्वापादनं वा तदभावे वा । आद्य आह- दृष्टान्त इति ॥ अन्त्य आह- एवमेवेति ॥ विवादाभावेऽपीत्यर्थः । परोक्तधूमवत्त्वादिहेतुरेव बीजमित्यत आह- एवं तेनैवेति ॥ सबीजतामाशङ्कते- पक्षे हेतुरिति ॥ तदापादयतीति ॥ साध्यत्वमापादयतीत्यपि चोदनायामित्यर्थः ।

अतिप्रसङ्ग इति॥ दृष्टान्तहेतुपक्षाणां साध्यत्वापादनरूपाया वक्ष्यमाणसाध्यसमजातेरपि दृष्टान्तादिभेदेन भेदप्रसङ्ग इत्यर्थः। **साध्यसमाचेति** चशब्दो भेदाभावश्चेति भिन्नक्रमे। तत्रापि दृष्टान्तादेः साध्यत्वापादनस्य वक्ष्यमाणत्वादिति भावः। **पक्षमात्र इति**॥ आदिपदेनासिद्धार्थकत्वम्, आरब्धकार्यज्ञापनशक्तिमत्त्वं, व्याप्तिग्राहकप्रमाणशून्यत्वम्, सन्दिग्धविषयकत्वमित्यादिरूपवत्त्वं विवक्षितम्। तादृशरूपयुक्तहेतोर्दृष्टान्ते सत्त्वासत्त्वाभ्यां दृष्टान्तस्य साध्यत्वेन साधनवत्त्वेन वा साध्यत्वापादनमित्यर्थः। **सोऽपि साध्यवत्तयेति**॥ असिद्धार्थकत्वं नामानिश्चितसाध्यधर्मकत्वं तादृशरूपविशिष्टहेतोर्दृष्टान्ते सत्त्वेन कथं न साध्यवत्तया साध्येत। अन्यथा दृष्टान्तानुपपत्तेरिति भावः। **न चेदिति**॥ तादृशधूमवत्त्वमित्यनुषङ्गः। अन्यथा साधनविकलः स्यादिति भावः। **अत्र जातौ**। दृष्टान्ते साध्यवैकल्यं साधनवैकल्यं वाऽऽरोप्यमिति भावः। प्रत्युत्तरप्रकारमाह- **अत्रेति**॥ एतज्जात्युत्तरविषय इति वाच्यमित्यन्वयः। **स्वन्यायविरोध इति**॥ जातिवादिना हि साध्यवैकल्यारोपपक्षे धूमवत्त्वं न साध्यसाधकं, साध्यरहितवृत्तित्वात्। शब्दानित्यत्वासाधकप्रमेयत्ववदिति प्रतिषेधे कृते सति साध्यरहितवृत्तित्वहेतुरपि त्वदभिमतपक्षमात्रविवक्षितासिद्धार्थत्वादिरूपविशिष्टे दृष्टान्तेऽस्ति चेत् सोऽपि साध्यवत्तया साध्येत। अन्यथा साध्यविकलो दृष्टान्तः स्यात्। न चेत् साधनवत्तया साध्येत। अन्यथा साधनहीनो दृष्टान्तः स्यादिति वक्तुं शक्यत्वात् स्वन्यायविरोध इत्यर्थः। स्वव्याघात इति वक्तव्येऽप्येवमुक्तिरन्तर्भावसूचनाय। एवं सर्वत्र विज्ञेयम्॥

(वेदे.) **साध्यत्वचोदनमिति**॥ साध्यसाधनवत्तया साध्यत्वापादनमित्यर्थः। अस्मिन्नेव लक्षणे तेनैव हेतुनेति विवक्षितमिति केनचिदुक्तम्। तन्मतं दूषयति- **एवं तेनैवेति**॥ सहचारलक्षणं बीजशङ्कयाऽऽह- **पक्ष इति**॥ **उत्कर्षसम एवेति**॥ पक्षदृष्टान्तयोरन्यतरस्मादन्यतरस्मिन्नुत्कर्ष एवोत्कर्षसमलक्षणत्वेन

विवक्षितो न त्वदुक्त इति भावः । अत एवाह- **पक्ष इति ॥ साध्यसमाचेति ॥** एतन्मते साध्यवद्दृष्टान्तस्यापि साध्यत्वचोदनं साध्यसम इति तल्लक्षणस्याभि- प्रेतत्वात् तदभेदप्रसङ्ग इति भावः । **पक्षमात्रेति ॥** साध्यस्य प्रमाणान्तरेण निश्चितत्वेनासिद्धार्थत्वमेकं पक्षीयहेतो रूपं, हेतुर्हि पक्षे साध्यज्ञापनाय प्रवृत्तिशक्तिर्भवतीत्यारब्धसाध्यज्ञापनशक्तित्वाख्यं द्वितीयम् । पक्षीयसाध्यस्य पूर्वमज्ञातत्वेन तन्निरूपितव्याप्तेः पक्षीयहेतुवृत्तितया ज्ञातुमशक्यत्वाद् व्याप्ति- ग्राहकप्रमाणशून्यत्वाभिमतं तृतीयम् । सन्दिग्धे न्यायप्रवृत्तेः पक्षीयहेतोः संशय- समानविषयत्वारब्धं चतुर्थं, पक्षीयहेतुस्वरूपविशेषरूपं पञ्चममित्येतानि पक्ष- मात्रविवक्षितरूपाणि । एवञ्च पक्षमात्रे हेतोर्विवक्षितानि यान्यसिद्धार्थत्वादीनि रूपाणि तद्वान् यो हेतुस्तद्वत्त्वतदभावाभ्यां दृष्टान्तस्य साध्यसाधनवत्तया साध्यत्वापादनं वर्ण्यसम इत्यर्थः । उपलक्षणत्वेनैकं रूपं पुरस्कृत्योदाहरति- **यथेति ॥** एवमग्रेऽपि ॥

अवर्ण्यसमः ॥ दृष्टान्तवत् पक्षस्याप्यसाध्यत्वचोदनमवर्ण्यसम इत्येके । अत्रापि सिद्धत्वाभिमानेन चोदने सदुत्तरम् । अन्यथा निर्बीजत्वम् । साधनसाहचर्यबलेनापादने तूत्कर्षसम एव ।

तस्माद् दृष्टान्तमात्रविवक्षितसिद्धार्थत्वादिरूपवद्धेतुमत्त्व- तदभावयोः पक्षस्यासाध्यत्वचोदनमवर्ण्यसम इत्युदयनः । यथा सिद्धार्थं धूमवत्त्वं महानस इव पर्वते चेत् साध्यस्य सिद्धत्वाद- साध्यत्वम् । न चेदुपायाभावादसाध्यत्वमिति । अस्यापि पूर्व- वदन्तर्भावो वाच्य इति ॥

(राघ.) **अन्यथेति ॥** सिद्धत्वाभिमानाभावेऽपि तदापादन इत्यर्थः । **साध- नेति ॥** दृष्टान्ते साधनस्य निश्चितसाध्यसाहचर्यमुपलब्धमिति तद्बलेन पक्षस्या-

साध्यतापादन इत्यर्थः । **उत्कर्षसम एवेति** ॥ वादिसाधनबलेन दृष्टान्तात् कस्यचिदनिष्टधर्मस्य पक्ष उत्कर्षणरूपत्वादुत्कर्षसम एवायमित्यर्थः । **सिद्धार्थत्वादीति** ॥ निश्चितार्थकत्वम्, आरब्धसाध्यज्ञापनशक्तिहीनत्वं, व्याप्तिग्राहकमानवत्त्वमित्यादिरूपवद्धेतुमत्त्वतदभावयोर्निमित्तयोरित्यर्थः । **अस्यापीति** ॥ दृष्टान्ते प्रमितस्य हेतोः पक्षधर्मतामात्रेण साध्यसाधनसम्भवात् किं दृष्टान्तमात्रविवक्षितरूपचिन्तयेत्युत्तरं वाच्यम् । तदावश्यकत्वोक्तौ तु धूमवत्त्वमसाधकं सिद्धविषयकत्वादसिद्धत्वाद्वा वह्निरनुष्णो जलत्वादितिवदिति जातिवादिनोक्ते प्रतिषेधानुमानेऽपि दृष्टान्ते विवक्षितसिद्धार्थकत्वादिरूपवद्धेतुः पक्षेऽस्ति चेदसाधकत्वेन धूमवत्त्वमसाध्यं स्यात् । न चेदुपायाभावादसाध्यं स्यादिति स्वोक्तन्यायेन स्वस्य विरोध इति स्वन्यायविरोधेऽन्तर्भावो वाच्य इत्यर्थः ॥

(वेदे.) अत्रापि युक्ताङ्गाधिकत्वमाह- **अत्रापीति** ॥ **दृष्टान्तमात्रेति** ॥ पूर्ववैपरीत्येन सिद्धार्थत्वम्, प्रवृत्तसाध्यज्ञापनाय शक्तत्वाभावः, व्याप्तिग्राहकप्रमाणवत्त्वं, निश्चयसमानविषयत्वं, रूपविशेषश्चेत्येतानि हेतोर्दृष्टान्तमात्रविवक्षितानि रूपाणि द्रष्टव्यानि । **अस्यापीति** ॥ अयुक्ताङ्गाधिकत्वकथनपुरःसरमुद्भाव्योऽन्तर्भावश्च वाच्य इत्यर्थः ॥

विकल्पसमः ॥ धर्माणां धर्मान्तरव्यभिचारदर्शनेन साधनस्यापि साध्यव्यभिचारचोदनं विकल्पसमः । यथा कृतकत्वाविशेषेऽपि किञ्चिन्मूर्तं दृष्टं घटादि, किञ्चिदमूर्तं रूपादि । तथा कृतकमपि किञ्चिन्नित्यं किञ्चिदनित्यं किं न स्यादिति ।

अत्र शङ्कामात्रं चेत् सदुत्तरमेव । उपाध्यभावादिना समाधेयं धर्मान्तरव्यभिचारेणास्यापि व्यभिचारसाधनं चेद् धर्मान्तरव्यभिचारो हेतुर्वा स्याद् दृष्टान्तो वा । आद्ये व्याप्त्यभावो वक्तव्यः । द्वितीये

हेत्वभावान्न्यूनम् । हेतोरनङ्गत्वादिहेत्वङ्गीकारे प्रतिदृष्टान्तसम-साङ्कर्यम् । धर्मत्वादिहेत्वङ्गीकारे व्याप्त्यभाव एव । तदनङ्गीकारे तु स्वन्यायविरोध इति ॥

(राघ.) **धर्माणामिति** ॥ धर्मस्यैकस्य केनापि धर्मेण व्यभिचारतो हेतोः स्वव्यभिचारोक्तिः विकल्पसमजातितेत्युक्तदिशा धर्मस्येति वाच्ये बहुवचनो-क्तेरयमर्थः । हेतुभूतधर्मस्य धर्मान्तरेण, धर्मान्तरस्य साध्यधर्मेण, धर्मान्तरस्य धर्मान्तरेण वा व्यभिचारदर्शनेनेति ध्येयम् । एतच्च सदुत्तरव्यावृत्त्यर्थमुक्तम् । तत्राद्यमात्रस्योदाहरणमाह- **यथा कृतकत्वेनि** ॥ यथा कृतकत्वं मूर्तत्वा-मूर्तत्वधर्माभ्यां रूपादौ घटादौ व्यभिचरिततया दृश्यते । तथा नित्यत्वानित्यत्वे च धर्मौ स्थलभेदेन व्यभिचरेत् । एवञ्च शब्दोऽनित्यः कृतकत्वादित्यत्र शब्देऽ-नित्यत्वमपि किं न व्यभिचरेदित्यर्थः । उपाध्यभावादिनेत्यादिपदेनानुकूलतर्क-ग्रहः । **हेतुर्वा स्यादिति** ॥ कृतकत्वस्य मूर्तत्वादिधर्मान्तरव्यभिचाराद्धेतो-रनित्यत्वव्यभिचारोऽपि स्यादिति साधनं वा तद्व्यभिचारवदनित्यत्वव्यभि-चारोऽपीति दृष्टान्तेन साधनं वेत्यर्थः । **प्रतिदृष्टान्तेति** ॥ प्रतिदृष्टान्तमात्रेण प्रत्यवस्थानरूपत्वेन तल्लक्षणस्य वक्ष्यमाणत्वादिति भावः । **धर्मत्वादीति** ॥ कृतकत्वमनित्यत्वव्यभिचारि धर्मत्वात्, वस्तुत्वाद्वा, अनित्यत्वव्यभिचार्य-मूर्तत्ववदिति हेत्वङ्गीकारे व्याप्तिरूपयुक्ताङ्गहीनत्वं वाच्यमित्यर्थः । **तदनङ्गीकारे** - व्याप्त्यनङ्गीकारे त्वित्यर्थः । कृतकत्वं न साध्यसाधकं, व्यभिचारित्वात् । वह्न्यसाधकप्रमेयत्वहेतुवदिति जातिवाद्युक्तप्रतिषेधानुमानेऽपि प्रमेयत्वस्य घटत्वादिधर्मव्यभिचारात् । त्वदुक्तव्यभिचारित्वादित्युक्तहेतुरप्यसाधनरूप-साध्यव्यभिचारी स्यादिति स्वन्यायेनैव स्वस्य विरोध इत्यर्थः ॥

(वेदे.) **धर्माणामिति** ॥ अत्र व्यभिचारदर्शनेनेत्यस्यायमर्थः । साधनस्य

धर्मान्तरेण, धर्मान्तरस्य साध्यधर्मेण, धर्मान्तरस्य धर्मान्तरेण वा व्यभिचारदर्शनेनेति। अत्रोपाधिव्यभिचारदर्शनेन साधनस्य साध्यव्यभिचाररूपस्वन्यायविरोधचोदनेन सदुत्तरेऽतिव्याप्तिपरिहाराय व्यभिचारदर्शनेनेत्यन्तम्। तथाचानुपाधिरूपयत्किञ्चिद्धर्मव्यभिचारदर्शनहेतुकं हेतोः साध्यव्यभिचारचोदनं विकल्पसमजातिरित्युक्तं भवति। उक्तलक्षणत्वेन साधनस्य धर्मान्तरेण व्यभिचारदर्शनेन साध्यव्यभिचारचोदनमुदाहरति- **यथेति**॥ **धर्मान्तरव्यभिचारेणेति**। उक्तव्यभिचारत्रयेणेत्यर्थः। **प्रतिदृष्टान्तेति**॥ तत्रापि प्रतिदृष्टान्तेनैव प्रत्यवस्थानादिति भावः॥

साध्यसमः॥ साध्यवद् दृष्टान्तस्यापि साध्यत्वचोदनं साध्यसम इत्येके। तदसत्। विप्रतिपत्त्या चोदने सदुत्तरत्वात्। एवमेव चोदनेऽसम्भवदुक्तिकत्वात्। तेनैव हेतुना साध्यत्वापादनेऽप्येवमेव। वर्ण्यसमवद् बीजोपपादने तु तदभेदः। तस्मात् क्रोडीकृतधर्म्यादिविषयस्य लिङ्गस्य धर्म्यादावप्रयोजकत्वे, साध्येऽपि तथात्वप्रसङ्गात् तेनैव हेतुना धर्म्यादेरपि साध्यत्वापादनं साध्यसम इत्युदयनः। व्याप्तिपक्षधर्मवत्तयैव प्रयोजकत्वोपपत्तेः तत्सिद्धतामात्रेण साधनाङ्गत्वसम्भवात् तेनैव हेतुना साधनमित्युत्तरं वाच्यम्। तदनङ्गीकारे तु स्वन्यायविरोध इति॥

(राघ.) **एवमेवेति**॥ विवादाभावेऽपि चोदन इत्यर्थः। **एवमेवेति**॥ असम्भवदुक्तिकत्वमेवेत्यर्थः। बीजाभावादिति भावः। **वर्ण्यसमवदिति**॥ धूमवत्त्वं पक्षे साध्यत्वेन सहचरितं दृष्टमिति दृष्टान्तस्य साध्यत्वमापादयतीत्येवं बीजोपपादनमित्यर्थः। **क्रोडीकृतेति**॥ 'क्रोडः सूकरवृन्दयोः' इत्युक्तेरनुमानप्रयोगे समूहीकृतपक्षे हेतुदृष्टान्तविषयकस्य हेतोः पर्वतादि(सा) धर्म्यादि-

सिद्धावप्रयोजकत्वे साध्यविषयेऽपि तत्प्रसङ्गभिया तेनैव लिङ्गेन तेषामपि साध्यत्वापादनमित्यर्थः। अन्यथाऽऽश्रयासिद्ध्यादिप्रसङ्गादिति भावः। **सिद्धतामात्रेणेति ॥** मानान्तर(प्रमितत्व)सिद्धमात्रेणेत्यर्थः । **तदनङ्गीकार इति ॥** मानान्तरसिद्धतामात्रेण धर्म्यादिः साधनाङ्गताऽनङ्गीकारे। वादिनोक्तं धूमवत्त्वादिकं न साध्यसाधकं, आश्रयासिद्ध्यादिदुष्टत्वात् सम्मतवदिति जातिवादिनोक्ते प्रतिषेधेऽप्येवं वक्तुं शक्यत्वात् स्वन्यायविरोध इत्यर्थः ॥

(वेदे.) साध्यवत्पक्षवत् साध्यत्वचोदनमित्येतदुक्तार्थः। **असम्भवदुक्तिकत्वादिति ॥** बीजाभावादिति भावः। ननु नात्र बीजाभावः। पक्षमात्रविवक्षितरूपवद्धेतुमत्त्वादिना दृष्टान्तस्याप्यसाध्यत्वचोदनस्यात्रविवक्षितत्वात्। अन्यथा साधनवैकल्याद्यापत्तेरिति बीजोपपादनादित्यत आह- **वर्ण्यसमवदिति ॥** **क्रोडीकृतेति ॥** तस्मात् पर्वतोऽग्निमानिति विशेषणविशेष्यभावापन्नधर्मिलिङ्गलिङ्गिविषयकानुमितिरूपजननस्वभावस्येत्यर्थः। **धर्म्यादाविति ॥** अत्रादिपदेन लिङ्गादिकं गृह्यते । प्रमाणान्तरे सिद्धस्यापीत्यर्थः। वर्ण्यसमव्यावृत्तये तेनैव हेतुनेति। अत्र तेनैव हेतुना धर्म्यादेरपि साध्यत्वापादनमेव लक्षणम्। शिष्टमेतज्जात्युत्थानप्रकारप्रदर्शनाय। इत्थमिह जातिवादिनोऽभिमानः। लिङ्गधर्मिणौ सिद्धावनुमानाङ्गे भवतः। तत्सिद्धिश्च न प्रमाणान्तरादुद्भूता। लिङ्गस्य तत्राप्रयोजकत्वे साध्येऽप्यप्रयोजकत्वापत्तेः। क्रोडीकृतधर्मिलिङ्गलिङ्गिविषयानुमितिजनकत्वाल्लिङ्गस्य। नहि लिङ्गधर्मिणावपोह्य साध्यमात्रप्रतीतिर्लिङ्गाज्जायते। अतस्तेनैव हेतुना धर्म्यादेरपि साधनमावश्यकमिति। **व्याप्तीति ॥** न तु धर्म्यादिसाधकत्वेनापीत्यर्थः। अनेन युक्ताङ्गाधिकत्वमुक्तम् ॥

प्राप्तिसमः ॥ अप्राप्तिसमः ॥ साधनस्य साध्यप्राप्तिपक्षनिरासेन तस्य साधनत्वभङ्गः प्राप्तिसमः । अप्राप्तिपक्षनिरासेन तद्भङ्गोऽ-

प्राप्तिसमः । कृतिज्ञप्तिसाधारणमिदं जातिद्वयम् । यथा धूमज्ञानमग्निज्ञानं प्राप्य जनयति चेत् सतैव प्राप्तिरिति तस्य प्राक् सिद्धत्वान्नोत्पादकम् । तथा धदूमज्ञानमग्निं प्राप्य ज्ञापयति चेत् तर्ह्यन्यस्याः प्राप्तेरसम्भवाद् विषयविषयिभावे वक्तव्ये धूमज्ञान एवाग्नेः स्फुरणान्न तज्ज्ञापकत्वमिति प्राप्तिसमः । अप्राप्योत्पादकत्वं ज्ञापकत्वं चेत् तन्न । क्वाप्यदर्शनात् । नह्यप्राप्याग्निः काष्ठं दहति । नापि प्रकाश्यमप्राप्य प्रदीपः प्रकाशयति । अतिप्रसङ्गश्चान्यथेत्यप्राप्तिसमः ।

अत्र कृतौ सामर्थ्यलक्षणप्राप्तिसद्भावेनातिप्रसङ्गाभावात् स्वरूपप्राप्तिरनपेक्षितैव । ज्ञप्तावपि तद्व्याप्तलिङ्गविषयत्वरूपप्राप्तिसद्भावेनातिप्रसङ्गाभावाद् विषयविषयिभावोऽनपेक्षित एवेत्युत्तरं वाच्यम् । एतदनङ्गीकृत्य स्वरूपप्राप्त्यादिकमपेक्षमाणस्य स्वन्यायेन व्याघात इति ॥

(राघ.) नवमदशमजाती क्रमेण युगपल्लक्षयति- **साधनस्येति** ॥ **कृतिज्ञप्तीति** ॥ उत्पत्तिज्ञप्तीत्यर्थः । **सत्तैवेति** ॥ विद्यमानेनैवेत्यर्थः । अतः प्राप्तिर्नोपियेति प्राप्तिरूपविशेषणाभावाद् विशेषणासिद्धिरारोप्येति भावः । अप्राप्तिसमं व्यनक्ति- **अप्राप्येति** ॥ जातिद्वयेऽप्युत्तरोक्तिप्रकारमाह- **अत्रेति** ॥ जातिद्वये इत्युत्तरं वाच्यमित्यन्वयः । **सामर्थ्येति** ॥ जनकत्वशक्तिरूपप्राप्तीत्यर्थः । **एतदनङ्गीकृत्येति** । उक्तरूपप्राप्तिद्वयमनङ्गीकृत्येत्यर्थः । स्वरूपप्राप्त्यादीत्यादिपदेन विषयविषयिभावग्रहः । **स्वन्यायेनेति** ॥ धूमवत्त्वं न साध्यानुमितिजननक्षमं प्रागुक्तदिशा विशेषणासिद्धत्वादप्राप्यसाधनेऽतिप्रसङ्गत्वात् सम्मतवदिति जातिवाद्युक्तप्रतिषेधेऽप्येवं सुवचत्वात् स्वन्यायेन व्याघात इत्यर्थः ।

(वेदे.) **प्राप्तीति** ॥ सम्बन्धस्येत्यर्थः । **अन्यस्या इति** । ज्ञानेनार्थस्य

संयोगादिरूपायाः प्राप्तेरसम्भवादित्यर्थः। **सामर्थ्येति**॥ शक्तिरूपेत्यर्थः। **अनपेक्षितैवेति** ॥ अनेनाप्ययुक्ताङ्गाधिकत्वमुक्तं द्रष्टव्यम्। एवमुत्तरत्रापि मूलक्षयादिति भावः। तथाच युक्ताङ्गहानिरिति भावः॥

प्रसङ्गसमः ॥ अनवस्थाभासप्रसञ्जनं प्रसङ्गसमः। यथा पर्वतस्योत्पादकं वाच्यम्। तस्यापीत्यनवस्था। एवं पर्वतस्य ज्ञापकं वाच्यं तस्यापीत्यनवस्थेति।

अत्र सिद्धविषयत्वेनावस्थासम्भवेन मूलक्षयाभावाददोषत्वमिति वाच्यम्। तदनङ्गीकारे तु स्वन्यायविरोध इति॥

(राघ.) इयमपि जातिः कृतिज्ञप्तिसाधारणीत्युपपादयति- **यथेत्यादिना**॥ एतज्जातिविषय इति वाच्यमित्यन्वयः। **सिद्धविषयत्वेन** प्रमितविषयत्वेनावस्थितिसम्भवादित्यर्थः। **स्वन्यायेनेति**॥ धूमवत्त्वमसाधकम्। अनवस्थारूपतर्कपराहतत्वात् सम्मतवदिति जातिवादिनोक्ते प्रतिषेधेऽपि धूमवत्त्वस्योत्पादकज्ञापकपरम्परयाऽनवस्थायाः सुवचत्वादिति भावः।

प्रतिदृष्टान्तसमः ॥ प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसम इत्येके। तदसत्। साधर्म्यसमादावपि तद्भावात्। यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते वदति- यदि घटदृष्टान्तेनैन्द्रियकत्वादनित्यस्तर्हि सामान्यदृष्टान्तेन नित्यः किं न स्यादिति। व्यभिचारचोदनाभिप्रायेण प्रवृत्तेर्न साधर्म्यसमादिसाङ्कर्यमिति चेन्न। अस्य सदुत्तरत्वात्।

तस्माद् हेतुनिरपेक्षेण प्रतिदृष्टान्तमात्रेण बाधप्रतिरोधयोरन्यतरोद्भावनं प्रतिदृष्टान्तसम इत्युदयनः। यथा यदि महानसदृष्टान्तेनाग्निमानिष्यते तर्हि ह्रददृष्टान्तेनानग्निकोऽस्त्वित्यादि।

अत्र न्यूनत्वं वाच्यम् । हेतोरनङ्गत्वाभिमाने तु स्वन्यायविरोध इति ॥

(राघ.) **प्रतिदृष्टान्तेनेति** ॥ वाद्युक्तसाध्यरहितदृष्टान्तेन प्रत्यवस्थानं वादिसाधनदूषणाभिधानमित्यर्थः । साधर्म्यसमादावित्यादिपदेन वैधर्म्यसम-ग्रहः । उदाहरणमुखेन साधर्म्यसमान्तर्गतिं व्यनक्ति- **यथा शब्द इत्यादिना** ॥ **वदतीति** ॥ जातिवादीति शेषः । शङ्कते- **व्यभिचारेति** ॥ साधर्म्यसमादौ तु प्रतिपक्षाभिप्रायेण प्रवृत्तेर्न तेन साङ्कर्यमिति भावः । मात्रपदव्यावर्त्यं **हेतुनिरपेक्षे-णेति** ॥ अनग्निकोऽस्त्वित्यादीत्यादिपदेनानग्निक एवेति बाधचोदनग्रहः । उत्तरो-क्तिप्रकारमाह- **अत्रेति** ॥ युक्ताङ्गहीनत्वरूपं न्यूनत्वमित्यर्थः । **स्वन्यायेति** ॥ त्वदुक्तं धूमवत्त्वमसाधकं सत्प्रतिपक्षत्वाद् बाधितत्वात् सम्मतवदिति जाति-वाद्युक्तप्रतिषेधानुमानेऽपि यदि वह्न्यौष्ण्यानुमानरूपबाधितसत्प्रतिपक्षदृष्टान्ते-नासाधकं धूमवत्त्वं तर्हि सद्धेतुदृष्टान्तेन साधकं वाऽसाधकमेव वाऽस्त्वित्यपि सुवचत्वात् स्वन्यायविरोध इत्यर्थः ॥

(वेदे.) **प्रतिदृष्टान्तेनेति** ॥ हेत्वपेक्षेणेति शेषः । तेन वक्ष्यमाणसाधर्म्य-समातिव्याप्तिर्विघटित इति ध्येयम् । नन्वत्र प्रतिरोधचोदनाभिप्रायो भवत्साधर्म्यसमं साङ्कर्यम् । नचैवं किन्तु व्यभिचारचोदनैवाभिप्रेताऽतो न तत्साङ्कर्यमित्याशङ्कते- **अत्रेति** ॥ **न्यूनत्वमिति** ॥ ततश्चयुक्ताङ्गहानिरिति भावः ॥

अनुत्पत्तिसमः ॥ पक्षादीनां प्रागुत्पत्तेर्हेतुवृत्त्यभावेन असिद्ध्यु-द्भावनमनुत्पत्तिसमः । यथा पर्वतस्योत्पत्तेः प्राक् तत्र धूमवत्त्वं न वृत्तमिति भागासिद्धमित्यादि ।

अत्रानुत्पन्नस्य पर्वतत्वाभावेनापक्षत्वात् तत्र वृत्त्यभावो न दोषायेति वाच्यम् । नचेदेवं तदा स्वन्यायविरोध इति ॥

(राघ.) **पक्षादीनामिति** ॥ लिङ्गसाध्यदृष्टान्ता आदिपदार्थाः । भागासिद्ध-मित्यादीत्यादिपदेन हेतूत्पत्तेः प्राक् पक्षवृत्तित्वाभावेन पक्षधर्मतासिद्धिर्दृष्टान्तो-त्पत्तेः पूर्वं तत्र हेत्वादेरभावेन साधनवैकल्यादीति गृह्यते- **स्वन्यायेति** ॥ वादिसाधनं धूमवत्त्वमसाधकं भागासिद्धत्वात् । ह्रदपर्वतौ वह्निमन्तौ धूमवत्त्वा-दिति भागासिद्धहेतुवदिति जातिवाद्युक्तप्रतिषेधेऽपि धूमवत्त्वरूपपक्षोत्पत्तेः प्राग् भागासिद्धत्वहेतोरभावात् त्वदुक्तोऽपि हेतुर्भागासिद्ध इति सुवचत्वात् स्वन्याय-विरोधान्तर्भावोऽस्येत्यर्थः ॥

(वेदे.) **पक्षादीनामिति** ॥ एतच्च सदुत्तरेऽसिद्ध्युद्भावनेऽतिव्याप्तिवारणाय- **तत्र वृत्त्यभाव इति** ॥ तथाच विषयवृत्तित्वे हेतुवृत्तेः । उत्पन्न एव हि पक्षो विषयो नत्वनुत्पन्नोऽपीति भावः । अनुत्पन्नस्यानङ्गत्वादयुक्ताङ्गाधिकत्वं वा ॥

संशयसमः ॥ सत्यपि निर्णयकारणे साधारणधर्मादिमात्रेण संशयापादनं संशयसमः । यथा यदि धूमवत्त्वादग्निमत्त्वनिश्चयस्तर्हि ह्रदमहानससाधारणेन द्रव्यत्वेन तत्संशयः किं न स्यादिति ।

तत्र निर्णायकाभावसहकृतस्यैव समानधर्मादेः संशयकारणत्वा-दत्र निर्णायकसद्भावादसंशय इति वाच्यम् । निर्णायकं न संशय-प्रतिबन्धकमिति वदतः स्वन्यायविरोध इति ॥

(राघ.) **साधारणधर्मादिमात्रेणेति** ॥ मात्रपदव्यावर्त्यो निर्णायकाभाव इति सूचनाय सत्यपि निर्णयकारण इति । आदिपदेनासाधारणधर्मादिग्रहः । **स्वन्या-येति** ॥ धूमवत्त्वमसाधकं द्रव्यत्वरूपसाधारणधर्मेण सत्प्रतिपक्षत्वात् सम्मत-वदिति जातिवाद्युक्तप्रतिषेधेऽपि यदि सत्प्रतिपक्षत्वादसाधकत्वनिश्चयस्तर्हि सत्प्रतिपक्षासत्प्रतिपक्षसाधारणेन हेतुत्वधर्मेणासाधकत्वसंशयोऽपि किं न स्यादिति स्वन्यायविरोध इत्यर्थः ॥

(वेदे.) संशयसम इति ॥ विशेषादर्शनसमवहितं समानधर्मादिना संशयापादने सदुत्तरेऽतिव्याप्तिपरिहाराय मात्रपदम् । तद्व्यवच्छेद्यप्रदर्शनायैव पूर्वं सत्यन्तं लक्षणान्तर्गतम् ॥

प्रकरणसमः ॥ प्रत्यनुमानेन प्रत्यवस्थानं प्रकरणसम इत्येके । यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदिति । अत्र प्रत्यनुमानस्याङ्गसाकल्याभिमाने सदुत्तरमेव । अन्यथा साधर्म्यसमाद्यन्तर्भावः । तस्मादङ्गीकृतानधिकबलेन बाधचोदनं प्रकरणसम इत्युदयनः ।

एतदप्ययुक्तम् । यथा प्रतिदृष्टान्तसमादावन्यतरचोदनेनैकजातित्वं तथा साधर्म्यसमादिनाऽप्येकजातित्वसम्भवेन पृथक्करणानुपपत्तिः । तदुद्धारस्तु तद्वदेव ॥

(राघ.) **साधर्म्यसमाद्यन्तर्भाव इति** ॥ वैधर्म्यसम आदिपदार्थः । **अङ्गीकृतानधिकबलेनेति** ॥ प्रत्यनुमानेनेत्यनुषङ्गः । **यथा प्रतिदृष्टान्तसमादाविति** ॥ आदिपदेनापकर्षसमग्रहः । तत्र प्रतिदृष्टान्तसमे बाधचोदने प्रतिरोधचोदने चैकजातित्वम् । नतु तत्र भेदः । अपकर्षसमे च दृष्टान्ते साध्येन साधनेन वा सह दृष्टस्य स्थाल्यादेः पर्वते निवृत्त्या साध्याभावचोदने साधनाभावचोदने चैकजातित्वम् । तथा साधर्म्यसमादावपि प्रतिपक्षचोदने बाधचोदने चैकजातित्वं स्यात् । साधर्म्यसमादौ प्रतिपक्षचोदनमिह तु बाधचोदनमित्येतावता भेदे प्रतिदृष्टान्तादावपि भेदः स्यादित्यर्थः । तथाऽपि जातित्वानपायात् । तत्र प्रत्युत्तरोक्तिप्रकारः कथमित्यत आह- **तदुद्धार इति** ॥ अधिकबलत्वरूपयुक्ताङ्गहीनत्वान्नेदं बाधकं भवितुमर्हतीति वाच्यम् । अधिकबलत्वं न बाधकत्वे तन्त्रमिति

वदता, नेदं वादिसाधनं साधकं बाधितविषयत्वादित्युक्तप्रतिषेधेऽपि हेतुत्वात् साधकमेव धूमवत्त्वादिसाधनमिति सुवचत्वात् स्वन्यायविरोध इत्यर्थः ॥

(वेदे.) **अत्रेति** ॥ तथाच युक्ताङ्गनिर्णायकाभावरूपयुक्ताङ्गत्याग इति भावः । **अन्यथेति** ॥ व्याप्त्याद्यङ्गसाकल्याभिमानाभाव इत्यर्थः । **अन्यतर-चोदनेनेत्यादि**। अयं भावः । यथा प्रतिदृष्टान्तमात्रेण बाधप्रतिरोधचोदनयोर्न भिन्नजातिता । किन्तु तदन्यतरेण प्रत्यवस्थानमेकैव जातिस्तथा साधर्म्यसम-जातिलक्षणमेवानभ्युपेतयुक्ताङ्गेनानुमानेन बाधप्रतिरोधान्यतरेण प्रत्यवस्थान-मित्यभिधायेयमपि जातिर्न पृथग्गणनीया । अन्यथा प्रतिदृष्टान्तमात्रेण बाध-चोदनमपि तन्मात्रेण प्रतिपक्षचोदनाद् भिद्येतेति । आदिपदेन सामान्यतया प्रतिधर्मसमग्रहणम् । **तद्वदेवेति** ॥ साधर्म्यसमादिवदेवेत्यर्थः । ततश्चैवमुत्थान-क्रमः । बाधकत्वेऽधिकबलवत्त्वस्याङ्गत्वात् तस्य चानभ्युपगमाद् युक्ताङ्गत्याग इति वाच्यम् । तदनङ्गत्वे तु स्थापनायैव जातेर्बाधप्राप्तेः स्वन्यायविरोध इति ॥

अहेतुसमः ॥ हेतोः साध्यापेक्षया पूर्वापरसहभावनिरासेना-हेतुत्वचोदनमहेतुसमः । यथा न तावत् सर्वसाधनं साध्यपूर्वम् । साध्याभावे तन्निरूप्य साधनत्वायोगात् । नापि साधनं पश्चा-द्भावि । साधनाभावे साध्यायोगात् । नापि द्वयोर्यौगपद्यम् । अविशेषेण साध्यसाधनभावायोगादिति ।

अत्र कृतौ पूर्वभाविनः साधनत्वम् । साधनशक्तेः परानपेक्ष्यत्वात् तद्व्यवहारस्य बुद्धिस्थेनैव साध्येनोपपत्तेः । ज्ञप्तौ तु यथायथं पक्षत्रयमपि । ज्ञातत्वाज्ञातत्वाभ्यां विशेष इत्युत्तरं वाच्यम् । तदनङ्गीकारे तु स्वन्यायविरोध इति ॥

(राघ.) **पूर्वापरसहभावेति** ।। पूर्वभावपश्चाद्भावसहभावेत्यर्थः । **साध्यायोगादिति** ।। साध्यत्वायोगादित्यर्थः । तथाच पश्चाद्भाविनस्तन्निरूपितसाधनत्वं दूरापास्तमिति भावः । उत्तरोक्तिप्रकारमाह- **अत्र कृतावित्यादिना** ।। पूर्वापरभावादिनिरासेन साधनत्वभङ्गः किं साध्यस्योत्पत्तावुत ज्ञप्तौ । तत्राद्यस्योत्तरं कृतावित्यादिना । साध्याभावे कथं साधनेत्यत आह- **साधनशक्तेरिति** ।। अन्त्य आह- **ज्ञप्तौ त्विति** ।। यथायथमित्यव्ययीभावः । **पक्षत्रयमिति** ।। कारणं पूर्वभावि सदेव कार्यं ज्ञापयति । कार्यं तु पश्चाद्भावि सदेव कारणं ज्ञापयति । रसस्तु रूपसहभूतः सन्नेव रूपं ज्ञापयतीति यथायथमित्युक्तम् । ननु सहभावाविशेषात् कस्यचिज्ज्ञापकत्वमन्यस्य ज्ञाप्यत्वमिति विशेषः कथमित्यत आह- **ज्ञातत्वेति** ।। **स्वन्यायेति** ।। वादिसाधनमसाधकं तस्य साध्यापेक्षया पूर्वापरसहभावानुपपत्तिरूपतर्कपराहतत्वादिति जातिवाद्युक्तप्रतिषेधहेतावप्यसाधकत्वरूपसाध्यापेक्षया पूर्वापरसहभावनिरासेन साधनभञ्जनस्य सुकरत्वात् स्वन्यायविरोध इति भावः ।।

(वेदे.) उत्थानबीजमाह- **अत्रेति** ।। अत्रेत्यस्य वाच्यमित्यनेनान्वयः । **शक्तेरिति** ।। शक्तिलक्षणव्यापारस्येत्यर्थः । अत एव प्रमाणलक्षणटीकायां व्यापारेष्वन्यनपेक्षणादित्युक्तम् । **उत्तरं वाच्यमिति** ।। तथाच कृतौ ज्ञप्तौ च पूर्वं साध्यसत्त्वमनुपयोगि किन्तु तज्ज्ञानमेवातो युक्ताङ्गाधिकत्वमेवेति भावः ।

अर्थापत्तिसमः ।। अर्थापत्त्याभासेन प्रत्यवस्थानमर्थापत्तिसमः । यथा पर्वतोऽग्निमान् इत्युक्ते अर्थादापद्यतेऽन्यदनग्निमदितीत्यादि । तथाच साध्यविकलो दृष्टान्त इति ।

अत्रानुपपद्यमानदर्शनाद् उपपादके बुद्धिरर्थापत्तिः । नचात्रानुपपद्यमानं किञ्चिदस्ति । अतो नायं प्रसङ्ग इति वाच्यम् । उक्तविप-

रीताक्षेपमात्रमर्थापत्तिरित्यङ्गीकारे तु स्वन्यायविरोध इति । उपपत्तिसमवद् बीजाभावान्नेदं जात्युत्तरम् ॥

(राघ.) अर्थापत्तीति ॥ व्याप्तिहीनार्थदर्शनेनार्थान्तरकल्पनमर्थापत्त्याभासः । तेन दूषणाभिधानमित्यर्थः । इत्यादीति ॥ यथा महानसो धूमवानग्निमांश्चेत्युक्तेऽर्थादापन्नोऽन्यो निर्धूमोऽनग्निकश्चेति । तथाच पर्वतस्तदुभयहीनः स्यादित्यादिरादिपदार्थः । अनुपपद्यमानत्वरूपयुक्ताङ्गहीनत्वमुत्तरं वाच्यमिति भावेनाह- अत्रेत्यादिना ॥ स्वन्यायेति ॥ वादिसाधनमसाधकं साध्यविकलदृष्टान्तकत्वात् सम्मतवदिति जातिवाद्युक्तप्रतिषेधहेतावपीदमसाधकमित्युक्त्याऽर्थादन्यत् साधकमित्युक्तं स्यात् । तथाच वादिदृष्टान्तः साध्यविकल इत्यपि सुवचत्वात् स्वन्यायविरोध इति भावः । वादिसाधनेन पक्षदृष्टान्तयोरविशेषापादनरूपोत्कर्षसमनिरासाय तदितरेणेत्युक्तम् । साधनभिन्नेनेत्यर्थः । अविशेषापादने बीजोक्त्यर्थं साधनप्रतिबन्धेति ॥

(वेदे.) अत्रेति ॥ तथाच युक्ताङ्गहानिरिति द्रष्टव्यम् ॥

अविशेषसमः ॥ साधनप्रतिबन्ध्या तदितरधर्मेण तद्वतां सर्वपदार्थानामविशेषापादनमविशेषसमः । यथा यदि धूमवत्त्वात् पर्वतमहानसयोरग्निमत्त्वाविशेषः । तदा सर्वभावानां सत्त्वादनित्यत्वाविशेषप्रसङ्ग इति ।

अत्र व्याप्त्यादिसदसद्भावाभ्यां विशेषान्न प्रतिवन्दीग्रहणमित्युत्तरं वाच्यम् । तदनङ्गीकारेण प्रवृत्तस्य स्वन्यायविरोध इति ॥

(राघ.) अनित्यत्वाविशेषप्रसङ्ग इति ॥ तथाच वाद्युक्तहेतुरप्रयोजक इति भावः । स्वन्यायेति ॥ वादिसाधनमसाधकमप्रयोजकत्वादप्रयोजकहेत्वा-

भासवदिति जातिवाद्युक्तप्रतिषेधहेतावपि यद्यप्रयोजकत्वाद्धेतोः पक्षदृष्टान्तयोरसाधकत्वाविशेषस्तर्हि प्रमेयत्वाविशेषात् सर्वं नित्यं स्यादित्यपि सुवचत्वात् स्वन्यायविरोध इत्यर्थः ॥

(वेदे.) उत्कर्षसमव्यवच्छेदाय **तदितरधर्मेणेति**। वादिसाधनव्यतिरेकधर्मेणेत्यर्थः ॥

उपपत्तिसमः ॥ उभयहेतूपपत्त्या प्रत्यवस्थानमुपपत्तिसम इत्येके । यथा यदि शब्दस्यानित्यत्वोपपादकं कृतकत्वमस्तीत्यनित्यत्वमिष्यते तर्हि नित्यत्वोपपादकमस्पर्शत्वमस्तीति नित्यत्वमपि किं नेष्यत इति । एतदसत् । साधर्म्यसमाद्यभेदात् । तस्मात् मत्पक्षेऽपि किमपि साधनं भविष्यतीति सामान्यतः प्रत्यवस्थानमुपपत्तिसम इत्युदयनः ।

इदमप्यसत् । केवलाया एवमुक्तेर्निर्बीजत्वात् । प्रमाणोपपादने तु उपपादकस्य साधुत्वे सदुत्तरत्वात् । असाधुत्वे तस्यैवोद्भाव्यत्वेनाजातित्वात् ॥

(राघ.) **उभयेति** ॥ उभयस्मिन् पक्षद्वये, हेत्वोरुपपादनेन वादिसाधनदूषणमित्यर्थः । **केवलाया इति** ॥ साधकोक्तिरहिताया इत्यर्थः ॥

(वेदे.) पक्षत्वादिति हेतुसत्त्वान्न निर्बीजतेत्यत आह- **प्रमाणेति** ॥ उपपादकस्य हेतोः । **तस्यैवेति** ॥ उपपादकासाधुत्वस्यैवेत्यर्थः । यदा येन दोषेण साध्यत्वं तदा तस्यैवेत्यर्थः ॥

उपलब्धिसमः ॥ निर्दिष्टहेत्वभावेऽपि साध्योपलब्ध्या हेतोरप्रयोजकत्वाभिधानमुपलब्धिसम इत्येके । यथा क्वचिद् धूमवत्त्वा-

भावेऽपि अग्निमत्त्वोपलब्धेरप्रयोजकं धूमवत्त्वमिति । उत्थान-बीजाभावान्नेदं जात्युत्तरम् । किन्तु हान्याद्याभास एव । तस्माद् वादिवाक्यस्यावधारणे तात्पर्यमारोप्यावधारणं विकल्प्य दूषण-मुपलब्धिसम इत्युदयनः । यथा पर्वतोऽग्निमानित्युक्ते किं पर्वत एवाग्निमानुत पर्वतोऽग्निमानेवेति । नाद्यः । महानसादेरप्यग्निम-त्त्वात् । न द्वितीयः । कदाचिदनग्निमत्त्वादित्यादि ।

इदमप्यसत् । तात्पर्यान्तरारोपेण सामान्यछलत्वात् । विकल्पे-नोत्थानान्नेति चेन्न । अवधारणस्यैव विकल्पेनावधारणतात्पर्या-रोपापरिहारात् । व्यवच्छेदवाक्यार्थरुचीनामवधारणं स्थितमेवेति चेन्न । तेषामप्यतद्व्यावृत्त्यङ्गीकारेणैवंविधावधारणस्यानिष्टत्वात् ॥

(राघ.) निर्दिष्टेति ॥ वाद्युक्तहेतोरसत्त्वेऽपीत्यर्थः । उत्थानबीजाभावा-दिति ॥ हेत्वभाववति साध्योपलम्भस्य साध्यं विनाऽप्यस्तु हेतुरित्यप्रयोजक-त्वोद्भावनं प्रत्यनिमित्तत्वेनान्यस्याप्रयोजकत्वोद्भावनबीजस्याभावेनोत्थान-बीजाङ्गवैकल्यान्नेदं जात्युत्तरमित्यर्थः । एवमुद्भावनस्याजातित्वे क्वान्तर्भाव इति प्रष्टारं प्रत्याह- किन्तु हान्याद्याभास एवेति ॥ छलं जातिर्हान्याद्याभास इति प्रागुक्तनिरनुयोज्यानुयोगप्रभेदहान्याद्याभासेऽप्रयोजकत्वाप्राप्तौ तदुद्भावन-रूपत्वादप्रयोजकत्वाभास इति तत्रान्तर्भूयत इत्यर्थः । अवधारण इति ॥ एवकार इत्यर्थः । इत्यादीति ॥ यो धूमवानसावग्निमान् यथा महानस इति दृष्टान्तेऽ-प्यग्निमानेवेति वा महानस एवाग्निमानिति वा विकल्प्य दूषणाभिधानमादि-पदार्थः । समान्यछलत्वादिति ॥ तदुक्तपदानां वाक्यस्य वाऽर्थान्तरकल्पनाद् । बहिरेवावधारणतात्पर्यकल्पनात् सामान्यछलत्वादित्युक्तिः । लक्षणटीकायां वाक्छलं सामान्यछलमुपचारछलं त्रिविधमित्युक्त्वैवमेव सामान्यछलस्वरूपोक्तेः। वादिनोऽवधारणतात्पर्यं सिद्धमेव नारोप्यमिति शङ्कते- व्यवच्छेदेति ॥ व्यवच्छेद-

वाक्यार्थरुचीनामिति बहुव्रीहिः । इतरव्यावृत्तिरूपवाक्यार्थरुचिमतां पुंसामित्यर्थः । **अतद्व्यावृत्तीति**। अनग्निमत्त्वव्यावृत्त्यङ्गीकारेणैवंविधस्य त्वदुक्तप्रकारस्यावधारणस्यानिष्टत्वादित्यर्थः ॥

(वेदे.) **निर्दिष्टेति**॥ निर्दिष्टहेतुभिन्नहेतुप्रयोज्यसाध्योपलब्ध्येत्यर्थः । **अग्निमत्त्वोपलब्धेरिति** ॥ आलोकादिनेति शेषः । **उत्थानबीजेति** ॥ अयं भावः । वादिना धूमवत्त्वादिति प्रयुक्ते यदि वक्ष्यमाण इव धूमवत्त्वादेव वह्निमानित्यवधारणे तात्पर्यं प्रकल्प्य प्रतिवादी वदति- त्वन्निर्दिष्टहेत्वभावेऽप्यालोकविशेषादिना वह्न्युपलम्भादवधारणविशिष्टत्वदीयहेतोरप्रयोजकत्वमिति । तदा परवाक्यस्यावधारणे तात्पर्यावश्यम्भावरूपमुत्थानबीजं युक्तं स्यात् । अवधारणतात्पर्यकल्पनाभावेत्वालोकादिप्रयुक्तवह्न्युपलम्भमात्रेण धूमस्य वह्न्यप्रयोजकत्वाभिधाने बीजाभावात् । नहि धूममात्रस्य वह्निप्रयोजकत्वं वादिनोक्तमिति । **हान्याद्याभास इति** ॥ अप्रयोजकत्वाभावेऽपि प्रयोजकान्तरदर्शनजन्यतद्भ्रमेण तदापादनमिति भावः। **व्यवच्छेदेति** ॥ पदार्थसंसर्गस्य न वाक्यार्थत्वं किन्त्वतद्व्यावृत्तेरेव दण्डोऽस्यास्तीत्युक्तेऽदण्डिव्यावृत्तसत्ताप्रतीतिरित्येतेषां हृदयम् । तथाचैतन्मतेऽवधारणस्य व्यवच्छेदस्यारोपाभावान्न छलत्वमिति भावः। **नेति** ॥ तेषामपि मते वह्निमानित्युक्ते अवह्निव्यावृत्तिलाभेऽपि पूर्वविकल्पितावधारणार्थस्यानङ्गीकारेण तत्र तात्पर्यारोपेऽवश्यंवाच्ये पुनः छलत्वमेवेति भावः ॥

अनुपलब्धिसमः ॥ उपलब्ध्यादिविपयिधर्माणां स्वात्मनि वृत्त्यवृत्त्या तत्त्वव्याघातापादनमनुपलब्धिसमः । यथोपलब्धिः स्वात्मनि वर्तते चेदुपलब्धत्वाद्[1] घटादिवदनुपलब्धिः । न वर्तते चेत् तथाऽपि तद्वदेवेत्यादि ।

---

१. घटः यथा उपलब्धत्वात्= उपलब्धिविषयत्वात्, अनुपलब्धिरूपः तथा उपलब्धिरपि स्यादित्यर्थः ।

अत्र विषयापेक्षयोपलब्धित्वस्य स्वात्मनि वृत्त्यवृत्तिभ्यां न निवृत्तिरिति वक्तव्यम्। तदनङ्गीकारे स्वन्यायविरोधः स्वक्रियाविरोधो वेति ॥

(राघ.) **उपलब्ध्यादीति** ॥ इच्छाकृत्यादिरादिपदार्थः। **विषयिधर्माणाम्** अर्थविषयधर्माणामित्यर्थः। वृत्त्यवृत्त्यनिमित्तेनोपलब्धित्वादिव्याघातापादनमित्यर्थः। **स्वात्मनि** स्वात्मविषये **अनुपलब्धिः** उपलब्धिर्न भवतीत्यर्थः। **तथाऽपीति** ॥ स्वविषये न वर्तत इति पक्षेऽपि। **तद्वदेव** घटवदेव। घटो यथा स्वविषये स्वयं न वर्तत इति कृत्वोपलब्धिर्न भवति तथोपलब्धिरपि स्वस्मिन् स्वयं न वर्तत इत्यनुपलब्धिः स्यादित्यर्थः। इत्यादीत्यादिपदेनेच्छादावप्येवं ध्येयमिति गृह्यते। **तदनङ्गीकार इति**। विषयापेक्षयोपलब्धित्वादेः कदाऽप्यनपाय इत्यस्यानङ्गीकार इत्यर्थः। **स्वन्यायेति**। उपलब्धित्वादिति वाद्युक्तं साधनं न साधकमसिद्धत्वात् सम्मतवदिति जातिवाद्युक्तप्रतिषेधेऽप्यसिद्धिः स्वात्मनि वर्तते न वा। आद्येऽसिद्धत्वमेव न सिद्धत्वम्। न वर्तत इति चेदसिद्धवदेव नासिद्धत्वमिति। उभयथाऽप्युपलब्धित्वस्यासिद्धिविषयत्वरूपासिद्धत्वं नेति वक्तुं सुवचत्वात् स्वन्यायविरोधः। तथोपलब्धिं निराकुर्वन्नुपलब्ध्यर्थं वाक्यं प्रयुङ्क्त इति स्वक्रियाविरोधो वेत्यर्थः ॥

(वेदे.) **विषयिधर्माणामिति** ॥ विषयनिरूप्यधर्माणामित्यर्थः। **तत्त्वेति** ॥ उपलब्धित्वादित्यर्थः। **स्वात्मनीति** ॥ उपलब्ध्यादावित्यर्थः। स्वात्मनीति विषयसप्तमी। **न वर्तत इति** ॥ स्वविषये उपलब्धिरूपेण वर्तमानघटादिवदुपलब्धिर्न स्यादस्वविषयकत्वादित्यर्थः। इत्यादीत्यनेनानुपलब्ध्यादिविषयिधर्मान्तरपुरस्कारेणाप्येतज्जातिप्रवृत्तिं गृह्णाति। तत्प्रकारश्च प्रमाणलक्षणटीकादौ द्रष्टव्यः। **अत्रेति** ॥ स्वात्मनि वृत्त्यवृत्तिभ्यामुक्तरीत्या चापेक्षयोपलब्धित्वनिवृत्तावपि न विषयापेक्षयोपलब्धितानिवृत्तिः। विषये तस्य वृत्त्या तत्त्वोप-

पत्तेः। तथाच स्वात्मवृत्तेरयुक्तताया अप्येवाङ्गीकृतत्वेनायुक्ताङ्गाधिकत्वमिति भावः। **तदनङ्गीकार इति**॥ विषयापेक्षयाऽप्युपलब्धित्वस्यानङ्गीकार इत्यर्थः। इदमत्राकूतम्। जातिवादिप्रमेयमप्युपलब्धित्वादस्तीत्यङ्गीकर्तव्यम्। तथाच तत्राप्युपलब्धेः स्वात्मनि वृत्त्यवृत्तिभ्यामभाव एव चासिद्धिरिति स्वन्याय-विरोधः। विषयापेक्षयाऽप्युपलब्धितानिरासे चैतद्विषयकोपलब्धिजननाय शब्दप्रयोगरूपस्वक्रियाविरोधोऽपि न हि सम्भवति। उपलब्धिः स्वातिरिक्तार्थेऽपि नोपलब्धिरिति वदति। तादृशार्थोपलब्धये शब्दव्यवहारं च करोतीति॥

नित्यसमः॥ विशेषणधर्मस्य तदतद्रूपताविकल्पेन धर्मिण-स्तद्विशिष्टत्वभङ्गो नित्यसमः। यथा शब्दोऽनित्य इत्युक्तेऽनित्यत्वं नित्यमनित्यं वा। आद्ये धर्मिणो नित्यत्वापातः। द्वितीये तन्नाशे पुनः शब्दस्य नित्यत्वापत्तिरित्यादि।

अत्र स्वपक्षे निर्वाहान्तरविवक्षया परपक्षे दौर्घटयापादने तात्पर्यं चेत् सदुत्तरमेव। विशिष्टस्वरूपनिराकरणं चेत् तदादौ निर्वाहो वाच्यः। तदनभ्युपगमेन प्रवृत्तस्य स्वन्यायस्वक्रियाविरोधाविति॥

(राघ.) **विशेषणधर्मस्य** साध्यधर्मस्येत्यर्थः। **धर्मिणो** विशेषस्य। **धर्मि-णोऽपि नित्यत्वापात इति**॥ नित्यधर्माश्रयस्यानित्यत्वायोगादिति भावः। इत्यादीत्यादिपदेन नित्यत्वं शब्दाद् भिन्नमभिन्नं वा। आद्येऽनवस्थापत्त्या भिन्ना-नित्यत्ववैशिष्ट्यभङ्गः। शब्दस्य तदभिन्नत्वे तु न सुतरां तद्वैशिष्ट्यमित्यादि-ग्रहः। तथैव वरदराजोक्तेः। **अत्रेति**॥ नित्यधर्म इत्यस्य दौर्घट्यापादन इत्यन्ते-नान्वयः। **स्वपक्षे** नित्यत्वपक्ष इत्यर्थः। **विशिष्टस्वरूपेति**॥ विशिष्टपदार्थ-मात्र(त्वेन) खण्डनतात्पर्यं चेदित्यर्थः। **तदादाविति**॥ **तदा** तस्मिन् पक्षेऽ-नित्यत्वस्य ध्वंसप्रतियोगित्वरूपतया तस्य नित्यत्वेऽपि नित्यधर्माश्रयस्य

नित्यत्वमिति न नियमः । जात्याश्रयस्य घटादेरनित्यत्वदृष्टेरित्यादिरूपेण जातिवादिविकल्पितकोटचोरन्यतरकोटेरादौ व्याघातोक्तेः पूर्वं निर्वाहो वाच्य इत्यर्थः । **तदनभ्युपगमेनेति** ॥ उक्तनिर्वाहानभ्युपगमेन दूषणे प्रवृत्तस्येत्यर्थः । **स्वन्यायेति** ॥ वादिसाधनं कृतकत्वं न साध्यसाधकं तर्कपराहतत्वादिति जातिवाद्युक्तप्रतिषेधहेतावपि साध्यसाधकत्वं धर्मितो भिन्नमभिन्नं वा । आद्येऽनवस्थापत्त्या भिन्नसाध्यासाधकत्वाभावः । द्वितीये धर्मधर्मिभावायोगेन कृतकत्वं नासाधकत्ववदित्यपि सुवचत्वात् स्वन्यायविरोधः । विशिष्टवस्तुमात्रमपाकुर्वन् स्वाभिमतासाधकत्वरूपसाध्यवैशिष्टचसाधनाय प्रवर्तत इति स्वक्रियाविरोधश्चेत्यर्थः ॥

(वेदे.) स्वरूपेणैतज्जातिप्रवृत्तिप्रकारमुदाहरति- **यथेति** ॥ **आद्य इति** ॥ नहि धर्मो नित्यो धर्मी चानित्य इति युज्यत इति भावः । **नित्यत्वापत्तेरिति** ॥ अनित्यत्वनाशे नित्यत्वापत्तेरावश्यकत्वादिति भावः । स यथा, अनित्यत्वं शब्दाद् भिन्नमभिन्नं वा आद्येऽनवस्था । द्वितीयेऽन्यतरमात्रावशेष इत्यादि । आदिपदेन वैरूप्येणाप्येतज्जातिप्रवृत्तिप्रकारं सङ्गृह्णाति । **सदुत्तरमेवेति** ॥ स्वव्याहतेरभावादिति भावः । **विशिष्टस्वरूपेणेति** ॥ वैरूप्येण प्रवृत्तावुक्तरीत्याऽस्या जातेर्विशिष्टस्वरूपमात्रे स्वरूपनिराकरणेऽपि प्रयोगसम्भवादिति भावः । अत एवाह परः- उपलक्षणं नामैतत् । नित्यसमेत्यन्वर्थसञ्ज्ञा तूपरञ्जकधर्मसम एवेति । ततश्च नित्यानित्यभिन्नाभिन्ने कार्याकार्ये आश्रितानाश्रितसत्यासत्यसन्दिग्धासन्दिग्धे इत्याद्या विकल्पक्रमाः सङ्गृहीता भवन्तीति । **निर्वाह इति** ॥ तर्कस्य व्याप्त्याद्यभावाद् युक्ताङ्गहानिरिति वक्तव्यमित्यर्थः । **तदनभ्युपगमे च** निर्वाहप्रकारानभ्युपगमे । धर्मधर्मिभावमात्रापलापेन जातेरप्यनुत्थानात स्वन्यायविरोधः । विशिष्टं नास्तीति वाक्यार्थस्यापि विशिष्टरूपत्वेन स्वक्रियाविरोधश्चेति भावः ॥

अनित्यसमः ।। वादिसाधनप्रतिबन्ध्या धर्मान्तरेण तद्वतां साध्यधर्मवत्त्वापादनमनित्यसमः । यथा यदि कृतकत्वाच्छब्दोऽनित्यः स्यात् तर्हि सत्त्वात् सर्वमनित्यं स्यादिति ।

इयमप्यविशेषसमलक्षणेनैव सङ्गृहीतत्वान्न पृथग्वाच्यैव ।।

(राघ.) सत्प्रतिपक्षत्वव्युदासाय साधनप्रतिबन्ध्येति- **इयमपीति** ।। यथा प्रकरणसमजातिः साधर्म्यसमलक्षणेन सङ्गृहीता तथेयमप्यनित्यत्वाविशेषापादनरूपत्वात् तल्लक्षणेनैव सङ्गृहीतेत्यर्थः ।।

(वेदे.) **न वाच्येति** ।। अविशेषसमायां पक्षादेरपि विशेषमात्रापादनमिह तु विपक्षस्य सपक्षत्वापादने तात्पर्यमिति तात्पर्यभेदमुक्त्वा तृतीयहान्याद्याभासकल्पनया जातिभेदकल्पनायामतिप्रसङ्ग इति भावः ।।

कार्यसमः ।। हेतोः सन्दिग्धासिद्ध्या प्रत्यवस्थानं कार्यसम इति केचित् । यथा शब्दो नित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वमुत्पाद्यत्वेन व्यङ्ग्यत्वेन वेति सन्दिह्यत इति । इदमप्यन्यथासिद्ध्युद्भावनत्वात् सदुत्तरमेव । तस्मात् पक्षादीनामन्यतमस्यासिद्धिमुद्भाव्य तत्साधकत्वेन स्वयमुत्प्रेक्षितस्य दूषणेन वादिसाधनभङ्गः कार्यसम इत्युदयनः । यथा शब्दोऽनित्यः कार्यत्वादित्युक्ते कार्यत्वमसिद्धम् । तत्साधकं च प्रयत्नानन्तरीयकत्वं वाच्यम् । तच्चान्यथासिद्धमिति ।

इदमप्यनभिप्रेततात्पर्यारोपाच्छलमेवेति ।।

हान्याद्याभासः ।। प्रतिज्ञाहान्याद्यप्राप्तावपि भ्रान्त्यादिना

तदुद्भावनं हान्याद्याभासः । स प्रमाणविरोध एव । हान्याद्याभासस्य प्राश्निकादिभिः प्रमितत्वात् ॥

(राघ.) प्रयत्नानन्तरीयकत्वात् प्रयत्नानन्तरभावित्वादिति वादिनोक्ते प्रतिवादी वदति- **प्रयत्नानन्तरीयकत्वमित्यादि। इति जातीनामन्तर्भावोक्तिः ॥**

क्रमप्राप्तं तृतीयं निरनुयोज्यानुयोगप्रभेदं लक्षयित्वा स्वोक्तेऽन्तर्भावयति- **प्रतिज्ञाहान्यादीति** ॥ प्रतिज्ञान्तरादिरादिपदार्थः । **भ्रान्त्यादिनेति** ॥ परव्यामोहनमादिपदार्थः ॥

(वेदे.) एवं छलजाती निरूप्य निरनुयोज्यानुयोगप्रभेदमुक्त्वा तृतीयं हान्याद्याभासरूपं तद्भेदमाह- **प्रतिज्ञेति ॥ भ्रान्त्यादिनेति ॥** इदश्वानेकविकल्पस्फुरणेन विकल्पयतोऽनिष्टविकल्पत्यागेन प्रतिज्ञाहानिः । प्रकरणाद्यापन्नविशेषणाविष्करणेन प्रतिज्ञान्तरम् । नञः प्रयोगमात्रेण विरोध इत्यादिपरग्रन्थानुसारेण द्रष्टव्यम् । तस्यान्तर्भावमाह- **स इति** ॥

अप्राप्तकाले ग्रहणम् ॥ उद्भावनकालमप्राप्यातिक्रम्य वा निग्रहस्थानोद्भावनमप्राप्तकाले ग्रहणम् । तदसङ्गतमेवेति ॥

(राघ.) प्रागुक्तमन्तिममपि तत्प्रभेदं लक्षयित्वाऽन्तर्भावयति- **उद्भावनेति** ॥ असङ्गतमेवेति । उद्भावनकाल एवोद्भावनस्याकाङ्क्षितत्वेनान्यदोद्भावनमसङ्गतावन्तर्भवतीत्यर्थः ॥

(वेदे.) चतुर्थं निरनुयोज्यानुयोगप्रभेदमाह- **उद्भावनकालमिति** ॥ निग्रहोद्भावनकालस्त्रिविधः पूर्वमेवोक्तः । अस्याप्यन्तर्भावमाह- **तदिति** ॥ निग्रहस्थानोद्भावनोचितकाल एव तदुद्भावनस्याकाङ्क्षितत्वेन तमप्राप्यातिक्रम्य वा तदुद्भावनस्यानाकाङ्क्षितत्वादिति भावः ॥

अपसिद्धान्तः ।। अपसिद्धान्तस्तु स्ववचनविरोध एव । यथा प्राभाकरस्येश्वराभ्युपगमः ।।

(राघ.) एवं प्रतिज्ञाहान्यादिनिग्रहस्थाननिर्देशकन्यायसूत्रे निर्दिष्टानां निरनुयोज्यानुयोगान्तानां विंशतिनिग्रहस्थानानां सप्रभेदं स्वरूपमन्तर्भावं चाभिधाय क्रमप्राप्तमेकविंशमपसिद्धान्तमपि प्राङ् निरूपितस्वरूपं स्ववचनविरोधप्रभेदतयोक्त्याऽर्थात् तत्रान्तर्भावं प्राप्तमपीहान्तर्भावप्रस्तावात् स्पष्टत्वायान्तर्भावयति- **अपसिद्धान्तस्त्विति** ।।

(वेदे.) एवं निरनुयोज्यानुयोगस्य प्रभेदस्यान्तर्भावं निरूप्येदानीं क्रमप्राप्तस्यापसिद्धान्तरूपनिग्रहस्थानस्य लक्षणस्य पूर्वमेवोक्तत्वादन्तर्भावमेवाह- **अपसिद्धान्तस्त्विति** ।। पूर्वाचार्यवचनस्यापि स्वयमङ्गीकृतत्वेन स्ववचनत्वादिति भावः ।।

।। परोक्तहेत्वाभासानाम् अन्तर्भावः ।।

हेत्वाभासः ।। पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद् व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति हेतोः पञ्च रूपाणि । तत्रान्वयव्यतिरेकिणः पञ्चापि विवक्षितानि । इतरयोस्तु चत्वारि । केवलान्वयिनो विपक्षाभावेन ततो व्यावृत्त्यभावात् । केवलव्यतिरेकिणः सपक्षाभावेन तत्र सत्त्वानुपपत्तेः । तत्र विवक्षितरूपेषु कतिपयसहिताः कतिपयरहिता हेत्वाभासाः । ते चासिद्धविरुद्धानेकान्तिकानध्यवसितकालात्ययापदिष्टसत्प्रतिपक्षप्रकरणसमाः ।

तत्र व्याप्तस्य पक्षधर्मत्वप्रमितिः सिद्धिः । तदभावोऽसिद्धिः । तद्वानसिद्धः । स चतुर्विधः । व्याप्यत्वासिद्धः आश्रयासिद्धः

पक्षधर्मत्वासिद्धः एतत्प्रमित्यसिद्धश्चेति । तत्र व्याप्यत्वासिद्धो द्विविधः । साध्यसम्बन्धरहितः सोपाधिकसम्बन्धश्चेति । आद्यो यथा । सर्वं क्षणिकं सत्त्वादिति । अयमुभयसम्बन्धाभावादव्याप्तावन्तर्भूतः । द्वितीयो यथा । वैधीहिंसाऽधर्मसाधनं हिंसात्वाद् ब्रह्महिंसावदिति । हिंसात्वपापसाधनयोः सम्बन्धे निषिद्धत्वस्योपाधेः सत्त्वात् ॥

(राघ.) सूत्रक्रमप्राप्तद्वाविंशहेत्वाभासलक्षणं विवक्षुरुपोद्घातमाह- **पक्षधर्मत्वमित्यादिना** ॥ पक्षादेर्लक्षणं प्रागुक्तमिति भावः । इदानीं लक्षणमाह- **तत्र विवक्षितेति** ॥ तत्रेत्यस्यैवं सतीति वा त्रिविधानुमानेष्विति वाऽर्थः । उक्तानुमानत्रये यत्र यावन्ति विवक्षितानि तेषु कतिपयसहिताः कतिपयरहिता इत्यर्थः । हेतुवदवभासनत्वघटनाय कतिपयसहिता इत्युक्तम् । तान् पररीत्या परिगणयति- **ते चेति** ॥ तेषां लक्षणान्यवान्तरभेदांश्चोक्त्वा यथायोगमुक्तेष्वन्तर्भावमाह- **तत्र व्याप्तस्येत्यादिना** ॥ **तद्वानिति** ॥ व्याप्तिपक्षधर्मतावत्त्वेन प्रमितिहीन इत्यर्थः । **स चतुर्विध इति** ॥ वह्निव्याप्यधूमवान् पर्वत इत्येवंरूपसिद्ध्यभावत्वं च व्याप्त्यभावेनाश्रयाभावेन वा पक्षधर्मत्वाभावेन वा व्याप्त्यादित्रयस्य प्रमित्यभावेन वेति भावेनाह- **व्याप्यत्वासिद्ध इत्यादिना** ॥ **एतत्प्रमितीति** ॥ व्याप्त्यादेः प्रमित्यसिद्धश्चेत्यर्थः । अज्ञानासिद्ध इति यावत् । **साध्यसम्बन्धेति** ॥ व्याप्तिग्रहस्थलरूपदृष्टान्तहीनतया साध्यसम्बन्धरहित इत्यर्थः । **अयमिति** ॥ साध्यसम्बन्धहीनासिद्धः प्रागुक्तेऽव्याप्तिरूपहेतुविरोधावान्तरभेदे साध्यतदभावरूपोभयसम्बन्धाभावरूपेऽन्तर्भूत इत्यर्थः । ब्रह्महिंसावदितीत्यनन्तरमत्र हेतुसाध्ययोः सम्बन्धः सोपाधिक इति शेषः ॥

(वेदे.) क्रमागतहेत्वाभासरूपनिग्रहस्थानान्तर्भावकथनाय तावल्लक्षणं

वक्तुमुपोद्घातेन किञ्चिदाह- **तत्रेत्यादिना** ॥ इदानीं लक्षणमाह- **तत्रेति** ॥ तेष्वित्यर्थः । **विवक्षितरूपेष्विति** ॥ यथायोग्यं चतुर्षु पञ्चसु वेत्यर्थः । घटादिनिरासायाद्यं विशेषणम् । सद्धेतुव्यावृत्त्यै द्वितीयमिति बोध्यम् । **तद्वानिति** ॥ व्याप्तस्य पक्षधर्मत्वप्रमित्यभाववानित्यर्थः । अयञ्च विशिष्टाभावः । क्वचिद् व्याप्त्यभावेन क्वचित् पक्षाभावेन क्वापि हेत्वभावेन क्वचित् प्रतीत्यभावेन । चतुर्विधोऽपि लक्ष्येऽनुगत इति ध्येयम् । **उभयसम्बन्धाभावादिति** ॥ यद्यप्यत्र क्षणिके क्षण एव साध्यसम्बन्धोऽस्ति । तथाऽपि सर्वस्यापि पक्षत्वेन अस्यापि तदन्तःप्रवेशे पक्षातिरिक्ते साध्यतदभावसम्बन्धाभाव इति द्रष्टव्यम् ॥

॥ सोपाधिकस्यान्तर्भावः ॥

साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । निषिद्धत्वं च साध्यमधर्मसाधनत्वं व्याप्नोति । यत्राधर्मसाधनत्वं तत्र निषिद्धत्वमिति नियमात् । न व्याप्नोति च साधनत्वाभिप्रेतं हिंसात्वम् । पक्षे हिंसात्वसद्भावेऽपि निषिद्धत्वस्याभावात् ।

अयं तु विप्रतिपत्तेः प्रागव्याप्त्युन्नायकः । वैधहिंसायाः साधनाव्यापकत्वान्निवर्तमानं निषिद्धत्वं साध्यव्यापाकत्वान्निवर्तयद्धिंसात्वस्य साध्याभावसम्बन्धमापादयतीति । विप्रतिपत्त्युत्तरकालस्तु प्रतिपक्षोन्नायको भवति । साधनाव्यापकत्वात् पक्षाद् व्यावर्तमान उपाधिः साध्यव्यापकत्वात् तद्व्यावर्तयति । ततश्चोपाध्यभावः साध्याभावसाधने हेतुर्भवति । वैधहिंसाऽधर्मसाधनं न भवति, अनिषिद्धत्वात्, भोजनवदिति । तथाच सोपाधिकस्याव्याप्तौ प्रतिज्ञायाः समबलविरोधे चान्तर्भावः ॥

(राघ.) कथं तस्योपाधित्वमित्यत उपाधिलक्षणोक्तिपूर्वं निषिद्धत्वे तल्लक्षणं दर्शयति- **साध्यव्यापकत्वे सतीति**।। व्याप्तेः कर्म व्याप्यं व्याप्तेः कर्तृ व्यापकमिति प्रागुक्तेराह- **निषिद्धत्वं चेति**।। सोपाधिको दशाविशेष एव व्याप्यत्वासिद्धो न सर्वदेति भावेनाह- **अयं त्विति**।। उपाधिरित्यर्थः। **विप्रतिपत्तेः प्रागिति**। पक्षे साध्यवत्त्वतदभावकोटिकविवादात् पूर्वमनुमानप्रयोगात् प्रागित्यर्थः। व्याप्तिग्रह- वेलायामिति यावत्। तदानीमुपस्थितो व्याप्त्यभावोन्नायकोऽनुमापक इत्यर्थः। कथमित्यतो व्यनक्ति- **वैधहिंसाया इति**।। पञ्चमीयम्। यागीयहिंसात इत्यर्थः। व्यावर्तमानत्वहेतुः साधनाव्यापकत्वादिति। एवमग्रेऽपि। **विप्रतिपत्त्युत्तर- कालस्त्विति**।। बहुव्रीहिः। अनुमानप्रयोगोत्तरकाले उपस्थित उपाधिरित्यर्थः। प्रतिपक्षानुमापकत्वं व्यनक्ति- **साधनेति**।। तत्साध्यं व्यावर्तयतीत्यर्थः। **तत- श्चेति**। स्वव्यावृत्त्या साध्यव्यावर्तनाद्धेतोरुपाध्यभावः साध्याभावे हेतुर्भवती- त्यर्थः। कथमित्यतः प्रयोगं व्यनक्ति- **वैधेति**।। **तथाचेति**।। दशाभेदेन दोषद्वयोन्नायकत्वे सतीत्यर्थः। **अव्याप्ताविति**।। साध्यतदभावरूपोभयसम्बन्ध- लक्षणाव्याप्तावित्यर्थः।।

(वेदे.) **विप्रतिपत्तेः प्रागिति**।। पक्षादिप्रविभागात् प्राग्व्याप्तिग्रहणवेलाया- मुपस्थित इत्यर्थः।।

।। आश्रयासिद्धेरन्तर्भावः।।

आश्रयासिद्धोऽपि द्विविधः। असदाश्रयः सिद्धसाधनश्चेति। आद्यो यथा। शशविषाणं तीक्ष्णं, विषाणत्वादिति। प्रमाणविरोधाद्य- सङ्कीर्णोदाहरणाभावादयं हेत्वाभास एव न भवति। द्वितीयो यथा। ईश्वरवादिनं प्रति क्षित्यादिकं सकर्तृकं कार्यत्वादिति। अयमसङ्ग- तावन्तर्भवति, अनाकाङ्क्षितसाधनाय प्रवृत्तत्वात्।।

(वेदे.) प्रमाणविरोधादिति ॥ शशविषाणतत्तैक्ष्ण्ययोरभावस्य प्रमाणत्वेनाधारणादिति भावः ॥

॥ पक्षधर्मत्वासिद्धेरन्तर्भावः ॥

पक्षधर्मत्वासिद्धोऽनेकविधः । यथा शब्दो नित्यश्चाक्षुषत्वादित्यादि । तत्र व्यधिकरणासिद्धो न दूषणमित्युक्तमेव । व्यर्थविशेषणासिद्धो व्यर्थविशेष्यासिद्धश्चाधिक्येऽन्तर्भवतः । भूरियं शशविषाणोल्लिखिता भूत्वादित्यप्रसिद्धविशेषणासिद्धिस्तु दोषान्तरासङ्कीर्णोदाहरणाभावान्न हेत्वाभासः । इतरः पक्षधर्मत्वासिद्धोऽसिद्धावन्तर्भवति । एतत्प्रमित्यसिद्धो यथा । धूमबाष्पाविवेके धूमवत्त्वादिति । अस्याप्यसिद्धिरेव । पक्षविपक्षयोरेव वर्तमानो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वादिति । अयमपि साध्यसम्बन्धाभावे सति तदभावसम्बन्धित्वादव्याप्तः ॥

(राघ.) पक्षधर्मत्वासिद्धोऽनेकविध इति ॥ स्वरूपासिद्धव्यधिकरणासिद्धविशेषणासिद्धविशेष्यासिद्धाप्रसिद्धविशेषणासिद्धभेदेनानेकविध इत्यर्थः । तान् क्रमेणोदाहृत्यान्तर्भावयोग्यमन्तर्भावयति- यथेत्यादिना ॥ चाक्षुषत्वादित्यादि स्वरूपासिद्धस्येतर इत्यादिनाऽन्तर्भावं वक्ष्यति ॥ तत्रेति ॥ असिद्धेषु मध्य इत्यर्थः । उक्तमेवेति ॥ साध्यव्यधिकरणानामपि व्याप्त्युपपादनप्रस्तावे उक्तमित्यर्थः । व्यर्थेति ॥ शब्दो नित्यः सामान्यवत्त्वे सति कृतकत्वात् । कृतकत्वे सति सामान्यवत्त्वादित्यनयोः व्यर्थविशेषणत्वादिनाऽसिद्धत्वेन व्यवह्रियमाणौ आधिक्याख्यनिग्रहस्थाने प्रागुक्तेऽन्तर्भूतावित्यर्थः । इतर इति ॥ व्यधिकरणासिद्धादिरूपपक्षधर्मत्वासिद्धादन्यः स्वरूपासिद्ध इत्यर्थः । प्राग् विभक्तं चतुर्थ-

मुदाहृत्यान्तर्भावयति- **एतत्प्रमितीति** ।। **अस्यापीति** ।। एतत्प्रमित्यसिद्धस्या-सिद्धिरेव दोषो नान्य इत्यर्थः । **असिद्धस्यान्तर्भावोक्तिः** ।।

(वेदे.) तृतीयमसिद्धिभेदमाह- **पक्षधर्मत्वासिद्ध इति** ।। चाक्षुषत्वा-दीत्यादिपदेन विशेषणविशेष्यासिद्धव्यधिकरणासिद्धव्यर्थविशेषणविशेष्या-सिद्धाप्रसिद्धविशेषणासिद्धानां ग्रहणम् । **तत्र व्यधिकरणेति** ।। ननु पक्षधर्मता-नियम इत्यत्रेत्यर्थः । तत्र हि भिन्नदेशकालयोरप्यूर्ध्वदेशवृष्टिनदीपूरयोर्हेतुहेतु-मद्भावस्य सांव्यावहारिकत्वदर्शनादित्युक्तमिति भावः । **दोषान्तरेति** । प्रमाण-विरोधाव्याप्त्यसङ्कीर्णोदाहरणाभावादित्यर्थः । **इतरः पक्षधर्मतासिद्ध इति** ।। विशेषणविशेष्यासिद्धिमान् इत्यर्थः । विशेषणविशेष्ययोरसिद्धौ विशिष्टरूप-लिङ्गस्याप्यसिद्धिरेवेति भावः । चतुर्थमसिद्धं दर्शयति- **प्रमितीति** ।। **धूम-बाष्पेति** ।। धूमवति धूमसन्देहदशायामित्यर्थः । **अयमपीति** ।। समुचितस्थले लिङ्गस्याप्रमितेरसिद्धलक्षणत्वेनोक्तत्वादित्यर्थः । व्यतिरेक्यनुमानव्यावृत्त्यै साध्यासाधक इति । असिद्धानैकान्तिकव्यवच्छेदायोत्तरभागः ।।

।। अनैकान्तिकान्तर्भावः ।।

पक्षसपक्षविपक्षवृत्तिरनैकान्तिकः । यथा शब्दो नित्यः प्रमेय-त्वादिति । अयमपि साध्यतदभावसम्बन्धित्वादव्याप्त एव । साध्यासाधकः पक्ष एव वर्तमानो हेतुरनध्यवसितः । स त्रिविधः । तत्र सपक्षविपक्षरहितो यथा सर्वमनित्यं सत्त्वादिति । उभयवान् यथा भूर्नित्या गन्धवत्त्वादिति । सपक्षवान् विपक्षरहितो यथा शब्दोऽभिधेयः शब्दत्वादिति । अयं व्याप्यत्वासिद्धत्वान्न पृथग्घेत्वा-भास इत्येके । अन्ये तु सपक्षविपक्षरहितो व्याप्यत्वासिद्धः । सति सपक्षे पक्षमात्रवृत्तिः सपक्षवान् विपक्षरहितश्च द्वावनैकान्तिकेऽ-

न्तर्भवत इत्याहुः। तथाहि। सव्यभिचारोऽनैकान्तिकः। व्यभिचारोऽन्वयतो व्यतिरेकतश्च। तत्रान्वयस्य भूमिः पक्षः सपक्षश्च। तदतिरेकेण विपक्षेऽपि वर्तमानःसाधारणानैकान्तिकः। व्यतिरेकस्य भूमिर्विपक्षः सपक्षैकदेशोऽपि। तत्र सर्वस्मिन्नपि सपक्षेऽवर्तमानोऽसाधारणानैकान्तिक इति। सर्वथाऽव्याप्तावन्तर्भवति। उभयसम्बन्धाभावात्। व्यतिरेकव्याप्तिसम्भवादयं न हेत्वाभास इत्येके। अपरे तु सत्यपि सपक्षे तत्रावर्तमानस्य किं व्याप्तिरेव नास्त्युत केवलव्यतिरेकिवदस्तीति सन्देहावस्कन्दनाद् हेत्वाभासत्वमित्याहुः॥

(राघ.) नित्यः शब्दः पटत्वादिति स्वरूपासिद्धावनतिव्याप्तये पक्षेत्युक्तिः। अनध्यवसितव्युदासाय विपक्ष इति। साधारणानैकान्तिकव्यवच्छेदायैवकारः। प्रागुक्ताव्याप्तिप्रभेदेऽन्तर्भावमाह- **अयमिति**॥ विरुद्धव्युदासाय सपक्षवृत्तिरिति। असिद्धव्युदासाय पक्षवृत्तिरिति। सद्धेतावनतिव्याप्तये विपक्षवृत्तिरिति। **साध्यासाधक इति**॥ एतच्च केवलव्यतिरेकिव्यवच्छेदायोक्तम्। असिद्धानैकान्तिकयोर्व्यावृत्तये पक्षे इति एवेति चोक्तम्। त्रिविध इत्युक्तत्रिविधस्वरूपं क्रमेण वदन्नुदाहरणोक्त्या व्यनक्ति- **सपक्षेत्यादिना**॥ **अयमिति**॥ त्रिविधोऽप्यनध्यवसित इत्यर्थः। नन्वनैकान्तिकं हि स्वोचितस्थलादन्यत्रापि वर्तमानम्। पक्षमात्रवृत्तिहेतुः कथमनैकान्तिकेऽन्तर्भवतीत्यतोऽन्वये, तदभावेऽपि व्यतिरेके कथितरूपमनैकान्तिकत्वमस्तीति प्रतिज्ञापूर्वमुपपादयति- **तथाहीत्यादिना**॥ स्वस्थानमनतिक्रम्यान्यत्र वृत्तिर्व्यभिचारः। स व्यभिचारोऽनैकान्तिक उच्यत इत्यर्थः। **तत्रेति**॥ स्थलद्वयमध्ये। सर्वस्मिन्नपि सपक्षेऽवर्तमानः सर्वसपक्षे वर्तमानव्यतिरेकवानित्यर्थः। पक्षैकदेशं स्वस्थानमतिलङ्घ्य सर्वत्र सपक्षे व्यतिरेकवत्त्वादयमसाधारणानैकान्तिक इत्येवाहुरित्यर्थः। **सर्वथेति**। अनध्यवसितत्वेन पृथग्घेत्वाभासत्वे वा व्याप्यत्वासिद्धत्वे वाऽसाधारणा-

नैकान्तिकत्वे वा सर्वप्रकारेणाव्याप्तावेवान्तर्भवतीत्यर्थः । तत्र हेतुः **उभयेति** ॥ साध्यतदभावरूपोभयसम्बन्धाभावादित्यर्थः । **अयमिति** ॥ पक्षमात्रवृत्तिहेतुरित्यर्थः ॥

(वेदे.) **व्याप्यत्वासिद्धत्वादिति** ॥ आद्ये सपक्षस्यैवाभावेन द्वितीयतृतीययोः सपक्षसत्त्वेऽपि तत्र हेतुवृत्त्यभावेन च व्याप्तेस्तत्र दर्शयितुमशक्यत्वादिति भावः। **व्यभिचार इति** ॥ स्वभूमिमतिक्रम्यान्यत्र सत्त्वमित्यर्थः । **अन्वयत इति** ॥ अन्वयमुखेन व्यतिरेकमुखेन चेत्यर्थः । **अन्वयस्य** हेत्वन्वयस्य, **व्यतिरेकस्य** हेतुव्यतिरेकस्य। यस्य हेतोरन्वयः स्वभूमिमतिक्रम्यान्यत्रास्ति स साधारणानैकान्तिकः । यस्य हेतोर्व्यतिरेकः स्वभूमिमतीत्यान्यत्र वर्तते सोऽसाधारणानैकान्तिक इति प्रघट्टिकार्थः। **सर्वथेति** ॥ आद्यस्य व्याप्यत्वासिद्ध्यन्तर्भावेऽन्त्ययोश्च साधारणानैकान्तिकयोरन्तर्भावेऽपीत्यर्थः । **अव्याप्ते** अस्मदभिमतहेतुविरोधप्रभेदरूपे। **अयमिति** ॥ असाधारणानैकान्तिक इत्यर्थः । गन्धवत्त्वस्य नित्यत्वानित्यत्वरूपधर्मद्वयाभावव्यापकाभावप्रतियोगित्वेन सत्प्रतिपक्षतया नैकमात्रानुमित्यनुकूलव्याप्तिनिश्चयस्तत्र सम्भवतीत्यस्वरसमुद्गिरन्नेक इत्याह। **सन्देहेति** ॥ तथाऽप्यव्याप्तेऽन्तर्भाव इति भावः ॥

॥ बाधस्यान्तर्भावः ॥

प्रमाणबाधिते पक्षे वर्तमानो हेतुः कालात्ययापदिष्टः । यथा सर्वं तेजोऽनुष्णं द्रव्यत्वादिति। अत्र धर्मिग्राहकेण साध्यप्रतियोगिग्राहकेण चोपजीव्येन प्रत्यक्षेण पक्षो बाधितः । चक्षू रूपग्राहकं न भवति । इन्द्रियत्वादिति धर्मिग्राहकानुमानेन बाधितः । ब्राह्मणेन सुरा पेया, द्रवद्रव्यत्वादित्यागमबाधितः । अयं प्रतिज्ञायाः प्रबलप्रमाणविरोध एव । समबलप्रमाणविरुद्धः सत्प्रतिपक्षः । यथा वायुः प्रत्यक्षः ।

प्रत्यक्षस्पर्शवत्त्वादिति । वायुर्न प्रत्यक्षः, रूपरहितद्रव्यत्वादित्यनेन प्रतिरुद्धत्वात् । अयं प्रतिज्ञायाः समबलप्रमाणविरोध एव ॥

(राघ.) **प्रमाणबाधित इति** ॥ प्रमाणेन निश्चितसाध्याभाववतीत्यर्थः । सद्धेतुव्यावृत्तय एतद्विशेषणम् । प्रमाणबाधितत्वं च पूर्वोक्तदिशा प्रत्यक्षादि-त्रयेणेति क्रमेणोदाहृत्य दर्शयति- **यथेत्यादिना** ॥ तेजोऽनुष्णमित्येवोक्ते तेजोऽन्तरे त्वचौष्ण्यग्रहणसम्भवेन चक्षुर्गृहीते पक्षीकृते कस्मिंश्चित् तेजसि धर्मिग्राहकेण वा साध्यप्रतियोगिग्राहकेण वा बाधाभावात् सर्वं तेज इत्युक्तम् । एवं पक्षीभूत एव तेजस्यौष्ण्यस्य त्वचा ग्रहणेनोक्तरूपद्विविधप्रत्यक्ष-बाधोक्तिर्युक्तेति भावः । **पक्षो बाधित इति** ॥ निश्चितसाध्याभावधर्मिभूतं तेजो-जातमित्यर्थः । बाधकत्वे हेतुरुपजीव्येनेति । तत्र हेतुद्वयं धर्मिग्राहकेणेत्यादि । इन्द्रियत्वादितीत्यनन्तरमत्रेति पक्षो बाधित इति च पदत्रयानुषङ्गः । एवमग्रेऽप्यत्रेति पक्ष इति च पदद्वयानुषङ्गः । **धर्मीति** ॥ रूपज्ञानं करणसाध्यं क्रियात्वादिति सामान्यपरिशेषाभ्यां चक्षुषो धर्मिणो ग्रहणाद् येनानुमानेन चक्षुषः सिद्धिस्तेनैव रूपग्राहकत्वेन सिद्धेस्तदनुमानेन बाधित इत्यर्थः । **आगमेति** ॥ ब्राह्मणो न सुरां पिबेदित्यागमेनेत्यर्थः । आगमस्य निर्दोषतया बलवत्त्वादिति भावः । सत्प्रति-पक्षस्य लक्षणोदाहरणपूर्वमन्तर्भावमाह- **समबलेति** ॥ स्पर्शवत्त्वादित्यनन्तरमयं हेतुरित्यनुषङ्गः । तस्य समबलप्रमाणविरोध एवेत्यन्वयः ।

(वेदे.) तेजोऽन्तरे व्यभिचारपरिहाराय **सर्वम्** इत्युक्तम् । **प्रत्यक्षेणेति** ॥ स्पार्शनप्रत्यक्षेणेत्यर्थः । **पक्ष इति** ॥ विशेषणबाधे विशिष्टबाधादिति भावः । **चक्षुरिति** ॥ रूपग्राहकत्वेनैव तत्सिद्धेरिति भावः । **अयमिति** ॥ त्रिविधोऽपि कालात्ययापदिष्ट इत्यर्थः ॥

स्वपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसमः । यथा विमतं

मिथ्या दृश्यत्वादिति । सत्यत्वेऽप्यस्य वक्तुं शक्यत्वात् । अयं त्वसम्भवीति केचिदाहुः । तदसत् । सत्प्रतिपक्षवदभिमानतः सम्भवात् । अयमपि प्रतिज्ञायाः समबलविरोध एवेति । पक्षाभासहेत्वाभासान्तर्भूतत्वान्न पृथग्वाच्या इत्याहुः । तदसत् । प्रतिज्ञामात्रेणैव स्फुरणात् । साधने स्वक्रियाविरोधस्वन्यायविरोधयोर्हेत्वाभासानन्तर्भावाच्च। स्वक्रियाविरोधो यथा। अहं मूक इति। स्वन्यायविरोधो यथा । प्रमेयं प्रमाणानपेक्षमिति ॥

(राघ.) **स्वपरेति**॥ स्वपक्षसिद्धौ परपक्षसिद्धौ च पक्षधर्मत्व-सपक्षे सत्त्व-विपक्षव्यावृत्तत्वाख्यत्रिरूप इत्यर्थः। **दृश्यत्वादितीति** ॥ हेतुरित्यनुषङ्गः । **अस्येति** ॥ दृश्यत्वहेतोरित्यर्थः । अयं तु पक्षद्वये त्रिरूपो हेतुस्त्वसम्भवी । मिथ्यात्वप्रयोगे यौ सपक्षविपक्षौ शुक्तिरूप्यब्रह्मस्वरूपौ तौ सत्यत्वप्रयोगे विपक्ष-सपक्षावित्यस्य योगादिति एवंरूपहेत्वाभासो नास्त्येवेत्याहुरित्यर्थः। **सत्प्रतिपक्षवदिति** ॥ परस्परप्रतिरुद्धहेत्वोः साध्यतदभावव्याप्यत्वरूपं समबलत्वं यथाऽऽभिमानिकं तथाऽऽभिमानिकसपक्षत्वादेः सम्भवादिति भावः । **अयमपीति**॥ प्रकरणसमोऽपीत्यर्थः। इतिशब्दो हेतुदोषोक्तिसमाप्तौ।

परोक्तहेत्वाभासान् लक्षणोदाहरणपूर्वकं स्पष्टीकुर्वता तेषु केषाञ्चित् प्रमाणविरोधः स्ववचनविरोध इति प्रतिज्ञाविरोधो द्विविध इत्यादिना प्रागुक्तेषु प्रबलप्रमाणसमबलविरोधसिद्धार्थत्वरूपार्थदोषेष्वपसिद्धान्तस्ववचन-स्वक्रियास्वन्यायविरोधरूपवचनविरोधेष्वन्तर्भावः। केषाञ्चिद्धेतुदोषेष्वन्तर्भाव उक्तः। तत्र प्रतिज्ञादोषेऽन्तर्भावविषये विप्रतिपत्तिमुद्भाव्य निरस्यति- **पक्षाभासा इति**॥ प्रमाणबाधितत्वादिरूपाः पक्षाभासा इत्यर्थः। **इत्याहुरिति**॥ अत एव न्यायसूत्रे हेत्वाभासाश्चेत्येवोक्तिरिति भावः । विस्तरस्तु तर्कताण्डवे ध्येयः । प्रमाणबाधादीनां कथञ्चिद्धेत्वाभासान्तर्भावसम्भावनायामपि हेत्वादौ स्ववचन-

विरोधोऽसिद्ध्यादिनैव सङ्गृहीत इति प्रागुक्तदिशा तस्य हेत्वाभासान्तर्भावेऽपि स्ववचनविरोधप्रभेदस्वक्रियाविरोधादेः नार्थदोषरूपहेत्वाभासान्तर्भावो युक्त इत्याह- **साधन इति**॥ साधनानुमान इत्यर्थः। जातिप्रस्तावोक्तरीत्या प्रतिषेधानुमाने स्वक्रियाविरोधादेर्हेतुदोषत्वसम्भवात्। तद्व्यवच्छेदाय साधन इत्युक्तम्। स्ववचनविरोधस्य प्रतिज्ञाविरोधरूपनिग्रहस्थानोदाहरणेन स्पष्टीकृतत्वं मत्वा स्वक्रियाविरोधादेः प्रातिस्विकोदाहरणेन स्पष्टयति- **स्वक्रियेति**॥ प्रमेयं प्रमाणानपेक्षमिति वादिनोक्ते सति प्रमेयं प्रमाणानपेक्षमिति प्रमेयं यथा प्रमाणापेक्षम्। अन्यथा तत्प्रतिज्ञावैयर्थ्यात्। तन्न्यायेन त्वत्पक्षीकृतं प्रमेयं प्रमाणानपेक्षमिति सुवचत्वात् स्वन्यायविरोध इत्यर्थः॥

(वेदे.) असम्भवीति॥ एकस्य हेतोः साध्ये तदभावे च त्रिरूपत्वं न सम्भवतीति विरोधादिति तेषां भावः। दूषणान्तरमाह- **साधन इतीति**॥ तथाच स्वक्रियाविरोधादिसङ्ग्रहायैव पक्षाभासः पृथग् वक्तव्य इति भावः। ननु वादिप्रतिषेधात्मके प्रतिवाद्युत्तरगतस्वक्रियाविरोधादेर्हेत्वाभासानन्तर्भावेऽपि जात्यन्तर्भावसम्भवान्न तदर्थं पक्षाभासः पृथग् वाच्य इत्यत उक्तम्- **साधन इति**॥ प्रतिषेधे स्वन्यायविरोधादेर्जातित्वेऽपि स्थापनायां प्राप्तस्य तस्यान्यत्रानन्तर्भावात् पार्थक्यमावश्यकमिति भावः। केचित्तु। ननु पक्षाभासस्यानुमितिप्रतिबन्धकत्वं वदता तस्य हेत्वाभासत्वस्यावश्यमभ्युपेयम्। अनुमितेर्हेत्वाभासमात्रप्रतिबन्धकत्वनियमादित्यत आह- **साधन इति**॥ पक्षाभासो हेत्वाभासो भवितुमर्हति, अनुमितिप्रतिबन्धकत्वात् साध्याभासवदिति साधन इत्यर्थः। तथाच तयोरेव नियमभङ्ग इति भाव इत्याहुः॥

एवमुदाहरणाभासानपि हेत्वाभासेऽन्तर्भावयन्तस्तेषां न पृथग्वाच्यतामाहुः। तथाहि। उदाहरणलक्षणरहिता उदाहरणवदवभासमाना उदाहरणाभासाः। तत्र साधर्म्योदाहरणे साध्यविकलो

यथा; मनोऽनित्यं मूर्तत्वात् । यन्मूर्तं तदनित्यम् । यथा परमाणुरिति । साधनविकलो यथा कर्मेति । उभयविकलो यथाऽऽकाश इति । आश्रयहीनो यथा शशविषाणमिति । अव्याप्त्यभिधानं यथा घटवदिति । विपरीतव्याप्त्यभिधानं यथा यदनित्यं तन्मूर्तं, यथा घट इति । वैधर्म्योदाहरणे साध्यव्यावृत्तो यथा यदनित्यं न भवति तन्मूर्तं न भवति, यथा कर्मेति । साधनाव्यावृत्तो यथा परमाणुरिति । उभयाव्यावृत्तो यथा घट इति । आश्रयहीनः पूर्ववत् । अव्याप्त्यभिधानं यथाऽऽकाश इति । विपरीतव्याप्त्यभिधानं यथा यन्मूर्तं न भवति तदनित्यं न भवति, यथाऽऽकाश इति ।

अत्र वैधर्म्योदाहरणस्यानुपयुक्तत्वात् तदाभासकथनमनुपयुक्तम् । अव्याप्त्यभिधानं तु न दोषो न्यूनं वा । विपरीतव्याप्त्यभिधानमप्यसङ्गतम् । आश्रयहीनत्वं चाश्रयासिद्धवददूषणम् । अन्यतरवैकल्येनैव दृष्टान्तस्य दुष्टत्वादुभयवैकल्यं न पृथग् गणनीयम् । तस्मात् साध्यवैकल्यं साधनवैकल्यं च द्वयमेव दृष्टान्तदूषणम् । तत्र साध्यवैकल्ये दृष्टान्तो विपक्षो भवति । तत्र वर्तमानं साधनमनैकान्तिकं विरुद्धं वा भवति । साधनवैकल्ये व्याप्यत्वासिद्धिरिति ।

दृष्टान्तदोषो हेत्वाभासेऽन्तर्भवतीति चेन्न । दृष्टान्तोक्त्यनन्तरं प्रतिभासात् । सपक्षान्तरे वर्तमानस्य साधनस्य दृष्टान्तीकृते सपक्षेऽवृत्तौ हेत्वाभासत्वानुपपत्तेश्च । तत्राप्यनुपदर्शितव्याप्तिकत्वेन व्याप्यत्वासिद्ध इति चेन्न । तथाऽप्यर्थदोषाभावादिति ॥

॥ इति श्रीमज्जयतीर्थपूज्यचरणविरचित-
प्रमाणपद्धतावनुमानपरिच्छेदः ॥ छ ॥

(राघ.) पूर्वं दृष्टान्तविरोधो द्विविधः साध्यवैकल्यं साधनवैकल्यं चेत्युक्तं तत् साधयितुमाह- **एवमिति** ॥ पक्षभासा यथा एवमित्यर्थः । सामान्यलक्षणं तावदाह- **उदाहरणेति** ॥ सम्यग् व्याप्तिप्रदर्शनपूर्वकं दृष्टान्तवचनस्वरूपोदाहरणलक्षणरहिता इत्यर्थः । ते चान्वयव्यतिरेकोदाहरणभेदेन द्वादशविधा इति भावेनान्वयोदाहरणषाड्विध्यं तावत् क्रमेण दर्शयति- **तत्रेत्यादिना** ॥ तत्र तेषूदाहरणाभासेषु । व्यतिरेकोदाहरणे तद् दर्शयति- **वैधर्म्योदाहरण इत्यादिना** ॥ प्रागुक्तप्रयोग इति योज्यम् । **पूर्ववदिति** ॥ यथा शशविषाणमिति ज्ञेयमित्यर्थः । **अनुपयुक्तत्वादिति** ॥ केवलव्यतिरेकिखण्डनप्रस्तावे व्यतिरेकव्याप्तेरनुमित्यनङ्गत्वस्योक्तत्वादिति भावः । **न दोष इति** ॥ व्युत्पन्नस्य घटवदित्युक्त्यैव व्याप्तिस्मृतिसम्भवादिति भावः । अव्युत्पन्नं प्रति कथमित्यतोऽभ्युपेत्यवादेनाह- **न्यूनं वेति** ॥ **असङ्गतमिति** ॥ अनाकाङ्क्षिताभिधानरूपत्वादसङ्गतावन्तर्भवतीत्यर्थः । **आश्रयासिद्धवदिति** ॥ असङ्कीर्णोदाहरणाभावादिति भावः । साध्यसाधनवैकल्ययोर्दोषत्वमुपपादयति- **तत्र साध्यवैकल्य इति** ॥ तत्र तयोर्मध्ये । **विरुद्धमिति** ॥ सर्वसपक्षस्यापि साध्यहीनत्वे विरुद्धं सम्भवतीत्यर्थः । यद्वा साध्यहीनसपक्षे वर्तमानं साध्यवति सपक्षान्तरेऽवर्तमानं पक्षत्रयवृत्तित्वादनैकान्तिकम् । साध्यवति पक्षान्तरेऽवर्तमानं साध्यहीनसपक्ष एव वर्तमानमित्यर्थः। इतिशब्दो दोषतोपपादनसमाप्तौ । यद्वा तर्कताण्डवोक्तरीत्या साध्यवैकल्य इत्यारभ्यैव शङ्का। इतिशब्दो हेत्वर्थः । इति हेतोर्दृष्टान्तदोषो हेत्वाभासेऽन्तर्भवतीति चेदिति। बाधकान्तरमाह- **सपक्षान्तरेति** ॥ पर्वतोऽग्निमान् धूमवत्त्वादयोगोलकवदित्यत्र धूमवत्त्वसाधनस्य महानसादौ साध्यवति वर्तमानस्य परेण दृष्टान्तीकृतेऽयोगोलकेऽसत्त्वेऽपि व्याप्यत्वासिद्धत्वरूपहेत्वाभासत्वायोगाच्चेत्यर्थः । **तथाऽपीति** ॥ पुरुषदोषत्वेऽपि धूमादिरूपार्थस्य व्याप्यत्वासिद्धत्वरूपदोषाभावादिति ॥

॥ इति श्रीप्रमाणपद्धतिभावदीपे श्रीराघवेन्द्रभिक्षुकृतेऽनुमानप्रकरणं समाप्तम् ॥

(वेदे.) अव्याप्त्यभिधानं न दोष इति ।। अवयवनियमाभावादिति भावः । अभ्युपेत्याह- न्यूनं वेति ।। तथाऽप्यर्थदोषाभावादिति ।। वस्तुतस्तु तत्र हेतो-रदृष्टान्तत्वात् तद्दोष एव वाच्यः । तथाचासङ्कीर्णतया दोषत्वात् तत्पार्थक्यं सिद्धमेवेति भावः ।

।। इति श्रीवेदेशतीर्थविरचिते

श्रीमज्जयतीर्थकृतप्रमाणपद्धतेर्भावविवरणेऽनुमानपरिच्छेदः समाप्तः ।।

॥ अथागमपरिच्छेदः ॥

निर्दोषः शब्द आगमः । निरभिधेयत्वेनान्वयाभावेन वाऽबोधकत्वं, विपरीतबोधकत्वं, ज्ञातज्ञापकत्वं, अप्रयोजनत्वं, अनभिमतप्रयोजनत्वं, अशक्यसाधनप्रतिपादनं, लघूपाये सति गुरूपायोपदेशनमित्यादिदोषरहितः शब्द आगमः । निर्दोषं वाक्यमिति वा ॥

(राघ.) क्रमप्राप्तमागमं लक्षयति- **निर्दोष इति** ॥ शब्ददोषोक्तिपूर्वकं निर्दोषशब्दार्थं वदन् समग्रवाक्यार्थमाह- **निरभिधेयत्वेनेत्यादिना** ॥ वाच्यहीनत्वेनेत्यर्थः । कचटतपानां जबगडदत्वादित्यादिशब्दे निरभिधेयत्वेन कुण्डमजाजिनं दश दाडिमानि षडपूपा इत्यादावन्वयाभावेनाबोधकत्वमित्यबोधकत्वमेव दोषः। तत्र चैतद् द्वयं हेतुरिति सूचितम् । विपरीतबोधकत्वं वक्तुरनाप्त्यादिनाऽविद्यमानार्थकबोधकत्वम् । ज्ञातज्ञापकत्वं ज्ञातमात्रज्ञापकत्वं वह्निरनुष्ण इत्यादिवाक्ये । 'काकस्य कति वा दन्ताः' इत्यादाविवाप्रयोजकत्वम् । विरक्तस्य वाणिज्योपदेश इवानभिमतप्रयोजनकत्वम् । हिमाचले सञ्जीविन्युपदेश इवाशक्यसाधनप्रतिपादनम् । पिपासुं दाक्षिणात्यं प्रति गङ्गातीरे कूपखननोपदेश इव लघूपाये गुरूपायोपदेशनम् । आदिपदेनातिव्यवहितान्वयित्वातिदुर्बोधकपदवाक्योपेतत्वादिग्रहः । प्रमाणलक्षणोक्त्यनुरोधेनैकं लक्षणमुक्त्वा 'आगमो दुष्टवाक्यं च' इति तत्त्वनिर्णयोक्तब्रह्मतर्कवाक्यानुसारेण लक्षणान्तरं पदवाक्यादिस्वरूपप्रकाशनायाह- **निर्दोषवाक्यमिति वेति** ॥ आगम इत्यनुषङ्गः ॥

(वेदे.)क्रमप्राप्तमागमं लक्षयति- **निर्दोषेति** ॥ निर्दोषपदव्यावर्त्यदोषान् दर्शयन् लक्षणवाक्यं व्याख्याति- **निरभिधेयत्वेनेत्यादिना** ॥ अबोधकत्वे निमित्तप्रदर्शनार्थमुक्तं निरभिधेयत्वेनान्वयाभावेनेति । इदमुपलक्षणम् । आकाङ्क्षाऽऽसत्त्यभावाभ्यामप्यबोधकत्वं द्रष्टव्यम् । अत्र निरभिधेयत्वेन

जबगडदेत्यादौ, अन्वयाभावेन कुण्डमजाजिनमित्यादौ, आकाङ्क्षाभावेनायमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ वा, आसत्त्यभावेन विलम्बेनोच्चारिते गामानये-त्यादौ अबोधकत्वं प्रसिद्धमिति द्रष्टव्यम्। विपरीतबोधकत्वादौ योग्यतातात्पर्य-भ्रमादिकं निमित्तमिति प्रसिद्धत्वान्नोक्तम्। विपरीतबोधकत्वं च जगन्मिथ्येत्यादि प्रतिवादिवाक्ये द्रष्टव्यम्। ज्ञातज्ञापकत्वं नाम येन योऽर्थः प्रत्यक्षादिना निर्णीतस्तं प्रति तद्बोधकत्वं विवक्षितम्। ततश्च तस्यान्यं प्रति सार्थक्येऽपि तं प्रति दोष-त्वम्। अप्रयोजकत्वं तु सर्वथा प्रयोजनशून्यत्वमतोऽनयोर्भेद इति द्रष्टव्यम्। नच बहुप्रमाणसंवादश्च दार्ढ्यहेतोरेवेत्युक्तत्वेन कथं ज्ञातताज्ञापकत्वं दोष इति वाच्यम्। पूर्वप्रवृत्तप्रमाणेनाप्रामाण्यशङ्काकलङ्कितेनार्थानिर्णये उत्तरोत्तरप्रवृत्त-प्रमाणानां तन्निर्णायकत्वेन दार्ढ्यहेतुत्वस्य तदर्थत्वात्। अत्रच निर्णीतज्ञापकत्व-मेव दोषत्वेन विवक्षितमित्युक्तत्वात्। इदञ्च दोषद्वयं क्रमेण स्फीतालोकमध्य-वर्तिघटप्रतिपादकवाक्ये काकदन्तपरीक्षावाक्ये च प्रसिद्धम्। अनभिमतप्रयोज-कत्वादिकं तु क्रमेण विरक्तं प्रति वाणिज्योपदेशे, रोगार्तं प्रति मृतिहरहिम-महीधरोत्तरसानुसिद्धसञ्जीवनीकथने, सुरसरित्तटे निविष्टं तृषितं प्रति कूप-खननोपदेशे च द्रष्टव्यम्। आदिपदेन च भ्रान्तप्रतारकोक्तत्वसङ्ग्रहः। न तात्पर्यविषयत्वाभावस्य। विपरीतबोधकोक्त्यैव प्राप्तत्वात्। तात्पर्याविषय-प्रतिपादकत्वे हि वाक्यस्य विपरीतबोधकत्वमेव भवति।

शब्दः पदवाक्यात्मको नतु वाक्यात्मक एव। सिद्धान्ते वैदिकानामपि पदानां महायोगवृत्त्या भगवति प्रामाण्यस्योक्तत्वात्। नच यौगिकपदानामपि प्रकृतिप्रत्ययविभागेन च संसर्गबोधकतया वाक्यात्मतैवेति वाच्यम्। तथाऽपि पदसमुदायरूपवाक्यात्मकत्वाभावात्। तथाचात्र लक्षणे पदवाक्योभयविधोऽपि शब्दो लक्ष्यत्वेन विवक्षितः। अत एव पदसमुदायरूपवाक्यमात्रं लक्षीकृत्य प्रवृत्तं यदागमोऽदुष्टवाक्यं चेति ब्रह्मतर्कवाक्योक्तलक्षणं तदनुसारेण शिष्याणां पद-

वाक्यादिस्वरूपज्ञापनाय लक्षणान्तरमाह- **निर्दोषमिति** ॥ केचित्त्वाकाङ्क्षा-देर्दोषाभावत्वेनोपयोगाभावाल्लक्षणान्तरमाहेत्याहुः ॥

विभक्त्यन्ता वर्णाः पदम्। आकाङ्क्षासन्निधियोग्यतावतां पदानां समूहो वाक्यम्। आकाङ्क्षा जिज्ञासा। सा चेतनधर्मः। तद्विषयत्वा-दर्थाः साकाङ्क्षाः। तत्प्रतिपादकत्वात् पदान्यपि। सन्निधिरविलम्बे-नोच्चरितत्वं पदधर्म एव। प्रतीतान्वयस्य प्रमाणविरोधाभावो योग्यता पदार्थधर्मः। तद्वाचकत्वात् पदान्यपि योग्यतावन्तीत्युच्यन्ते। तत्र पदत्वेन निरभिधेयत्वस्य, आकाङ्क्षासन्निधिभ्यामन्वयाभावस्य, योग्यतया विपरीतबोधकत्वस्य च निरासे सत्यशेषदोषनिरासार्थं निर्दोषग्रहणम् ॥

(राघ.) वाक्यस्वरूपं विवक्षुस्तदुपयुक्तमाह- **विभक्त्यन्ता इति** ॥ वर्णा इति बहुवचनमतन्त्रम्। तेन 'अ इति ब्रह्म' 'कश्छन्दसां योगमावेद धीरः' इत्यादौ क इत्यादेः पदत्वसिद्धिः। विभक्त्यन्ता इति व्यधिकरणबहुव्रीहिः। विभक्तिर्नाम सुप्तिङौ। 'विभक्तिश्च' सुप्तिङौ विभक्तिसञ्ज्ञौ भवत इति वैयाकरणोक्तेः। सुप्तिङन्तं पदमिति पाणिन्युक्तेः। तदनुरोधाद्विभक्त्यन्ता इत्युक्तम्। विभक्त्यन्तत्वस्य वर्णाव्यभिचारेऽपि वर्णा इत्युक्तिः स्पष्टार्थं वा। स्फोटनिरासाय वेति ज्ञेयम्। केचित्तु देवदत्त इत्यादावन्तिमवर्णस्य विभक्त्यन्ततया पूर्वेषां तदभावाद् विभक्त्यन्तवर्णोपेतं पदमित्यर्थलाभाय वर्णा इत्युक्तिरित्याहुः। विभक्त्यन्तं पदमिति लक्षणोक्त्या समस्तपदकदम्बस्यापि राजपुरुष इत्यादेः पदत्व-सिद्धिः। समासस्थलेऽवयवविभक्तेर्लोपेन समुदायादेव विभक्त्युत्पत्त्या समु-दायस्य विभक्त्यन्तत्वात्। तेन 'अवाच्यं निर्विशेषम्' इत्यादिपदवाच्यत्वाद्

ब्रह्मणोऽवाच्यत्वासिद्धिरित्याद्युक्तिर्युक्तेति ज्ञेयम्। पदानामिति बहुवचनमतन्त्रम्। तेन गामानयेत्यादेरपि वाक्यत्वसिद्धिः।

यत्पदार्थज्ञाने सति पदान्तरार्थविषयिणी जिज्ञासा भवति तद्वाचकयोः पदयोस्तादृशजिज्ञासाविषयार्थविषयकत्वं साकाङ्क्षत्वमित्याह- **जिज्ञासेत्यादिना॥ पदान्यपीति॥** साकाङ्क्षाणीति योज्यम्। वाक्यशरीरप्रविष्टविशेषणानां कृत्यान्याह- **तत्रेति॥** वाक्यलक्षण इत्यर्थः। **पदत्वेनेति॥** पदानामिति विशेषणोक्त्येत्यर्थः। सुप्तिङ्रूपविभक्त्यन्तत्वस्य 'ङ्याप्प्रातिपदिकात्' इति प्रातिपदिकाधीनत्वात्। प्रातिपदिकसञ्ज्ञायाश्च 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यर्थवत एव विधानात् तेन तन्निरास इति भावः। **अशेषेति॥** ज्ञातज्ञापकत्वादिप्रागुक्ताशेषदोषेत्यर्थः॥

(वेदे.) पदघटितत्वेन वाक्यं लक्षयितुं तावत् पदलक्षणमाह- **विभक्तीति॥** जातौ चेदं बहुवचनम्। अतो न वर्णद्वयात्मकपदेऽव्याप्तिरिति ध्येयम्। जबगडदेत्यादिवर्णसमूहेऽतिव्याप्तिवारणाय विभक्त्यन्ता इति। विभक्त्यन्ते पर्वतोऽग्निमानित्यादिवाक्येऽतिव्याप्तिवारणाय वर्णा इति। तत्रच वर्णानां पदत्वेन प्रवेशोऽपि न वर्णत्वेन प्रवेशोऽतस्तेन तद्व्यावृत्तिरिति ध्येयम्। आकाङ्क्षापदार्थमाह- **आकाङ्क्षेति॥** कथं तर्ह्यर्थे पदे च साकाङ्क्षत्वमित्यत आह- **तद्विषयत्वादित्यादिना॥ तद्विषयत्वात्** तद्विषयीभूतज्ञानविषयत्वादित्यर्थः। एवञ्चार्थानां परस्परज्ञानजन्यजिज्ञासाविषयज्ञानविषयत्वेनैव साकाङ्क्षत्वमित्युक्तं भवति। **तत्प्रतिपादकत्वादिति॥** स्वप्रयोज्यजिज्ञासाविषयज्ञानजनकत्वादित्यर्थः। यत्पदप्रयोज्यजिज्ञासाविषयत्वयोग्यज्ञानाजनकतावच्छेदकरूपवत्त्वं यस्य तेन सह तस्य तद्रूपमेवाकाङ्क्षेति यावत्। भवति हि घटमानयेत्यत्र घटमितिप्रकारकपदप्रयोज्या या जिज्ञासा तस्या विषयत्वयोग्यं यत् क्रियाज्ञानं तज्जनकं यदानयेति क्रियापदं तन्निष्ठजनकतावच्छेदकं क्रियापदत्वं तत्राकाङ्क्षा। एवं कारकपदेऽपि

कारकपदत्वमेवाकाङ्क्षेति द्रष्टव्यम्। इयञ्च जिज्ञासायोग्यताऽजिज्ञासितेऽप्यस्तीति नातिव्याप्तिः। नच तथाऽपि जिज्ञासायोग्यज्ञानजनकत्वं फलोपधानरूपमेवास्तु किं तदवच्छेदकरूपवत्त्वलक्षणयोग्यताविवक्षयेति वाच्यम्। तथात्वेऽन्वयबोधात् प्रागाकाङ्क्षाभावप्रसङ्गात्। **पदान्यपीति** ॥ साकाङ्क्षाणीत्युपचर्यन्त इत्यर्थः। एवमर्थाः साकाङ्क्षा इत्यत्रापि द्रष्टव्यम्। तद्विषयत्वात् तत्प्रतिपादकत्वादिति च शक्यसम्बन्धप्रदर्शनपरमित्यवधेयम्। **अविलम्बेनेति** ॥ अव्यवधानेनेत्यर्थः। इदं व्यवधानत उच्चारितेषु गामानयेत्यादिपदेष्वतिव्याप्तिवारणाय।

नन्विदमनुपपन्नम्। मौनिश्लोके तत्कृतलिप्यनुमिते उच्चारणाभावेनाव्यापकत्वात्। नचैवमव्यवहितपदलिपिरेवासत्तिरस्त्विति वाच्यम्। लिपेरप्युच्चारणस्थले अभावेनासार्वत्रिकत्वात्। किञ्चैवं सत्याप्तेन व्यवहिततयोच्चारिते कुलकादौ योजनयाऽन्वयबोधो न स्यात्। अथाव्यवहितत्वेन पदतात्पर्यमासात्तिरिति विवक्षितमिति चेन्न। शुकबालादिवाक्येऽव्याप्तेः। 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यनासन्नोदाहरणेऽतिव्याप्तेश्च। तत्राप्यव्यवहिततात्पर्यकत्वसम्भवात्। तस्मात् किमेतदिति चेदुच्यते। उच्चरितपदेन पदोपस्थित्यनुकूलवक्तृव्यापारमात्रं विवक्षितम्। अव्यवधानपदेन च निष्फलान्वयबोधविरोधिव्यवधानाभावोऽभिप्रेतः। एवञ्च वक्तृव्यापारत्वं लिप्युच्चारणेऽपि साधारणमिति न मौनिश्लोकादावतिव्याप्तिः। आप्तोक्तकुलकादौ व्यवहिततयोच्चारणेऽप्यव्यवहिततात्पर्यरूपस्य, मौनिश्लोके लिपिरूपस्य, शुकादिवाक्ये चोच्चारणरूपस्य वक्तृव्यापारस्य सत्त्वात्। नाप्यनासन्नोदाहरणेऽतिव्याप्तिः। तत्र व्यवधानस्य निष्फलत्वात्। कुलकादौ च छन्दःसंरक्षणायालङ्काररसविशेषोदयाय च व्यवधानस्य वक्त्रा क्रियमाणत्वात्। गिरिर्भुक्तमित्यादौ च तादृशफलादर्शनात्। नापि प्रहरादिव्यवधानेनोच्चारिते गामानयेत्यादिपदसमूहेऽतिव्याप्तिः। तत्र प्रकृतान्वयबोधविरोधिभिः स्वस्वफलैरन्यैर्व्यवधानात्। एवञ्च निष्फलान्वयबोधविरोध्यव्यवहितवक्तृव्यापारविषयत्वमेव सन्निधिशब्दार्थ इति न कोऽपि दोष इति।

ननूक्तेऽर्थे आकाङ्क्षासत्तिलक्षणे प्रमाणलक्षणटीकोदाहृतेऽनाकाङ्क्षितेऽसन्निहिते च विरक्तं प्रति वाणिज्योपदेशे चोलेषु वर्तमानं तृषितं प्रति 'सन्ति सुरसरिति शीतलानि जलानि' इत्युपदेशे च क्रमेणातिव्याप्तिरिति चेन्न। अत्र तयोरप्युक्तलक्षणलक्ष्यत्वस्याभिप्रेतत्वात्। न चैवं विरोधः। उक्तोदाहरणयोरागमलक्षणव्यावृत्तत्वस्योभयत्राप्यभिप्रेतत्वात्। इयांस्तु विशेषः। तत्रोक्तोदाहरणद्वये वाक्यस्वरूपान्तर्गताऽऽकाङ्क्षासत्त्योः क्रमेणाभावेनावाक्यतया वाक्यपदेन तद्व्यावृत्तिः सम्पादिता। श्रोतुराकाङ्क्षाभिधायकत्वे सति पूर्वपदसञ्जाताकाङ्क्षापूर्वकत्वमाकाङ्क्षा, सन्निहितार्थाभिधायकत्वे सत्यविलम्बेनोच्चारितत्वं च सन्निहितत्वमित्याकाङ्क्षासत्तिलक्षणयोरुक्तत्वात्। अत्र पुनस्तदुदाहरणद्वये वाक्यत्वप्रसिद्ध्यविरोधेन वाक्यतामङ्गीकृत्य निर्दोषत्वविशेषणेनैव तद्व्यावृत्तिः कृतेति। अत एव वक्ष्यति- आकाङ्क्षासन्निधिभ्यामन्वयाभावस्येत्यन्वयाभावस्यैव व्यावर्त्यत्वं नतूक्तोदाहरणद्वयस्य।

नन्वेवमबोधकत्वविपरीतबोधकत्वानन्वितत्वदोषाणां वाक्यपदार्थासत्त्याकाङ्क्षादिनैव परिहारे निर्दोषत्वविशेषणं व्यर्थमित्याशङ्क्य परिहरति- **तत्रेति**॥ **पदत्वेनेति**॥ विभक्त्यन्तस्य निरभिधेयत्वासम्भवादिति भावः। पद्यतेऽनेनेति व्युत्पत्त्या पदशब्देन साभिधेयत्वस्यैव प्राप्तेरिति वा। **अशेषदोषेति**॥ तद्व्यतिरिक्तज्ञातज्ञापकत्वाद्यशेषदोष इत्यर्थः॥

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितं वाच्यवाचकभावसम्बन्धग्रहणसंस्कारानुगृहीतमन्त्यवर्णसन्निकृष्टं श्रोत्रमनेकेष्वपि वर्णेष्वेकां पदबुद्धिं जनयति। तथा पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतमन्त्यपदविषयं श्रोत्रमनेकेषु पदेष्वेकां वाक्यबुद्धिमाकाङ्क्षाद्यनुसारेण जनयति। तेन वर्णानां पदानां च सहानवस्थितप्रतीतीनामपि समुदायो युज्यते॥

(राघ.) ननु व्याप्तानां वर्णानां कथं मेलनेन पदत्वम्। पदानां वा कथं समूहीकरणमित्यत आह- **पूर्वपूर्वेति**॥ अर्थवत्त्वज्ञानं विनेदं पदमित्यनुत्पत्तेः अर्थवत्त्वज्ञानायोक्तं वाच्यवाचकेत्यादिविशेषणम्। तेन कचटतपेत्यादावुक्तसामग्रीसत्त्वेऽपि पदत्वबुद्धेरभावाद् व्यभिचार इति निरस्तम्। तत्र सङ्केतग्रहणसंस्कारानुग्रहाभावादिति। एवमनाकाङ्क्षादिपदकदम्बे पूर्वपदेत्यादिनोक्तकारणकलापे सत्यपि न वाक्यत्वबुद्धिरिति चोद्यनिरासायाकाङ्क्षाद्यनुसारेणेत्युक्तम्। एवमेकबुद्धिविषयतोपपादनेन फलितमाह- **तेनेति**॥ एकबुद्धिविषयतोपपादनेनेत्यर्थः। सहानवस्थितप्रतीतीनामिति बहुव्रीहिः। क्रमेणोत्पन्नप्रतीतिविषयाणामित्यर्थः॥

(वेदे.) ननु क्रमविशेषविशिष्टवर्णसमूहस्य पदत्वं वाच्यम्। नच नित्येषु व्याप्तेषु च वर्णेषु कालतो देशतो वा स्वतः क्रमः सम्भवति। अतः प्रतीतिक्रमेणैव तेषु क्रमो वक्तव्यः। नचैवं समुदाये सम्भवति। प्रतीतीनामाशुतरविनाशित्वेन मेलनासम्भवात्। अतो वर्णेषु पदत्वमेव ज्ञातुमशक्यम्। कुतस्तद्घटितं वाक्यत्वमित्याशङ्कायां तावत् पदत्वबुद्धिमुपपादयति- **पूर्वपूर्वेति**॥ अव्युत्पन्नस्यान्त्यवर्णश्रवणेऽपि पदत्वबुद्धेरभावादाह- **वाच्यवाचकेति**॥ गौरश्व इत्यादावन्त्यपदश्रवणेऽपि वाक्यत्वबुद्धेरभावादाह- **आकाङ्क्षाद्यनुसारेणेति**॥ **समुदायो युज्यत इति**। प्रत्येकं वर्णपदप्रतीतीनामुक्तरीत्या मेलनासम्भवेऽपि प्रत्यभिज्ञास्थल इव श्रोत्रमन्त्यवर्णपदसम्बद्धं पूर्ववर्णसंस्कारसहकृतं तावद् वर्णपदविषयकमेकं समूहालम्बनप्रत्यक्षरूपं ज्ञानं जनयति। तथाचैकज्ञानविषयत्वेन तेषु समुदायो युज्यत इति भावः। नचैवं क्रमानुपपत्तिः। संवृतेष्वमुक्तज्ञानेनावगाहनात्। यत्तु सुधायामेकस्मृत्युपारूढानामित्युक्तं तन्मतान्तराभिप्रायेण। वर्णानुभवाहितसंस्कारानन्तरं तावद्विषयकैकसमूहालम्बनस्मृत्याऽपि पदत्वादिबुद्ध्युपपत्तिरिति स्वमत एव प्रकारान्तरमिति ध्येयम्॥

पदानां कुत्र शक्तिः ?

आगमोऽपि सम्यक् श्रुतः समयस्मरणानुगृहीतः शाब्दन्यायानुसन्धानसहित एव स्वार्थस्य बोधको नतु सत्तामात्रेण ।

जातिरेव वाच्या पदानां व्यक्तयस्तु लक्ष्या इति भाट्टाः । जातिविशिष्टा व्यक्तयो वाच्या इति वैशेषिकाः । क्वचिज्जातिः क्वचिद् व्यक्तिरिति वैयाकरणाः । क्वचिज्जातिः क्वचिद् व्यक्तिः क्वचिदाकृतिरिति नैयायिकाः । अन्यापोह इति बौद्धाः । व्यक्तय एव वाच्याः समयप्रतिपत्तौ तु सादृश्यमुधानमित्याचार्याः ॥

(राघ.) ननु कथमस्य वाक्यस्य यथार्थज्ञानसाधनत्वेनानुप्रमाणता । परेण तादृशवाक्योच्चारणे कृतेऽपि व्यासक्तस्य बधिरादेश्च तथासङ्केतानभिज्ञस्य प्रकरणानभिज्ञस्य च बोधाजननादित्यत आह- **आगमोऽपीति** ॥ न केवलमुपपत्तिरित्यपेरर्थः । न सत्तामात्रेण बोधक इत्यन्वयः । तस्य सहकारिण आह- **सम्यगित्यादिना** ॥

पूर्वं योग्यता पदार्थधर्म इत्युक्तम् । पदार्थस्वरूपं स्वाभिमतं विवक्षुः पराभिमतांस्तावदनुवदति- **जातिरेवेति** ॥ **क्वचिज्जातिरिति** ॥ एको व्रीहिरेके व्रीहय इत्यादौ । 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इत्युक्तेः । **क्वचिदिति** ॥ घटा, वृक्षा इत्याद्येकशेषस्थले । सरूपाणामेकशेष इत्युक्तेः । **क्वचिज्जातिरिति** ॥ गौर्नित्येत्यादौ । क्वचिद् 'घटोऽनित्यः' इत्यादौ व्यक्तिः । पिष्टमयी गौरित्यादौ आकृतिरित्यर्थः। **अन्यापोहः** अन्यव्यावृत्तिः । घट इत्यत्र घटशब्दार्थोऽघटव्यावृत्तिरित्यर्थः । **व्यक्तय एवेति** ॥ परस्परव्यावृत्तघटत्वादितत्तन्निष्ठा-साधारणधर्मविशिष्टा व्यक्तय इत्यर्थः । एवकारोऽनुगतजाति-

निरासार्थः। प्राग् जातिपदेन तादृशधर्मस्यैव प्रस्तुतत्वात्। नन्वनुगतजात्यभावे व्यक्तीनामानन्त्येन सङ्केतग्रहायोग इत्यत आह- **समयप्रतिपत्ताविति**॥ सादृश्यम् **उपधानम्** उपाधिः। निमित्तमिति यावत्। चक्षुस्सन्निकृष्टे पुरोवृत्तिगोपिण्डादौ विद्यमानेनातीतानागतसर्वगोप्रतियोगिकेन सादृश्येन स्वप्रतियोगिष्वनन्तगवादिषु प्रतियोगितासम्बन्धेनोपस्थापितेषु गोपदशक्तिग्रहसम्भवादिति। यथा परमते पुरोवृत्तिनिष्ठगोत्वजात्या स्वविशेषणतासम्बन्धेन सर्वगोपिण्डेषूपस्थापितेषु गोपदशक्तिग्रहस्तद्वदिति भावः। विस्तरस्तु तर्कताण्डवे। **इत्याचार्या इति**॥

'इति व्युत्पत्तिरपि हि तादृशेनैव गम्यते।'

इत्यनुव्याख्यानोक्तेरिति भावः॥

(**वेदे.**) नन्वागमस्य श्रवणत्वेऽपि पदाश्राविणः, श्रवणेऽप्यगृहीतसङ्गतिकस्य, विस्मृतसङ्गतिकस्य वा सङ्गतिग्रहेऽप्युपक्रमादिशब्दन्यायानुसन्धानरहितस्य पुंसः प्रमापकत्वाभावात् कथं प्रामाण्यमित्यत आह- **आगमोऽपीति**॥ न सत्तामात्रेणेत्युपलक्षणम्। न श्रवणमात्रेणेत्यादि द्रष्टव्यम्। समयस्मरणानुगृहीत इत्यत्र पदशक्तिग्रहस्य सहकारित्वमुक्तम्। तद्विषयं स्वमते निर्धारयितुं तावद्धेयताज्ञापनायातिरोहितदोषाणि मतान्तराण्यनुवदति- **जातिरेवेत्यादिना**॥ जातेरेकत्वादुपदेशादिना तत्र शक्तिग्रह उपपद्यते। व्यक्तीनामनन्तत्वेन प्रतिव्यक्तिशक्तिग्रहासम्भवादपूर्वव्यक्तिव्यवहाराद्यनुपपत्तेः। कतिपयव्यक्तिष्वेव च शक्तिग्रहेऽपूर्वव्यक्तिव्यवहारादेर्नियामकाभावेन व्यभिचारित्वात्। तस्मात् जातिरेव वाच्या। तस्याश्चानयनाद्यनुपपत्त्या तदाश्रयीभूता व्यक्तिर्लक्ष्यत एवेति भावः। अत्र शक्तिग्राहकवृद्धव्यवहारादेः व्यक्तावेवोपलम्भेन तत्रैव शक्तिग्रहकल्पना युक्ता। न जातौ। कदाऽपि वृद्धव्यवहाराद्यदर्शनात्। अनुगतजात्यनुपपत्तेर्वक्ष्यमाणत्वात्। आनन्त्यव्यभिचारयोश्च निरसिष्यमाणत्वात्। गामानये-

त्यादौ[1] मुख्यार्थानुपपत्त्यभावेन लक्षणयाऽपि व्यक्तिलाभासम्भवाच्चेत्यादिदोषो द्रष्टव्यः। **जातिविशिष्टा इति**॥ अन्यथाऽऽनन्त्यव्यभिचारयोः प्रसङ्ग इति भावः। अत्रापि प्रष्टव्यम्। किं जातिविशिष्टमेकमेव शक्यं प्रवृत्तिनिमित्तं तु विशिष्टत्वमिति किंवा व्यक्तिरेव शक्त्या जातिस्तु प्रवृत्तिनिमित्तमिति। आद्ये विशिष्टस्याप्यानन्त्येन विशिष्टत्वस्य चाजातित्वेनानुगतत्वासम्भवादानन्त्य-व्यभिचारतादवस्थ्यम्। शब्दात् व्यक्तिविशेष्यकजातिप्रकारकबोधस्यैवानुभवेन विशिष्टविशेष्यकविशिष्टत्वप्रकारकबोधापत्तिश्च। द्वितीयेऽप्यसार्वत्रिकत्वम्। आकाशादिपदेषु जात्यादिपदेषु वा प्रवृत्तिनिमित्तजात्यभावात्। तत्र प्रकारान्तर-कल्पनेन द्वैविध्यकल्पनया कल्पनागौरवमित्यादि तत्रास्वरसोऽनतिरोहित इति द्रष्टव्यम्। **क्वचिदिति**॥ गवादिपदेषु जातिः, **क्वचित्** सञ्ज्ञाशब्दादिषु व्यक्तिरि-त्यर्थः। इदमपि द्वैविध्यकल्पने कल्पनागौरवप्रसङ्गेनायुक्तमिति स्फुटमेव। **क्वचिज्जातिरिति**॥ जात्यादिपदेष्वित्यर्थः। तत्र जात्यन्तराभावेन तद्विशिष्टानु-पपत्त्या जातेरेव वाच्यत्वात्। **क्वचित्** आकाशव्यक्त्यादिपदेषु। तत्रैकव्यक्ति-त्वेनाकाशत्वादेः, सत्तया तुल्यत्वेन व्यक्तित्वस्य चाजातित्वेन जातिविशिष्टस्या-वाच्यत्वाद् व्यक्तिरेव वाच्येति भावः। **क्वचित्** आकृत्यादिपदेषु। पृथिवीत्वादिना साङ्कर्येणाकृतित्वस्याजातितया तद्विशिष्टासम्भवेनाकृतेरेव तत्र वाच्यत्वमिति भावः। इदमुपलक्षणम्। क्वचिद् गवादिपदेषु जात्याकृतिविशिष्टव्यक्तिर्वाच्येत्यपि द्रष्टव्यम्। अत्राप्यनेककल्पनया कल्पनागौरवम्। गवादिपदानां त्वाकृतिविशिष्ट-व्यक्तौ शक्त्यङ्गीकारे च वैशेषिकपक्षोक्तविकल्पानुपपत्तिरूपदोषापरिहारः। आकृतेरपि गवादिपदवाच्यत्वे सास्नादिमान् गौरित्यत्र सास्नादिमत्पदं पुनरुक्तं स्यादित्याद्यरुचिर्ध्येया। **अन्यापोह इति**॥ अतद्व्यावृत्तिरित्यर्थः। अत्राप्य-तद्व्यावृत्तेरनुगतत्वे किं सामान्येन गौरित्यादिविधिमुखप्रत्ययवेद्येन व्यावृत्ति-

---

१. 'गौरस्तीत्यादौ' इति भाव्यम्।

प्रयोजकतयाऽऽवश्यकेनापराद्धम्। अननुगतत्वे त्वानन्त्यव्यभिचारापरिहार उभयत्र गौरवं चेत्यनभिमतिर्बीजमूह्यम्। इदानीं स्वमतमाह- **व्यक्तय एवेति**॥ द्रव्यगुणक्रियाजात्यादिकं तु विशेषणभूतं प्रवृत्तिनिमित्तमिति शेषः। अत्रावधारणेन विशेष्यभूतानां व्यक्तीनामेव शक्यत्वात् पदवाच्यत्वम्। प्रवृत्तिनिमित्तानां तु शक्तिं प्रति विषयतया भासमानत्वेऽपि न शक्यत्वमिति सूचयति। उक्तञ्च सुधायां 'ते ते व्यावृत्ताकारा एव तैस्तैर्व्यावृत्तैर्द्रव्यगुणकर्मसामान्यैर्निमित्तैस्तत्तच्छब्दवाच्याः' इति। नच विशेष्यवद् विशेषणानामपि शक्तिं प्रति विषयतया भासमानत्वे शक्यत्वमस्त्विति वाच्यम्। शक्तिं प्रति विषयतया भासमानं यद् विशेष्यं तस्यैव शक्यशब्दार्थत्वात्। अन्यथा विशेषणानामपि शक्यत्वेन तेषु शक्यवृत्तित्वा-सम्भवेन शक्यतावच्छेदकत्वरूपप्रवृत्तिनिमित्ततायोगात्। विशेष्यमात्रस्य शक्यत्वे तु विशेषणानां तदनतिरिक्तवृत्तित्वेन शक्यतावच्छेदकत्वोपपत्तेः। नचैवं शब्दाद् विशेषाणां प्रतीतिर्न स्यादिति वाच्यम्। शक्यत्ववत् तदवच्छेदकत्वस्यापि शाब्दधीविषयत्वे तन्त्रत्वात्। कथमन्यथा परमते आकाशादिपदाशक्यस्य शब्दाश्रयत्वस्य धीः॥

॥ वाक्येऽन्वयवोधोपायनिरूपणम्॥

ननु समयो नाम पदानां पदार्थानां च वाच्यवाचकभावसम्वन्धः। स च सम्बन्धिष्वज्ञातेषु ज्ञातुमशक्य इति पदार्थज्ञानस्य प्रागेव सिद्धत्वात् किमागमस्य प्रयोजनम्। उच्यते। यथा ज्ञातयोरपि धर्मधर्मिणोः संसर्गोऽनुमानेन वोध्यते। तथा ज्ञातानामेव पदार्थाना-मन्वयविशेषस्यागमो वोधकः।

पदानां पदार्थमात्रविपयत्वेनान्वयवोधकं न किञ्चिदस्तीति चेत्। अत्र वर्णपदाभिव्यक्तोऽखण्डः स्फोटाख्यः शव्दोऽन्वयवोधक इति

वैयाकरणा ब्रुवते । वर्णमालेत्यपरे । वाक्यान्त्यो वर्ण इत्यन्ये । पदानां सान्निध्यमिति केचित् । पदैरभिहिताः पदार्था एवाकाङ्क्षादिशालिन इति भाट्टाः । सर्वेषां पक्षाणामप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च पदान्येवान्वितस्वार्थाभिधायीनीति प्रेक्षावन्तः । तत्र प्रत्येकमपि पदानि अन्वयविशेषाभिधानसमर्थानीति प्राभाकराः । प्रत्येकं सामान्यतो योग्येतरान्वितस्वार्थाभिधानशक्तीनि पदानि पदान्तरसन्निधानाहितशक्त्यन्तराणि विशेषतोऽप्यन्वितान् स्वार्थानभिदधति । तथाऽनुभवादित्याचार्याः ॥

(राघ.) पदानामर्था एवागमार्थ इति मत्वा शङ्कते- **नन्विति** ॥ पदार्थेभ्योऽन्योऽस्त्यागमार्थ इति सदृष्यान्तं प्रतिज्ञापूर्वमाह- **उच्यत इत्यादिना** ॥ **अन्वयविशेषस्य** क्रियाकारकादिरूपान्वयविशेषस्येत्यर्थः । अन्वयसामान्यस्यापि पदार्थस्येव पदेनैव पदान्येवेत्यादिना वक्ष्यमाणदिशा बोध्यत्वादन्वयविशेषस्येत्युक्तम् । घटकर्मकमानयनमित्यादिरूपविशेषस्य पदकदम्बकरूपागमो बोधक इत्यर्थः । आगमस्यान्वयविशेषबोधकत्वेनोक्तं सार्थक्यमयुक्तमिति शङ्कते- **पदानामिति** ॥ इति चेच्छङ्कसे । **अत्र** त्वच्छङ्कितार्थविषय इत्यर्थः । वर्णमालेत्यादावन्वयविशेषबोधिकेत्यादिरूपेण यथायोगमनुषज्यते । स्मर्यमाणा वर्णमालेत्यर्थः । **अप्रामाणिकत्वात्** प्रमाणविरुद्धत्वादिति । पदानामेव सामान्यतो योग्येतरान्वितस्वार्थबोधकत्वस्य सर्वानुभवसिद्धत्वात् स्फोटादिनाऽन्वयबोधस्यानानुभाविकत्वादिति भावः । स्फुटीकृतमेतद्धेतुद्वयम्

'शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते ।
अतोऽन्विताभिधायित्वं गौरवं कल्पनेऽन्यथा ॥'

इति जिज्ञासाधिकरणानुव्याख्यानस्थचतुर्थपादव्याख्यानावसरे सुधायाम् । प्रपञ्चितं

च तर्कताण्डवेऽन्विताभिधानवादे। **तत्रेति**। पदान्येवान्वितस्वार्थाभिधायीनीत्युक्तार्थविषये प्राभाकरा इत्याहुरित्यर्थः। पदान्तरसन्निधानाहितशक्त्यन्तराणीति बहुव्रीहिः। व्याख्यातमेतद्वाक्यं तर्कताण्डवे। पदान्तरसन्निधानमेवाहितशक्त्यन्तरं लब्धसहकार्यन्तरमेषामित्यर्थः। ननु पदान्तरसन्निधानेनाहितं शक्त्यन्तरमाधेयशक्तिर्येषामित्यर्थः। शक्तिद्वयाङ्गीकारे गौरवात्। 'पदान्तरसमभिव्याहारो हि सामान्यस्य विशेषपर्यवसानहेतुः। न पुनरविद्यमानशक्त्याधाने हेतुः' इति सुधाविरोधश्चेति। **इत्याचार्या इति**॥

'अतः सामान्यतो ज्ञातः पदान्तरबलात् पुनः।
भवेद्विशेषतो ज्ञातस्तेन स्यादन्वितोक्तिता॥'

इत्यादिभक्तिपादीयानुव्याख्यानोक्तेःर्युक्तिरपि तत्रैव ज्ञेयेति भावः॥

(वेदे.) ननु त्वन्मतेऽपि शक्तिग्रहकाले सर्वगोव्यक्त्युपस्थित्यसम्भवात् कथं गोशब्दस्य सर्वगोव्यक्त्युपसंहारेण शक्तिग्रहः। अनुगतसामान्यस्यानङ्गीकारात्। आनन्त्यव्यभिचारपरिहारोपायानुपन्यासाच्चानुपपत्तिरवशिष्टेत्यत आह-**समयेति**॥ 'व्युत्पत्तिरपि हि सादृश्येनैव गम्यते' इति तदुक्तेरिति भावः। उपधानं लिङ्गं न शब्दशक्तिविषयतया प्रवृत्तिनिमित्तम्। यथा गन्धवत्त्वं पृथिवीपदप्रवृत्तिनिमित्तमपि न तद्वाच्यत्वेन लिङ्गमित्यर्थः। एवञ्च न युगपदेव सर्वत्र शक्तिग्रहः। येन सर्वव्यक्त्युपस्थितिरपेक्षिता स्यात्। किन्तु सन्निकृष्टव्यक्तिषूपदेशादिनैव शक्तिग्रहेऽनन्तरमसन्निकृष्टव्यक्तिष्वनुमानेनैव शक्तिग्रह इति भावः। अस्ति तावत् सादृश्यं नाम पदार्थान्तरमखण्डं प्रत्यक्षादिसिद्धम्। सङ्गतिग्रहणोपायाश्चानेके। तत्र यदा परोपदेशेन व्युत्पत्तिस्तदाऽयं गौरित्युपदेशवाक्यं व्याप्तिग्राहकतयोपयुज्यते। वक्तृश्रोत्रोः सर्वत्र व्युत्पत्तिकामत्वेनोक्तवाक्यस्यायमेतत्सदृशाः सर्वेऽपि गोशब्दवाच्या इत्यर्थकत्वात्। यदा तु व्यवहारो व्युत्पाद्यते तदाऽपि भूयोव्यवहारादिदर्शनेन सादृश्यव्याप्यतावगमो भवति। ततश्चैतद्वाक्यादिना त्ववगत-

व्याप्तिः पिण्डान्तरदर्शनेऽनुमिनोति- अयं गोशब्दवाच्यो भवितुमर्हति। तत्सदृशत्वादिति। आगमगम्यव्याप्तौ दृष्टान्तनियमाभावान्न दृष्टान्ताभावदोषः। नच गवये व्यभिचारः। सास्नादिमत्त्वप्रयुक्तान्तरङ्गसादृश्यस्यैव लिङ्गत्वात्। अन्यथा परमते उपमितौ गोसदृशपश्चितरस्यापि गवयशब्दवाच्यताधीः स्यादिति सुधानुसारेण व्याख्येयम्।

ननु तथाऽपि सर्वव्यक्त्युपस्थित्युपायानिरूपणेन सर्वोपसंहारेण व्याप्तिग्रहानुपपत्त्याऽनुमानेनापि शक्तिग्रहोऽनुपपन्न एवेति चेत्। सामान्याकारेण सर्वव्यक्त्युपस्थितेः साक्षिरूपत्वेन प्राणभृन्मात्रसिद्धत्वात्। तदुक्तमनुव्याख्याने।

'अतः सर्वे पदार्थाश्च सामान्यात् साक्षिगोचराः'

इति। यद्वा सादृश्यमुपधानं प्रत्यासत्तिरित्यर्थः। एवञ्च यथा परमते सामान्यप्रत्यासत्त्याऽशेषगोव्यक्त्युपस्थितौ तासु गोपदशक्तिग्रहस्तथाऽस्मन्मतेऽप्युपदेशव्यवहारादिना शक्तिग्रहकाले उपस्थितगोव्यक्तिविशेषधर्मिकातीतानागतसकलगोव्यक्तिप्रतियोगिकसादृश्यप्रत्यासत्तिकेन्द्रियेणैव सकलगोव्यक्त्युपस्थितिसम्भवेन तत्र शक्तिग्रहोपपत्तिः। इयांस्तु भेदः। त्वन्मते जातिरतीताद्याश्रिता। मन्मते तु सादृश्यं ध्वंसादिवत् प्रतियोगित्वेन तत्सम्बद्धमिति। युक्तं च तदनाश्रितत्वेऽपि संस्कारवत् प्रत्यासत्तित्वेन तदुपस्थापकत्वम्। नच सादृश्यप्रतियोगित्वं व्यक्तिषु नानेति वाच्यम्। तवापि गोत्वसमवायस्याश्वादावपि सत्त्वेनाधारत्वमात्रस्य कालेऽपि सत्त्वेन स्वरूपसम्बन्धिविशेषाणामेव तत्तद्व्यक्तिरूपाणां गौरित्यादिधीनियामकत्वात्। पुरोवृत्तिगोव्यक्तौ चोक्तसादृश्यप्रतियोगित्वरूपसन्निकर्षाभावेऽपि प्रत्यभिज्ञायामिदमंशस्येन्द्रियसंयोगादिनैव तदुपस्थित्युपपत्तिः। अनुगतजातेश्चैतदपेक्षया लघुत्वेऽप्यप्रामाणिकत्वादस्यैव प्रत्यासत्तित्वम्। अनुगताकारबुद्धेर्गुणादावपि सत्त्वेनानुगत्यसाधकत्वात्। अनेकानुगतित्वे च जातेर्द्वित्वादिवद् यावत्स्वाश्रयं विनाऽप्रतीतिप्रसङ्गादिति तर्कताण्डवानुसारेण व्याख्येयम्।

पदार्थज्ञानस्येति ॥ उक्तरीत्या साक्षिरूपस्य वा सादृश्यविशेषप्रत्यासत्तिकेन्द्रियजन्यस्यैव वेत्यर्थः। पदार्थमात्रस्येत्यर्थः। व्यक्तेरेव शक्यत्वेनोक्तत्वादिति भावः। **न किञ्चिदिति** ॥ तथा चान्वयविशेषबोधकत्वेनागमस्य सार्थक्योपपादनं युक्तमिति भावः। अत्र स्वयं समाधातुमन्येषां समाधानानि तावदनूद्य दूषयति- **अत्रेत्यादिना** ॥ **वर्णपदाभिव्यक्त इति** ॥ अनेन पदवाक्यस्फोटसद्भावे प्रमाणं सूचितम्। तथाहि। वर्णाः पदानि च न प्रत्येकमर्थमुपस्थापयन्ति। समुदायोऽपि नाशुतरविनाशिनां सम्भवति। नित्यत्वेऽपि अप्रतीयमानानामबोधकत्वेनाशुतरविनाशप्रतीतिसमुदायस्याप्यसम्भवेन तावद्वर्णपदविषयकैकसमूहालम्बनाङ्गीकारे चावश्यकक्रमानुपपत्त्याऽर्थप्रतीत्यनुपपत्तेः। अत एतावत्पदाभिव्यक्तमेकं स्फोटाख्यं वाक्यं चाङ्गीकर्तव्यमित्यर्थप्रत्यायकत्वान्यथाऽनुपपत्तिरेव तत्र च मानम्। तस्य चाखण्डत्वेन तत्रापि प्रत्येकसमुदायपक्षोक्तदूषणानवकाश इत्याह- **अखण्ड इति** ॥ एकवचनेन चानेकेष्वपि वर्णेषु पदेषु चैकं पदमेकं वाक्यमित्येकत्वोल्लेखिप्रत्यक्षप्रतीतिरपि तत्र मानमिति सूचयति- **सान्निध्यमिति** ॥ आकाङ्क्षादिमत्पदसमभिव्याहारविशेष इत्यर्थः। **सर्वेषामिति** ॥ तथाहि। यत्तावदाद्यपक्षे स्फोटेऽर्थापत्तिरूपप्रमाणमुपन्यस्तम्। तदनुपपन्नम्। अप्रतीतस्यार्थप्रत्यायकत्वेऽतिप्रसङ्गेन प्रमाणान्तरस्य च तत्प्रापकस्याभावेन तयैवार्थापत्त्या तत्प्रतीतावितरेतराश्रयत्वप्रसङ्गात्। प्रतीते हि स्फोटेऽर्थप्रतीतिस्तस्यां च सत्यां तदन्यथाऽनुपपत्त्या स्फोटप्रतीतिरिति। नचैकं पदमेकं वाक्यमित्येकार्थावलम्बिनी प्रत्यक्षप्रतीतिस्तत्र प्रमाणान्तरमस्तीत्युक्तमिति वाच्यम्। अनेकेषु वृक्षेष्वेकं वनमिति प्रतीतिवदुपपत्तेः। अन्यथा तत्राप्यनेकवृक्षातिरिक्तैकवनस्वीकारापत्तिः। नच तत्रानेकेषामेकस्थानस्थितत्वोपाधिनैक्यप्रतीतिः। अत्राप्येकार्थप्रत्यायकत्वोपाधिनैक्यप्रतीतिसम्भवात्। एकार्थप्रत्यायनं च नानुपपन्नम्। एकस्मृतिसमारूढानां तदुपपत्तेः। अनुभवक्रमोपहितानामेव तेषां स्मृत्यावगाहनान्न क्रमानुपपत्तिरिति हि व्यवस्थापितमधस्तात्।

अन्वयप्रतीतेश्चान्यथोपपादयिष्यमाणत्वात्। एवमप्रामाणिके स्फोटेऽर्थप्रत्यायन-शक्त्यङ्गीकारे कल्पनागौरवपराहतेश्च।

नापि द्वितीयः पक्ष उपपद्यते। प्रमाणाभावात्। अन्वयप्रत्ययस्य च वक्ष्य-माणरीत्याऽन्यथोपपन्नस्य त्वत्पक्षानपेक्षत्वात्। प्रमाणान्तरस्य चादर्शनात्। क्रमोपेतानां द्वित्राणां पञ्चषाणां वर्णानां स्मरणसम्भवेऽपि महावाक्यस्थानां शत-सहस्रसङ्ख्याकानां स्मरणं दुःशकमेवेत्यनुभवविरोधाच्च। वक्ष्यमाणरीत्या लघूपाये सम्भवति प्रयासगौरवकल्पनापराहतेश्चेति।

तृतीयेऽप्युक्तरीत्या प्रमाणाभावः स्पष्ट एव। युक्तिविरोधश्च। केवल-स्यान्त्यवर्णस्यान्वयप्रत्यायकत्वे पूर्ववर्णोच्चारणवैय्यर्थ्यप्रसङ्गेन पूर्ववर्णक्रम-विस्मृतावन्वयाप्रत्यायकत्वेन च पूर्ववर्णैः सहैकस्मृत्युपारूढस्य तस्य वाक्यार्थप्रत्यायकत्वे वाच्ये स्मृतिस्था वर्णाः पदत्वेनानुसङ्गृहीता वाक्यार्थमव-गमयन्तीत्यस्मदभिमतस्यैव प्राप्तत्वेन बकबन्धरीतिप्रसङ्गादिति। चतुर्थपञ्चम-पक्षयोरप्यन्वयबोधे उपायान्तरस्य वक्ष्यमाणत्वेन प्रमाणान्तरस्यानिरूपणेन प्रमाणाभावो व्यक्त एव। समभिव्याहारस्य पदार्थानां वा प्रमाणान्तर-तापत्तिरुभयत्रान्वयस्याशब्दत्वापत्तेश्चेति।

अन्विताभिधानवादिनां समाधानमाह- **पदान्येवेति**॥ प्रेक्षावन्त इत्यनेनेदमेव स्वसमाधानमपीति सूचयति। ननु पदानां स्वार्थे तदन्वये च शक्तिद्वयकल्पने गौरवमित्यत उक्तम्- **अन्वितस्वार्थाभिधायिनीति**॥ एकयैव शक्त्याऽन्वित-स्वार्थाभिधानाङ्गीकारान्न गौरवमिति भावः।

नचैवं व्यक्तय एवेत्युक्तावधारणविरोधः। तस्य प्रवृत्तिनिमित्तव्यवच्छेदक-मात्रार्थत्वेनान्वयाव्यावर्तकत्वात्। नचायमपि पक्षोऽप्रामाणिकः। प्राथमिक-व्युत्पत्तिहेतुनाऽन्वितविषयकेण व्यवहारेणेतरान्वित एव शक्तिग्रहस्य

प्रेक्षावदनुभवसिद्धत्वात्। वाक्यार्थस्य शाब्दत्वान्यथाऽनुपपत्तिश्चात्र मानम्। नचान्वयस्य पदशक्यार्थप्रतियोगित्वरूपपरम्परासम्बन्धेन शाब्दत्वोपपत्तिरिति वाच्यम्। पदप्रवृत्तिविषयत्वे साक्षात्सम्बन्धस्यैव शाब्दत्वमर्यादाहेतुत्वात्। अन्यथा शक्यघटसम्बन्धिगुरुत्वादेरपि घटपदात् प्रतीतिप्रसङ्गः। अन्विताभिधानेऽपि विशेषं वक्तुं प्राभाकरमतं तावदनुपादेयत्वज्ञापनायानुवदति- **तत्रेति** ॥ अन्विताभिधानेऽपीत्यर्थः।

अत्रेदमनभिमतिबीजम्। क्रियापदेनानयनरूपे क्रियाविशेषेऽभिहिते घट-पदेन तदन्वितघटाभिधानम्। एवं घटपदेन घटरूपे कारकविशेषेऽभिहिते क्रियापदेन तदन्वितक्रियाभिधानमित्यन्योन्याश्रयत्वम्। पदान्तरवैयर्थ्यं च। अत एवैतद्दोषद्वयसूचनाय प्रत्येकमपि पदानीत्युक्तम्। नच वाच्यं पदानि प्रथमं पदार्थाननन्वितानभिधाय पश्चादन्योन्यान्वितांस्तानेवाभिदधतीति क्वान्योन्या-श्रयत्वमिति। द्विरभिधानकल्पनाया अप्रामाणिकत्वात्। अचेतनेषु विरम्य-व्यापारानुपपत्तेश्च। अथाऽपि स्यात्। प्रथमं पदानि साहचर्यवशादनन्वितस्वार्थान् स्मारयन्ति। पश्चादितरेतरस्मारितेन अर्थेन अन्वितस्वार्थानभिदधतीति न पदान्तरवैयर्थ्यम्। नापीतरेतराश्रयत्वमिति। मैवम्। सर्वदैव हि पदान्वितेनैव स्वार्थेन गृहीतसाहचर्याणि न केवलेन। तानि कथं केवलं पदार्थमात्रं स्मारयितु-मीशते। यथानुभवं हि स्मरणेनोत्पत्तव्यं नतु प्रयोजनमनुसृत्य। तथाचोक्तं दोषद्वयमपरिहार्यमिति।

इदानीमेतद्दोषद्वयसमाधानाय श्रीमदाचार्यसूर्यभिमतान्विताभिधानमाह-**प्रत्येकमिति** ॥

'अतः सामान्यतो ज्ञातः पदान्तरबलात् पुनः।
भवेद्विशेषतो ज्ञातस्तेन स्यादन्वितोक्तिता॥'

इति तदुक्तेरिति भावः। प्रत्येकं हि पदानि सामान्यत आकाङ्क्षितसन्निहित-योग्येतरान्वितस्वार्थाभिधानसामर्थ्यानि न पदान्तरमपेक्षन्त इति नान्योन्याश्रयत्वम्। पदानां सामान्यतो योग्येतरान्वितस्वार्थाभिधायकत्वेऽन्वयविशेष-जिज्ञासा न स्यात्। सामान्यतो ज्ञाते हि विशेषजिज्ञासा दृष्टा। नच पदं विनाऽन्यत् सामान्यतोऽन्वयज्ञानजनकं क्लृप्तम्। अनुमानेन कल्पनस्य चाननुभाविकत्वादिति भावः।

नन्वथाऽप्यत्र विशेषान्वयप्रतिपत्तिर्निर्निबन्धना पदान्तरं च न प्रयोजन-वदित्यत उक्तम्-**पदान्तरेति**॥ अयं भावः। पदान्तरस्य विशेषान्वयप्रतीतार्थत्वेनैव सार्थक्यम्। नचैवं पदानां प्रत्येकं सामान्यतो योग्येतरान्वये शक्तिः। पदान्तर-समभिव्याहारेण विशेषान्वये च शक्तिरिति कल्पनागौरवमिति वाच्यम्। या शक्तिः पदान्तरसमभिव्याहारनिरपेक्षा सामान्यान्वयबोधिका तस्या एव पदान्तरसमभिव्याहारसापेक्षाया विशेषान्वयबोधे पर्यवसानाङ्गीकारात्। नचैवं 'पदान्तरसन्निधानाहितशक्त्यन्तराणि' इत्यनुपपन्नमिति वाच्यम्। पदान्तरसन्नि-धानमेवाहितशक्त्यन्तरं लब्धं सहकार्यन्तरं येषामित्यर्थत्वात्। नतु पदार्थसन्नि-धानेनाहितं शक्त्यन्तरमाधेया शक्तिर्येषामिति शक्तिद्वयाङ्गीकारगौरवात्। 'पदान्तरसमभिव्याहारो हि सामान्यस्य विशेषपर्यवसान एव हेतुर्न पुनरविद्यमान-शक्त्याधाने' इति सुधाविरोधाच्चेति। यद्वा प्रत्येकं पदानि सामान्यतो योग्येतरा-न्वितस्वार्थेषु शक्तानि। तेषु पदान्तरसमभिव्याहाररूपसहकारिसामर्थ्येन विशे-षतोऽप्यन्वितस्वार्थबोधानुकूलशक्त्यन्तराधानमिति यथान्यासमेव साधु। गौरवस्य प्रामाणिकत्वेन ग्राह्यत्वादत एवाह- **तथाऽनुभवादिति**॥ नचैवं सुधाविरोधः। 'न पुनरविद्यमानशक्त्याधाने' इति सुधावाक्यस्य पदान्तरसमभि-व्याहारात् पूर्वमन्वयसामान्येऽपि शक्तिर्नेत्येतन्निषेधपरत्वेन सावकाशतया तदानुकूल्येनैव तद्ग्रन्थव्याख्यानोपपत्तेः। अत एवाहिकुण्डलाधिकरणे सुधायामसकृदाधेयशक्त्यन्तरमेवोक्तमिति ज्ञातव्यम्॥

॥ आगमविभागकथनम् ॥

आगमो द्विविधः । अपौरुषेयः पौरुषेयश्चेति । तत्रापौरुषेयो वेदः पौरुषेयोऽन्यः । वर्णाः सर्वत्र कूटस्थनित्याः । सर्वगताश्च । पदान्यपि नियतान्येव । तेषां पदार्थसम्बन्धोऽपि स्वाभाविक एव । तथाऽपि वाक्ये पदानामानुपूर्वीविशेषस्य स्वतन्त्रपुरुषपूर्वकत्वभावाभावाभ्यामयं भेदः ॥

(राघ.) एवं निर्दोषं वाक्यमागम इत्युक्तवाक्यस्वरूपं तस्य यथार्थज्ञानसाधनत्वप्रकारं ज्ञातज्ञापकत्वादिदोषराहित्यं चोपपाद्य सर्वोऽप्यागमः पौरुषेय इति मतं निरसितुं विभागेन निर्दिशति- **आगमो द्विविध इति** ॥ नन्वाशुतरविनाशिवर्णसमुदायरूपपदसमुदायात्मकवेदस्य कथमपौरुषेयतेत्यत आह- **वर्णा इति** ॥ **सर्वत्र** वेदे तदन्यत्र च । कूटवद् गगनवत् तिष्ठन्तीति कूटस्थाः । 'कूटं खं विदलं व्योम' इत्युक्तेः । ते च ते नित्याश्च । निर्विकारनित्याः । न प्रकृत्यादिवत् पटादिवद्वाऽनित्याः । **पदान्यपि नियतानीति** ॥ सर्वत्रेत्यनुषङ्गः । एकजातीयानुपूर्विकाणि । **सम्बन्धोऽपीति** ॥ वाच्यवाचकभावरूपसम्बन्धोऽपीत्यर्थः । नन्वेवं सति केन हेतुना पौरुषेयापौरुषेयविभाग इत्यत आह- **तथाऽपीति** ॥ उक्तरीत्या सर्वसाम्येऽपीत्यर्थः । **अयं भेदः** पौरुषेयापौरुषयभेद इत्यर्थः ॥

(वेदे.) एवमागमसामान्यलक्षणमभिधायेदानीं तद्विभागमाह- **आगम इति** ॥ आद्यं लक्षयति- **तत्रेति** ॥ तयोर्मध्य इत्यर्थः । वेदत्वमेवापौरुषेयामागमत्वमित्यर्थः । वेदत्वं चाप्रमितकर्तृकवाक्यत्वम् । **अन्य इति** ॥ अभिमतकर्तृकं प्रमाणवाक्यत्वमित्यर्थः । उक्तविभागानुपपत्तिमाशङ्क्य परिहरति- **वर्णा इत्यादिना** ॥ अत्र यद्यपीति पूरणीयम् । **सर्वत्र** लोके वेदे चेत्यर्थः । एतच्च **पदानि** इत्यत्रापि योज्यम् । **कूटस्थनित्या** निर्विकारतयैव नित्याः । नतु प्रकृत्यादिवदि-

त्यर्थः । प्रसङ्गादाह- **सर्वगता इति** ॥ नित्यत्वसाधनाय सर्वगतत्वमिति तु मन्दम् । क्षणेषु व्यभिचारात् । **नियतानि** एकप्रकाराणि । **स्वाभाविक एवेति** ॥ नतु सङ्केतापरपर्यायेश्वरेच्छारूप इत्यर्थः । तथात्वे 'गङ्गाशब्दात् तीरं प्रत्येतु' इतीश्वरेच्छायाः सन्मात्रविषयायाः कार्यैकोन्नेयायाः सत्त्वेन गङ्गाशब्दस्य तीरेऽपि शक्तिप्रसङ्गात् । अस्मच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाया एव शक्तिरूपत्वेनाङ्गीकारात्। 'चक्षुषा घटं प्रत्येतु' 'धूमेन वह्निं प्रत्येतु' इतीश्वरेच्छयैव चक्षुर्धूमयोर्घटवह्निभ्यां सम्बन्धो नतु संयोगव्याप्ती इत्यपि स्यादिति भावः । तथाच पौरुषेयापौरुषेयागमयोर्वर्णपदपदार्थसम्बन्धानामेकरूपेण वाक्यभेदस्य चातिप्रसञ्जकत्वेनाविभाजकतयोक्तविभागो निर्निबन्धन एवेति भावः । **आनुपूर्वीति** ॥ क्रमविशेषेत्यर्थः । **स्वतन्त्रेति** ॥ स्वजातीयोच्चारणमनपेक्ष्योच्चारयिता पुरुषः स्वतन्त्र इत्युच्यते । यथा भारतस्य व्यासः । वैदिके तु तत्पूर्वकत्वाभावः तत्क्रमेणैव तैर्वर्णैरित्यागमसिद्धः । तथाचोभयत्र वर्णपदपदार्थसम्बन्धविभागाभावेऽपि वाक्यगतक्रमविशेषे स्वतन्त्रकर्तृत्वभावाभावाभ्यामयं विभागो युक्त इति ध्येयम् । अपौरुषेयागमानङ्गीकारे च धर्मादीनां स्वर्गादिहेतुत्वासिद्धिप्रसङ्गः । एतादृशधर्माधर्मयोः स्वर्गनरकविशेषकारणत्वमित्यत्र प्रत्यक्षानुमानयोरप्रवृत्तेः । पौरुषेयागमस्य चाप्यनिश्चयेन तदनिर्णायकत्वादिति द्रष्टव्यम् ॥

॥ आगमस्यानुमानेऽन्तर्भावनिरासः ॥

आगमोऽनुमान एवान्तर्भवतीति वैशेषिकादयः । तदसत् । व्याप्त्याद्यननुसन्धान एव वाक्यार्थप्रतीतेरनुभवात्। अपौरुषेयः पृथक् प्रमाणम् । पौरुषेयस्त्वनुमानमिति प्राभाकराः । तदप्यसत् । उभयत्र सामग्रीसाम्येऽपि विशेषकल्पकाभावात् । तदेतानि त्रीण्येव प्रमाणानि ॥

(राघ.) पूर्वं त्रिविधमनुप्रमाणमित्युक्तत्रयाणां लक्षणोदाहरणादिना स्वरूपं प्रतिपाद्याधुना विभागोऽयं न्यूनाधिकसङ्ख्याव्यवच्छेदायान्यतमस्यान्यतमेऽन्तर्भावनिरासायाधिकप्रमाणानां त्रिष्वेवान्तर्भावसूचनाय चेति भावेन त्रैविध्यं साधयितुमितःपरमुक्तेष्वेवान्तर्भाव्यानीत्यन्त उत्तरो ग्रन्थः । तत्रान्तर्भावमतं तावदनूद्य निराह- **आगम इति** ।। **व्याप्त्यादीति** । लिङ्गमादिपदार्थः । **सामग्रीसाम्येऽपीति** ।। आकाङ्क्षादिमत्पदकदम्बश्रवणसङ्केतस्मरणशब्दन्यायोपक्रमाद्यनुसन्धानरूपाया वाक्यार्थबोधसामग्र्याः साम्य इत्यर्थः । एतन्मतनिरासेनागमद्वैविध्यमपि दृढीकृतं भवति । **तदिति** ।। तस्मादागमोऽनुमानेऽन्तर्भूत इत्यस्यायुक्तत्वादेतानीयता ग्रन्थेन प्रपञ्चितानि प्रत्यक्षादीनीत्यर्थः ।।

(वेदे.) नन्वागमस्य न पृथग्लक्षणाद्युक्तिर्युक्ता । तस्यानुमान एवान्तर्भावात् । तथाहि । यो यानि पदानि प्रयुङ्क्ते स तत्पदार्थसंसर्गज्ञानवानिति सामान्येन स्वात्मनि नियमेन प्रतीतेः पश्चात् पदसमूहज्ञाने तेन वक्तुः तत्पदार्थसंसर्गज्ञानानुमाने तदवच्छेदकतया वाक्यार्थसिद्धिसम्भवादिति मन्यमानानां मतमुपन्यस्य दूषयति- **आगम इति** ।। **व्याप्त्यादीति** ।। अयमाशयः । पदसमुदायमात्रस्य व्यभिचारितयाऽलिङ्गत्वेनाकाङ्क्षादिमत्पदकदम्बकस्यैव लिङ्गत्वे वाच्ये तादृशपदकदम्बकज्ञानमात्रेणैव व्युत्पन्नस्य वाक्यार्थावगतौ वक्तृज्ञानाविनाभावप्रतीत्यादिकल्पने गौरवम् । तदननुसन्धानेऽपि वाक्यार्थप्रतीतेरनुभवसिद्धत्वादिति । **पृथगिति** ।। वक्तुरभावेन तज्ज्ञानावच्छेदकतया संसर्गसिद्ध्यसम्भवादिति भावः । **अनुमानमिति** ।। उक्तरीत्या वक्तृज्ञानावच्छेदकतया संसर्गानुमानसम्भवादिति भावः । **सामग्रीति** ।। यथा वेदे आकाङ्क्षादिमत्पदसमूहज्ञानमात्रेण वाक्यार्थप्रतीतौ न व्याप्त्यादिप्रतिसाधनविलम्बेन विलम्बस्तथा लोकेऽपि तादृशपदसमूहज्ञानस्यावश्यकतयाऽनेनैव वाक्यार्थावगमसम्भवेऽतिरिक्तव्याप्त्यादिज्ञानरूपकारणविशेषकल्पने मानाभावादिति भावः । प्रमाणाधिक्यमतनिरासप्रस्तावनायोक्तमुपसंहरति- **तदेतानीति** ।।

॥ अर्थापत्त्यादीनामन्तर्भावकथनम् ॥

एतेष्वेवार्थापत्त्यादीनामन्तर्भावः । तथाहि । अनुपपद्यमानार्थदर्शनात् तदुपपादके बुद्धिरर्थापत्तिः । यथा जीवंश्चैत्रो गृहे नास्तीति ज्ञाने सति बहिर्भावज्ञानम् । अत्र यद्यप्येकैकस्य बहिर्भावलिङ्गत्वं नोपपद्यते । व्यभिचारात् । तथाऽपि, चैत्रो बहिरस्ति जीवनवत्त्वे सति गृहेऽसत्त्वात् । यो जीवन् यत्र नास्ति स ततोऽन्यत्रास्ति । यथाऽहमिति मिलितयोर्जीवनगृहाभावयोर्लिङ्गत्वमुपपद्यत एव ॥

(राघ.) **अनुपपद्यमानेति** ॥ येन विना यन्नोपपद्यते तदुपपादकम् । अन्यदुपपाद्यम् । तत्रानुपपद्यमानार्थदर्शनं करणम् । उपपादविषयबुद्धिः फलम् । फलप्राधान्यविवक्षया बुद्धिरर्थापत्तिरित्युक्तम् । **इति ज्ञाने सतीति** ॥ प्रत्यक्षेण शब्देन चेति भावः । **बहिर्भावज्ञानं** बहिस्स्थत्वज्ञानम् । जायमानं बहिर्भावज्ञानमर्थापत्तिरित्यर्थः । **अत्रेति** ॥ दलद्वयात्मकेऽनुपपद्यमानेऽर्थ इत्यर्थः । **व्यभिचारादिति** । जीवत्वगृहासत्त्वयोः क्रमाद् गृहे सत्त्वे मृते च व्यभिचारादित्यर्थः ॥

(वेदे.) ननु कथमनुप्रमाणत्रित्वम् । अर्थापत्त्यादीनामन्येषां विद्यमानत्वादित्यत आह- **एतेष्विति** ॥ यथासम्भवमिति शेषः । अर्थापत्तिं तावदनुमानेऽन्तर्भावयितुं तल्लक्षणमाह- **अनुपपद्यमानेति** ॥ प्रात्यक्षिकबहिःसत्त्वबुद्ध्यतिव्याप्तिवारणाय पूर्वभागः । अन्तर्भावमाह- **व्यभिचारादिति** ॥ गृहगते जीवित्वमात्रस्य, मृते च गृहाभावमात्रस्य बहिःसत्त्वव्यभिचारादित्यर्थः । **उपपद्यत एवेति** ॥ नच व्याप्तिप्रतिसन्धानविधुराणामपि गृहाभावदर्शनेन बहिःसत्त्वबुद्धेः कथमेतदिति वाच्यम् । गृहाभावस्य बहिःसत्त्वं विनाऽनुपपत्तिरिति त्वन्मतेऽपि तावदाश्यकम् । तदभावे गृहाभावदर्शनमात्रेण बहिःसत्त्वबुद्धेरननुभवात् । अनुप-

पत्तिज्ञानमेव च व्याप्तिज्ञानम्। अनुपपत्तिः, अविनाभाव इत्येतयोरेकार्थत्वेन नाम्न्यैव विवादपर्यवसानादिति॥

विरुद्धयोर्विशेषणविशेष्यभावानुपपत्तिरिति चेन्न। सामान्यविशेषयोरविरोधस्य स्वस्मिन्नेव दृष्टत्वात्। आत्यन्तिकविरोधे त्वर्थापत्तिरपि न प्रवर्तते। किन्तु विप्रतिपत्त्या सन्देह एव भवतीति॥

(राघ.) **सामान्यविशेषयोरिति**॥ जीवनस्य क्वापि सत्त्वाभावस्य चान्योन्यं विरोधेऽपि जीवनस्य क्वचिद् गृहप्रदेशे सत्त्वाभावस्य वृक्षत्वचूतत्वाभावयोरिवाविरोधस्य स्वात्मन्येव गृहाद् बहिर्निर्गते दर्शनादित्यर्थः। ननु यत्र पुरुषे जीवनं क्वाप्यसत्त्वं चावधारितं तत्र कथमनुमानप्रवृत्तिरित्यत आह- **आत्यन्तिकेति**॥ अर्थापत्तेरपि तादृशस्थलेऽप्रवृत्तेर्न तत्रानुमानतोपपादनायास इति भावः। **विप्रतिपत्त्येति**॥ विरुद्धार्थयोः प्रतीत्या जीवनग्राहकमप्रमाणमुत क्वाप्यसत्त्वग्राहकमप्रमाणमिति वा, यत्र क्वचास्ति वा मृतो वेति सन्देह एव भवतीत्यर्थः। इतिशब्दोऽर्थापत्त्यन्तर्भावसमाप्तौ। एवमग्रेऽपि॥

(वेदे.) गूढाभिसन्धिः शङ्कते- **विरुद्धयोरिति**॥ जीवनगृहाभावयोरित्यर्थः। अविदिताभिप्राय इव परिहरति- **सामान्येति**॥ विरोधो हि तदा स्यात् यदि जीवनग्राहकज्योतिःशास्त्रेण गृहेऽस्तित्वम्। यदिवा गृहाभावग्राहकप्रत्यक्षेण जीवनाभावः प्रतीयेत। नचैवम्। ज्योतिःशास्त्रेण सामान्यतः क्वचिज्जीवनबोधनात्। प्रत्यक्षेण च गृहेऽसत्त्वबोधनात्। सामान्ये सत्त्वस्य विशेषेऽसत्त्वस्य च स्वस्मिन्नेव सहभावदर्शनेनान्योन्यमविरुद्धत्वादिति भावः। यो हि मातापितृभ्यां सुशिक्षितो न जातु गृहान्निर्गच्छति सोऽन्यानपि तथा मन्यमानो जीवनप्रमाणस्य गृहे सत्त्वमेवार्थं प्रतिपद्यते। तस्य गृहाभावप्रमाणेनान्यत्रसत्त्वप्रमितिकथनविरोध इति पूर्वपक्षिणा स्वाभिसन्धौ उद्घाटिते सत्याह- **आत्यन्तिक इति**॥ अर्थापत्तेः

बहिःसत्त्वनिश्चयों विप्रतिपत्त्येति त्वदुक्तरीत्या प्रमाणद्वयविरोधेन बहिःसत्त्वसन्देह एव स्यान्नतु निश्चय इत्यर्थः ॥

॥ उपमानस्यान्तर्भावनिरूपणम् ॥

साद्दश्यज्ञानसाधनमुपमानम् । तत्र तेनायं सद्दशः सद्दशाविमावित्यादि वा ज्ञानं प्रत्यक्षजम् । गोगवयौ सद्दशाविति वाक्यजं त्वागम एव । गृह्यमाणे स्मर्यमाणसाद्दश्यं द्दष्ट्वा स्मर्यमाणे यद् गृह्यमाणसाद्दश्यं प्रत्येति तदनुमानमेव ।

नन्वनुभूयमानगतत्वेन प्रतीयमानं साद्दश्यं करणम् । स्मर्यमाणगतं प्रमेयम् । तत्कथमनयोर्व्यधिकरणयोर्लिङ्गलिङ्गिभाव इति चेन्न । स गौरेतद्गवयसद्दशः, अस्य गवयस्य तद्गोसद्दशत्वात् । यो यत्सद्दशः स तत्सद्दशः, यथा यमो यमान्तरेणेति व्याप्तिसम्भवेन व्यधिकरणस्यादोषत्वात् । एतद्गवयगतसाद्दश्यप्रतियोगित्वस्य वा लिङ्गत्वेन सामानाधिकरण्याच्चेति ॥

(राघ.) मीमांसकाभिमतोपमानं लक्षणोक्तिपूर्वमन्तर्भावयति- **साद्दश्यज्ञानेति** ॥ तत् त्रिविधं भवति । तेनायं सद्दश इति वा सद्दशावेताविति वा चक्षुरुन्मीलनानन्तरं जायमानं ज्ञानम् । इमौ सद्दशावित्युपदेशानन्तरं जायमानज्ञानसाधनं वा । स्मर्यमाणगतसाद्दश्यज्ञानसाधनभूतं गृह्यमाणपिण्डगतसाद्दश्यज्ञानं वेति । तत् त्रयमपि क्रमादन्तर्भावयति- **तत्रेति** ॥ साद्दश्यज्ञानसाधनत्वेनाभिमतेषु मध्य इत्यर्थः । ज्ञानशब्दः प्रमापरः । **आगम एवेति** ॥ अन्तर्भवतीति योज्यम् । **गृह्यमाण इति** ॥ पत्तने गामनुभूय वनं गतस्य गवयदर्शने सति गृह्यमाणगवये स्मर्यमाणपत्तनस्थगोसाद्दश्यं द्दष्ट्वा स्मर्यमाणगोपिण्डे यद् गृह्यमाणं गवय-

सादृश्यं प्रत्येति 'गृहे स्थिता गौर्गृह्यमाणगवयसदृशी एतस्य तत्सदृशत्वात्' इति प्रत्येतीत्यर्थः। तत्र गवयनिष्ठसादृश्यज्ञानमुपमानत्वेन परसम्मतमनुमानमेवेत्यर्थः। **प्रमेयं** प्रमातव्यमित्यर्थः। तुष्यतु दुर्जन इति भावेनाह- **एतद्गवयगतेति**॥

(वेदे.) शाब्दोपमानस्य यथायोग्यमुक्तान्तर्भावं वक्तुं तावल्लक्षणमाह- **सादृश्येति**॥ अस्यान्तर्भावमाह- **तत्रेत्यादिना**॥ **गृह्यमाणे** गवयादौ। **स्मर्यमाणं** गवादिकं द्रष्टव्यम्। **व्याप्तिसम्भवेनेति**॥ उक्तरीत्या व्याप्तिप्रविष्टसम्बन्धानां बहुविधत्वेन सामानाधिकरण्यस्यैव व्याप्तिघटकत्वाभावादिति भावः। अभ्युपेत्याह- **एतदिति**॥

॥ अनुपलब्ध्यादीनामन्तर्भावकथनम् ॥

अभावज्ञानकरणमभावप्रमाणम्। तत्रेदानीं कौरवाद्यभावो भारताद्यागमादवगम्यते। देवदत्तस्य चक्षुराद्यभावो रूपाद्यदर्शनलिङ्गगम्यः। सुखाद्यभावप्रमितिस्तु साक्षिप्रत्यक्षेणैव। पुरोवृत्तिघटाद्यभावप्रमितिस्तु झटिति जायमाना प्रत्यक्षफलमेव। नत्वनुपलब्धिमात्रजन्या। अपरोक्षज्ञानत्वात्। अनुपलब्धिस्त्ववर्जनीयसन्निधिरेव। यत्रत्वन्धकारे हस्तप्रसारणादिरूपपरामर्शेन घटाभावं प्रत्येति न तदाऽनुपलब्धिः करणम्। किन्तु लिङ्गत्वेनैव। अत्र घटो नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वादिति। एवं प्रातर्गजाद्यभावज्ञानमनुपलब्धिलिङ्गजन्यम्। अभावस्येन्द्रियसन्निकर्षानुपपत्तिरिति चेन्न। भाववदभावस्यापीन्द्रियसन्निकर्षे बाधकाभावात्।

बहुलज्ञानेऽल्पज्ञानं सम्भवः। यथा शतमस्तीति ज्ञाने पञ्चाशज्ज्ञानम्। तदप्यनुमानमेव। देवदत्तः पञ्चाशद्वान्, शतवत्त्वात्। यथाऽहमिति प्रयोगसम्भवात्।

प्रसक्तप्रतिषेधे परिशिष्यमाणे बुद्धिः परिशेषः । यथा देवदत्त-यज्ञदत्तावेताविति ज्ञाने सत्येकस्मिन्नायं यज्ञदत्त इति प्रतिषेधे देवदत्तबुद्धिः । इयमनुमानजन्या । अयं देवदत्तः, देवदत्तयज्ञदत्त-योरन्यतरत्वे सत्ययज्ञदत्तत्वात् । व्यतिरेकेण यज्ञदत्तवदिति प्रयोगोपपत्तेः ।

उपक्रमादीन्यप्यनुमानान्येव । अनिर्दिष्टप्रवक्तृकं प्रवाद-पारम्पर्यमैतिह्यम् । यथाऽत्र वटे वैश्रवणोऽस्तीति वाक्यं तदागम एव । एवमन्यान्यपि प्रमाणान्युक्तेष्वेवान्तर्भाव्यानि ॥

(राघ.) **अभावेति** ॥ प्रमेयाभावज्ञानकरणं यत् तदभावप्रमाणमित्यर्थः । अभावज्ञानकरणमनेकविधम् । यथायथं प्रत्यक्षादित्रय एवान्तर्भूतं न ततः पृथगिति भावेनाह- **तत्रेति** ॥ अभावेषु मध्य इत्यर्थः । तदानीं तत्र प्रत्यक्षमागमो वाऽपि भवतीतीदानीमित्युक्तिः । **भारताद्यागमादिति** ॥ अतोऽनुपलब्धिरूपं प्रमाणं तदर्थं पृथङ् नाभ्युपेयमिति भावः । **चक्षुरादीति** ॥ श्रोत्राद्यभावः शब्दा-द्यज्ञानलिङ्गगम्य इत्यादिपदार्थः । ननु झटिति जायमानघटाद्यभावप्रमितिस्थले योग्यघटाद्यनुपलब्धिबलात् जायमानाभावप्रमितिरनुपलब्धिप्रमाणमात्रजन्या कुतो नेत्यतः सयुक्तिकं निराह- **पुरोवृत्तीति** ॥ मांत्रेति परमतानुवादो नतु साऽपि कारणमिति भावेन तदुक्तिः । अवर्जनीयसन्निधिरेवेत्यग्रिमवाक्यविरोधात् । वर्णनित्यत्ववादे तर्कताण्डवे नेन्द्रियस्यानुपलब्धिः सहकारिणीत्युपक्रम्य युक्ति-भिरुपपादनाच्च । तर्हि पृथक् प्रमाणत्वं प्राप्तमिति पृच्छति- **किन्त्विति** ॥ ननु प्रातश्चत्वरादौ प्रतियोगिस्मृत्यभावेन गजाद्यभावमनुभूय देशान्तरं गतो गज-स्मृतिमान् प्रातस्तत्र गजो नासीदिति प्रतिपद्यते । तत्र नासीदिति प्रत्यक्षस्य प्रवृत्तिरतोऽनुपलब्धिः प्रमाणत्वेनोपेयेत्यत आह- **एवमिति** ॥ प्रातश्चत्वरे गजो

नासीत् तत्तुल्यपरिमाणानां सत्यप्युपलम्भे तस्याप्युपलम्भात्। व्याघ्रादिवत्। नचासिद्धः। पूर्वं तत्तुल्यपरिमाणानामुपलम्भेऽपि तदुपलम्भो नासीत्। तत्तुल्यपरिमाणानां स्मरणे सत्यपि तस्य स्मरणाभावादिति स्मृत्यभावलिङ्गेन गजाद्युपलब्ध्यभावनिश्चयसम्भवात्। स्मृत्यभावश्च साक्षिवेद्य इति नानवस्थादोष इति भावः। विस्तरस्तु

'अर्थापत्त्युपमाभावा अनुमान्तर्गताः क्वचित्।
प्रत्यक्षान्तर्गतोऽभावः सुखादेर्नियमेन च।
अन्यत्र झटिति प्राप्तः........... ॥'

इत्यादिभक्तिपादीयानुव्याख्यानसुधयोर्ज्ञेयः। **बाधकाभावादिति**॥ द्रव्ययोरेव संयोग इत्यस्याप्रामाणिकत्वेन द्रव्यत्वापत्तिरिति बाधकं न शङ्कार्हमिति भावः। **बहुलेति**॥ बहुत्वसङ्ख्याविशिष्टवस्तुज्ञाने सति न्यूनसङ्ख्याविशिष्टार्थज्ञानं यज्जायते तत् सम्भवप्रमाणमित्यर्थः। फलप्राधान्यविवक्षयैवमुक्तिः। परिशिष्यमाणे बुद्धिः परिशेष इत्यपि फलप्राधान्यविवक्षयोक्तिः। अयमिति पक्षनिर्देशो देवदत्त इति साध्योक्तिः। **उपक्रमादीनीति**॥ उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादाः श्रुतिलिङ्गवाक्यप्रकरणस्थानानि च। 'इदम् एतत्परं तदुपक्रमवत्त्वाद्, यत् यदुपक्रमं तद्वाक्यं तत्परम्, यथा सम्मतम्' इत्यादिरूपेण व्याप्तिमपेक्ष्य तात्पर्यगमकत्वादनुमानान्येवेत्युक्तम्। एतेऽपि

'प्रारम्भाद्याश्च युक्तयः।
आगमार्थावसित्यर्था नियतव्याप्तयोऽखिलाः॥'

इत्याद्यनुव्याख्यानसुधयोर्व्यक्ताः। वैश्रवणः कुबेरः। 'वटेवटे वैश्रवणश्चत्वरेचत्वरे शिवः। पर्वतेपर्वते रामः सर्वत्र मधुसूदनः' इत्यादिरागम एव। नत्वैतिह्यरूपं पृथक्प्रमाणमैतिह्यमागमभेद इति भगवत्पादोक्तेरिति भावः। **एवमन्यान्यपीति**॥ नयनाङ्गुल्यादिचेष्टा-वर्णज्ञापकरेखादि अस्तङ्गतः सविता, गच्छ

गच्छसि चेत्कान्त, इत्यादिवाक्यानि चानुमानादिषु यथासम्भवमन्तर्भाव्यानी-त्यर्थः। **अर्थापत्त्यादेरन्तर्भावोक्तिः॥**

(वेदे.) झटितीति॥ अपरामर्शेनेत्यर्थः। अनुपलब्धेः कारणत्वमभ्युपेत्या-नुपलब्धिमात्रेत्युक्तम्। वस्तुतस्तु तस्या अभावज्ञानकारणत्वमेव नास्तीत्याह-**अनुपलब्धिरिति॥** व्यभिचारादन्यथासिद्धेश्चेति भावः। तथाहि, विनश्यदवस्थ-घटे कपाले घटोऽस्तीति चाक्षुषसाक्षात्कारे तदुत्तरक्षणे घटध्वंसेऽनन्तरमेव चक्षुषा घटध्वंससाक्षात्कारस्य जायमानत्वेन व्यतिरेकव्यभिचारः। ध्वंससाक्षात्कारो-त्पत्तिक्षणव्यवहितपूर्वक्षणे ध्वंसोत्पत्तिक्षणरूपे उक्तरूपघटसाक्षात्कारस्य स्थित्या तदभावरूपानुपलब्धेरभावात्। अवश्यकेनेन्द्रियेणान्यथासिद्धेश्च। अन्यथाऽऽभावग्रहे भावानुपलब्धिरिवाभावानुपलब्धिरपि भावग्रहहेतुः स्यात्। तस्यास्तत्रान्यथासिद्धत्वे प्रकृताया अपि तथात्वमिति। नच प्राप्त्यभावः संयोग-स्यैव सम्भवात्। द्रव्ययोरेव संयोग इति प्रक्रियायाश्चाप्रामाणिकत्वात्। तदभावेऽपि विशेषणतायाः सम्भवाच्च। तदनादरेऽनुपलब्ध्याऽपि क्वचिदेवाधिकरणेऽभावो गृह्यत इत्युपपादयितुमशक्यमिति भावः। किञ्चानुपलब्धिव्यतिरेकप्रयुक्तो नाभावज्ञानव्यतिरेको येन तस्यास्तत्र हेतुत्वं स्यात्। नचैवं घटोपलम्भेऽपि तदभावज्ञानं स्यादिति वाच्यम्। घटोपलम्भस्य प्रमात्वे तत्र विषयतत्सन्निकर्ष-योरभावेनाभावप्रत्यक्षानुदयात्। नचाभावभ्रमः स्यादिति वाच्यम्। तज्जनक-दोषाभावात्। दोषाणां कार्यैकोन्नेयत्वात्। भ्रमत्वेऽपि तज्जनकदोषस्यैव प्रतिबन्धकत्वेन भ्रमरूपघटोपलम्भस्य प्रतिबन्धकत्वे तदुत्पत्तिकालेऽभाव-ज्ञानापत्तिः। नच विनिगमकाभावः। अनुपलब्धेः पूर्वं सत्त्वात्। कार्यसहभूत-प्रतिबन्धकाभावो हेतुरिति तु ज्ञानरूपप्रतिबन्धकाभावव्यतिरिक्तविषयम्। अन्यथासिद्धेरप्रतिबन्धकतापत्तेः। अधिकरणज्ञानसमयेऽभावज्ञानापादने बाधकाभावाच्च। नच विशिष्टज्ञानमात्रे सामान्यत एवासंसर्गग्रहस्य हेतुत्वात्

तस्य चानुपलब्धिपर्यवसानात् तस्या हेतुत्वमिति वाच्यम् । आनुमानिक-पीतत्वासंसर्गग्रहेऽपि पीतप्रत्यक्षोदयेन तस्यैवासम्मतेः ।

ननु जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षव्यतिरेकः प्रतियोगिसत्त्वप्रसञ्जित-प्रतियोगिकानुपलब्धिव्यतिरेकप्रयुक्तः । अतोऽनुपलब्धेर्हेतुत्वं प्राप्तमेवेति चेन्न। जातेर्योग्यव्यक्तिवृत्तितयैव योग्यत्वेन तत्र पृथिवीत्वस्य योग्यत्वे तदभावस्या-प्ययोग्यत्वेन क्लृप्तयोग्यसन्निकर्षाभावादेव पृथिवीत्वाभावो न प्रत्यक्षः । नत्वक्लृप्त-योग्यानुपलब्धिव्यतिरेकादिति साधूक्तमनुपलब्धिरवर्जनीयसन्निधिरिति।

नन्विन्द्रियव्यापाराभावेऽपि अन्धकारे घटाभावज्ञानमनुपलब्धिमात्रेणैव जायमानमुपलब्धमिति चेत्। सत्यम्। तत्रापि नानुपलब्धेरनुपलब्धितयोपयोगोऽपि तु लिङ्गतयैवेत्याह- **अत्र त्विति** ।। अतीन्द्रिये व्यभिचारवारणाय योग्यत्वे सतीत्युक्तम्। इन्द्रिययोग्यत्वे सतीत्यर्थः । ननु तथाऽपि प्रातर्गजाद्यभावज्ञाने कालव्यवधानेनेन्द्रियव्यापारो नास्त्येव। नचोक्तलिङ्गसम्भवोऽसिद्ध्यापत्तेः । प्रतियोगिनो गजस्योपलभ्यमानत्वात् । प्रातःकालीनगजस्य चायोग्यत्वात् । तथाच तदर्थमभावस्य पृथक् प्रामाण्यमङ्गीकार्यमित्यत आह - **एवमिति** ।। **अनुपलब्धीति** ।। अनुपलब्धेश्च प्रातःकालीनगजानुभवाभावरूपायाः स्मरणाभावात् लिङ्गानुमेयाया लिङ्गत्वमात्रमतो नोक्तदोषः। अन्यथा त्वन्मतेऽपि तत्राभावज्ञानस्यानुपलब्धिजन्यत्वं न स्यादिति भावः । **सन्निकर्षेति** ।। संयोगसमवाययोरसम्भवादिति भावः । **बाधकाभावादिति** ।। प्रक्रियामात्रस्य चाप्रामाणिकत्वेनेन्द्रियाभावयोरपि संयोगस्यैव सम्भवादिति भावः । प्रसक्त-प्रतिषेधे ज्ञात इति शेषः । **अयमिति** ।। घटादौ व्यभिचारवारणाय सत्यन्तम्। **उपक्रमेति** ।। तात्पर्यानुमापकत्वादिति भावः । **अनिर्दिष्टेति** ।। अनिश्चितेत्यर्थः। **तदिति** ।। सत्यं चेदिति वाक्यशेषः । ननु तथाऽपि शाकुनलिप्यक्षरचेष्टानां तथा श्रुतिलिङ्गादीनां नैयायिकोपमानस्य च पृथग्विद्यमानत्वान्नित्यत्वानुपपत्तिरित्यत आह- **एवमिति** ।। यथासम्भवमिति शेषः ।

अयं भावः। शाकुनविशिष्टस्येष्टार्थानुमापकत्वेन शाकुनमनुमानान्तर्भूतम्। एवमपशाकुनेऽपीष्टार्थविघातित्वमनुमानं द्रष्टव्यम्। लिप्यक्षरचेष्टायाश्च वर्णस्मरणहेतुतया प्रत्यक्षेऽन्तर्भावः। उक्तं हि सुधायां 'पुरुषलिपिरपि पदमिव पदार्थस्य वर्णानां स्मरणहेतुरेवेति। नचात्र पुरुषलिपिरेवोक्ता नाक्षरचेष्टेति वाच्यम्। भक्तिपादे सुधायां शाकुनलिप्यक्षरचेष्टानामन्तर्भावस्य नविलक्षणाधिकरणे सूचितत्वादित्युक्तत्वात्। नच विलक्षणाधिकरणस्थमुक्तं वाक्यं विनाऽक्षरचेष्टान्तर्भावसूचकं तत्रत्यं वाक्यान्तरमस्तीति वाच्यम्। मनस एव स्मृतिकारणत्वेन लिप्यादिदर्शनस्य संस्कारोद्बोधकत्वेन चरितार्थस्य कथं प्रत्यक्षत्वमिति। अर्थोपसर्पणतत्संयोगसहितचक्षुरादिवदवान्तरव्यापारसहितेन्द्रियस्यैव प्रत्यक्षत्वेन लिप्यादिदर्शनजन्यसंस्कारोद्बोधरूपावान्तरव्यापारसहितस्य मनस एव स्मरणकरणत्वे लिप्यादेरपि प्रत्यक्षशरीरान्तःप्रविष्टत्वेन प्रत्यक्षत्वमेवेत्यभिप्रायात्। नचैवं चेष्टायाश्चानुमानान्तर्भावादिति तत्त्वनिर्णयटीकाविरोध इति वाच्यम्। तत्रार्थविशेषबोधकभ्रूविक्षेपचेष्टाया एवाभिप्रेतत्वेनाक्षरचेष्टान्तर्भावानुक्तेः। अक्षरचेष्टाभिप्रायत्वे तु चेष्टकबुद्धिस्थशब्दानुमापकत्वेन वा तदवबुद्धार्थानुमापककत्वेन वाऽनुमानान्तर्भावादिति पररीत्यैवोक्तत्वादविरोध इति द्रष्टव्यम्। श्रुतिलिङ्गादीनां च तात्पर्यानुमापकत्वेनानुमानत्वमेव। वाक्यप्रकरणादीनां स्वार्थे आगमत्वमपि। नैयायिकोपमानमप्यनुमानान्तर्भूतमेव। 'अयं गवयशब्दवाच्यः, अगोत्वे सति गोसदृशत्वात्, व्यतिरेकेण घटवत्' इत्याद्यनुमानसम्भवादिति॥

॥ प्रामाण्यस्वतस्त्वम् ॥

नन्वेतेषां प्रमाणानां प्रामाण्यमप्रमाणानामप्रामाण्यं च केनोत्पद्यते केन वा ज्ञायत इति चेत्। उच्यते। तत्र ज्ञानानामुभयं स्वत

एवेति साङ्ख्या मन्यन्ते । ज्ञानजनकातिरिक्तजनकानपेक्षत्वमुत्पत्तौ स्वतस्त्वम् । ज्ञानज्ञापकातिरिक्तज्ञापकानपेक्षत्वं ज्ञप्तौ स्वतस्त्वम् ।

उभयं परत एवेति नैयायिकादयः । ज्ञानजनकातिरिक्तकारण-जन्यत्वमुत्पत्तौ परतस्त्वम् । ज्ञानज्ञापकातिरिक्तप्रमाणापेक्षत्वं ज्ञप्तौ परस्त्वम् । तत्र ज्ञानमिन्द्रियादिजन्यं प्रामाण्यं पुनरिन्द्रियादि-गुणजन्यम् । तथाऽप्रामाण्यं तद्दोषजन्यम् । एवं ज्ञानं मानस-प्रत्यक्षवेद्यम् । तत्र प्रामाण्यमप्रामाण्यं च संवादविसंवादलिङ्ग-गम्यमिति ।

प्रामाण्यं परतोऽप्रामाण्यं स्वत इति बौद्धाः । प्रामाण्यं स्वतोऽप्रामाण्यं परत इति पक्षमङ्गीकुर्वाणा अपि भाट्टाः प्रामाण्य-विशिष्टं ज्ञानं ज्ञातताविशेषेणानुमीयत इति ज्ञप्तौ स्वतस्त्वम् । अप्रामाण्यं तु विसंवादाद्यनुमानान्तरवेद्यमिति परतस्त्वं मन्यन्ते । स्वप्रकाशज्ञानेनैव प्रामाण्यविशिष्टज्ञानं सिद्ध्यति । अप्रामाण्यं तु नास्त्येवेति प्राभाकराः ।

इन्द्रियादिमात्रेणैव प्रामाण्यविशिष्टं ज्ञानमुत्पद्यते । गुणास्त्व-किञ्चित्कराः । अप्रामाण्यं दोषसहकृतेन्द्रि-यादिभिरुत्पद्यते । तथा ज्ञानं तत्प्रामाण्यं च साक्षिणैव ज्ञायते । अप्रमाणज्ञानस्वरूपमात्रं साक्षिवेद्यम् । तदप्रामाण्यं त्वनुमेयमित्याचार्याः ।

(राघ.) एवं निरूपितानि केवलानुप्रमाणानि तदाभासाश्चोक्ताः । तत्र केवलानुप्रमाणानां प्रामाण्यं किमुत्पत्तिज्ञप्त्योरेकप्रकारमुतानेकप्रकारम् । तथा किं प्रामाण्यमिवाभासानामप्रामाण्यमुत्पत्तिज्ञप्त्योरेकप्रकारमुत भिन्नप्रकारमिति

भावेन पृच्छति- **नन्वेतेषामिति**॥ एषां प्राङ्निरूपितानामित्यर्थः। इन्द्रियादि-मात्रेणेत्यादिना स्वमतं विवक्षुः परमतानि तावदनुवदति- **तत्रेति**॥ केनेति कृतचोद्यविषये। ज्ञानतत्करणयोर्मध्य इति वाऽर्थः। उभयं प्रामाण्यमप्रामाण्यं च। **स्वत एवेति**॥ उत्पद्यते ज्ञायते चेत्यनुषङ्गः। एवमग्रेऽपि। किमिदं स्वतस्त्व-मित्यत आह- **ज्ञानेति**॥ उभयमित्यत्रापि ज्ञानानामित्यनुवर्तते। परतस्त्वं निर्वक्ति- **ज्ञानजनकेति**॥ ज्ञानकारणात् ज्ञानज्ञापकाच्चातिरिक्तं किमित्यत आह- **तत्रेति**॥ उत्पत्तिज्ञप्त्योर्मध्य इत्यर्थः। तथेत्यनन्तरं ज्ञानमिन्द्रियादि-जन्यमित्यनुषज्यते। **तद्दोषेति**॥ इन्द्रियलिङ्गादिदोषजन्यमित्यर्थः। संवाद-विसंवादेति यथाक्रममन्वयः। **प्रामाण्यविशिष्टज्ञानमिति**॥ प्रामाण्यं तदाश्रयज्ञानं चोभयमनुमेयमित्यर्थः। **अनुमानान्तरेति**॥ ज्ञानं ज्ञाततालिङ्गेनानुमेयं तदप्रामाण्यं तु विसंवाददुष्टकरणजन्यत्वादिरूपानुमानान्तरवेद्यमित्यर्थः। ज्ञानतदप्रामाण्य-योरनुमेयत्वाविशेषेऽप्यनुमानभेदात् परतस्त्वमिति भावः। **स्वप्रकाशज्ञानेनै-वेति**॥ व्यवसायरूपघटादिज्ञानं स्वप्रकाशम्। तत्स्वात्मानं स्वनिष्ठप्रामाण्यं च सहैव गृह्णाति। इति ज्ञानग्राहकातिरिक्तानपेक्षत्वात् स्वतस्त्वमिति भावः। तर्हि स्वनिष्ठप्रामाण्यस्यापि ग्रहणप्रसङ्गात् तस्यापि स्वतस्त्वसिद्धिरित्यत उक्तम्- **अप्रामाण्यं तु नास्त्येवेति**॥ एतेन जायमानं सर्वं ज्ञानं प्रमाणं सदेव जायत इत्युत्पत्तावपि स्वतस्त्वमुक्तं भवति। एवमुपन्यस्तपञ्चपक्षाणामनुभवादि-विरोधेन स्फुटदूषणत्वाद्वा साङ्ख्यमतस्याप्रामाण्यस्वतस्त्वस्वीकारादपि (मायी वदति।) साङ्ख्यनयानुव्याख्यानसुधयोर्नैयायिकादिमतस्य

'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागम्यस्य च।
अनवस्थाऽन्यथा हि स्यादप्रामाण्यं तथाऽन्यतः॥'

इति जिज्ञासानयानुव्याख्यानसुधयोः, देवतानयभाष्यटीकयोः, नविलक्षणत्वनय-भाष्यटीकयोः तत्वनिर्णयादौ च तथा बौद्धमतस्य च 'सर्वस्यापि नचाभावो

विश्वं सदिति गम्यते' इत्यादिना माध्यमिकनयानुव्याख्यानादौ च भाट्टप्राभाकर-मतयोश्च 'न ज्ञानदृष्टिमात्रेण प्रामाण्यमवसीयते' इति ज्ञानपादीयानुव्याख्यान-सुधयोः विवृतदूषणत्वाद्वाऽत्रानुक्तिः । स्वमतमाह- **इन्द्रियादीति** ।। ज्ञान-सामग्रीमात्रेणैवेत्यर्थः । **दोषसहकृतेति** ।। दुष्टबुद्धीनामेवाप्रामाण्यशङ्केति परतोऽ-प्रामाण्यमिति तत्त्वनिर्णयोक्तेरिति भावः । **तदप्रामाण्यं त्वनुमेयमिति** ।। व्याख्यातमेतद्वाक्यं तर्कताण्डवे । या तु टीकायामप्रामाण्यमनुमेयमित्युक्तिः सा साक्षिणाऽप्रामाण्य-ग्रहणे विसंवादापेक्षा नियतेत्यभिप्रेत्य । अत एव वादावल्याम्-नचाप्रमाण्यं क्वचिदपि निरपेक्षसाक्षिणा निश्चितचरमिति । उक्तं हि सुधायाम्-साक्षी अपवादसद्भावेऽप्रामाण्यमपि गृह्णातीति ।।

(वेदे.) नन्वेषां प्रमाणानां प्रामाण्यस्याप्रमाणानामप्रामाण्यस्य चोत्पत्ति-ज्ञप्त्योः निरूपयितुमशक्यत्वेन निश्चये एवम्भूतैरित्यादिना वक्ष्यमाणप्रमाणा-भिन्नतया निश्चितप्रामाण्यकप्रमाणसाध्यो नित्यानित्यत्वादिनिश्चयोऽनुपपन्न इति तटस्थः शङ्कते- **नन्विति** ।। **केनोत्पद्यत इति** ।। न केनापीत्यर्थः । एव-मग्रेऽपि । न तावत् प्रामाण्याप्रामाण्ये ज्ञानगते तत्कारणमात्रजन्ये । तर्हि सर्वत्रापि ज्ञाने तदुभयापत्तेः । नाप्यतिरिक्तकारणजन्ये । तदनिरूपणात् । प्रमामात्रे अनुगतस्यैकस्य गुणस्याप्रमामात्रेऽनुगतस्यैकस्य दोषस्य चाभावाच्चेति भावः । **केन वेति** ।। न ज्ञानग्रहणमात्रेण । तदुभयसंशयानुपपत्तेः । नापि तद्ग्राहकाति-रिक्तेनानवस्थानादिति भावः । अत्र समाधानं वक्तुं तावदन्यसमाधानानि तेषां हेयताज्ञापनायानुवदति- **तत्रेत्यादिना** ।। **स्वत एवेति** ।। उत्पत्तौ ज्ञप्तौ चेत्यर्थः। उत्पत्तौ स्वतस्त्वं निर्वक्ति- **ज्ञानजनकेति** ।। प्रमातदितरसाधारणधर्मावच्छिन्न-कार्यतानिरूपितकारणताश्रयातिरिक्तानपेक्षत्वमित्यर्थः । अन्यथा गुणदोषयो-रपि ज्ञानजनकत्वेन परतस्त्वपक्षसाधारण्यापत्तेरिति ध्येयम् । ज्ञप्तौ तन्निर्वक्ति-**ज्ञानज्ञापकेति** ।। अत्र ज्ञानज्ञापकपदेन ग्राह्यप्रामाण्याश्रयविषयकाप्रति-

बद्धानुव्यवसायो विवक्षितः। तदतिरिक्तं प्रामाण्यानुमित्यादिरूपं प्रतिबद्धानुव्यवसायरूपं च। तदनपेक्षत्वं तदग्राह्यत्वमिति नञ्द्वयेनोक्तानुव्यवसायत्वं लक्ष्यते । तथाचाप्रतिबद्धयावत्स्वाश्रयग्राहकानुव्यवसायग्राह्यमित्येव पर्यवस्यति । नञ्द्वयगर्भतयोक्तिस्तूपपादनाय । यथाश्रुते प्रामाण्यानुमितेरपि ज्ञानग्राहकत्वेन तदतिरिक्तानपेक्षत्वस्य न्यायमतसाधारण्येन सिद्धसाधनतापत्तेरिति ध्येयम्।

अत्र ग्राह्यप्रामाण्यस्याप्रामाण्यशङ्कादिना प्रतिबद्धानुव्यवसायग्राह्यत्वाभावेन बाधवारणायाप्रतिबद्धेति विशेषणम् । न्यायमतेऽप्यनुव्यवसायविशेषग्राह्यत्वं प्रामाण्यस्याप्यस्तीति सिद्धसाधनतावारणाय यावदित्यनुव्यवसायविशेषणम्। ग्राह्यप्रामाण्ये यावदित्यनुव्यवसायग्राह्यत्वस्य बाधितत्वात्। स्वाश्रयग्राहकेति स्वाश्रयग्राहकज्ञानमात्रविवक्षायां 'ज्ञानं गुणः' 'घटज्ञानम्' इत्यादिशब्दजन्यस्वाश्रयविषयकज्ञानग्राह्यत्वाभावेन पुनर्बाध एव ततोऽनुव्यवसाय इति । अनुव्यवसायशब्देन च प्रत्यक्षमेव विवक्षितमतो न कोऽपि दोष इति।

अत्रेदमस्वरसबीजम्। प्रामाण्याप्रामाण्ययोर्ज्ञानकारणमात्रजन्यत्वे एकत्रैव ज्ञाने तयोरुत्पत्त्या तद्विषये वैरूप्यं स्यात्। नच यदा ज्ञानकारणं गुणोपेतं तदा तत्र प्रामाण्यमेवोत्पद्यते। अप्रामाण्यजननशक्तेः गुणेन प्रतिबन्धात्। एवं यदा दोषोपेतं तदाऽप्रामाण्यमेव दोषेण प्रामाण्यजननशक्तिप्रतिबन्धादिति वाच्यम्। ज्ञाने उभयाकारयोरिव करणेऽपि तदुभयाकारजननशक्त्योः विरुद्धत्वेन युगपदङ्गीकर्तुमनुचितत्वात्। वेदेऽप्रामाण्यजननशक्तिप्रतिबन्धकगुणनिरूपणाच्च। एवं तयोर्ज्ञानग्राहकमात्रग्राह्यत्वे एकत्रैव ज्ञाने उभयग्रहापत्त्या न कुत्रापि निःशङ्काव्यवहारादिकं स्यात्। तदुभयसंशयश्च क्वापि न स्यादित्यादिकं द्रष्टव्यम्। नैयायिकादय इत्यादिपदेन वैशेषिकाणां ग्रहणम्। उत्पत्तौ परतस्त्वं निर्वक्ति- **ज्ञानेति**॥ प्रमाप्रमासाधारणधर्मावच्छिन्नकार्यतानिरूपितकारणता-

श्रयातिरिक्तकारणजन्यत्वमित्यर्थः । अतः स्वतस्त्वनयेऽपि प्रत्यक्षरूप-ज्ञानप्रामाण्यस्याप्यनुमितिरूपज्ञानजनकलिङ्गज्ञानातिरिक्तचक्षुर्जन्यत्वेन सिद्धसाधनतेति शङ्कानवकाशः । ज्ञप्तौ तन्निर्वक्ति- **ज्ञानेति** ॥ उक्तानुव्यव-सायातिरिक्तप्रमाणेनैव ग्राह्यत्वमित्यर्थः । अन्यथा प्रामाण्यस्य ज्ञानग्राहकानु-व्यवसायातिरिक्तप्रामाण्या-नुमित्यादिग्राह्यत्वं स्वतस्त्वनयेऽपीति सिद्धसाधनता स्यादिति द्रष्टव्यम् । उत्पत्तौ परतस्त्वमुपपादयति- **तत्रेति** ॥ ज्ञप्तौ तदुपपादयति- **एवमिति** ॥ अत्राप्रामाण्यस्योत्पत्तिज्ञप्त्योः परतस्त्वं युक्तम् । प्रामाण्यस्य चोत्पत्तौ परतस्त्वं तावन्न युक्तम् । अनित्यप्रमामात्रेऽनुगतगुणाभावात् । नच प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षस्यानुमितिप्रमायां सल्लिङ्गपरामर्शस्य शब्दप्रमायामाप्तोक्तत्वस्य गुणत्वं सम्भवतीति वाच्यम् । पीतः शङ्ख इति भ्रमस्थले भूयोऽवयवेन्द्रियसन्निकर्षेऽपि श्वैत्यप्रमानुदयात् । दोषस्य प्रतिबन्धकत्वे चावश्यकत्वाद् दोषाभावसहकृतेन्द्रियादेव प्रमाऽस्तु । गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यत्र सल्लिङ्गपरामर्शसत्त्वेऽपि अनुमितिप्रमाभावेन न तस्यापि गुणत्वम् । बाधस्य तत्र प्रतिबन्धकत्वे च दोषाभावसहकृतानुमिति-सामान्यसामग्रीत एवानुमितिप्रमाऽस्तु । किमसाधारणगुणेन । बाधाभावस्य च विषयसत्त्वापर्यवसन्नस्य प्रमामात्रसाधारण्येनानुमितिप्रमामात्रे गुणत्वासम्भ-वात् । संवादिशुकबालादिवाक्यजप्रमायामाप्तोक्तत्वगुणाभावेनाप्रमात्वा-पातात् । ईश्वरसिद्धेश्च प्रमाया गुणजन्यसिद्ध्युत्तरकालीनत्वेन नेश्वररूपात् तमादाय तत्रोक्तदोषपरिहारः ।

प्रकारान्तरेणेश्वरसिद्धावपि तज्ज्ञानादेराप्त्यन्तर्गतस्य जन्यमात्रसाधारण्येन शब्दः प्रमायामसाधारण्ये मानाभावाच्च । शाब्दप्रमायां योग्यतैव गुण इति चेत् । अर्थरूपयोग्यतायाः प्रमामात्रसाधारण्यात्, असाधारण्येन योग्यतानिर्वचनेऽपि मदिष्टवेदापौरुषेयत्वाविरोधित्वेन त्वदिष्टेश्वरसिद्ध्यननुगुणत्वेन चैवंविधगुण-

जन्यत्वस्य साधनेऽर्थान्तरत्वापातात् । तस्मात् प्रामाण्यस्य नोत्पत्तौ परतस्त्वम् । नापि ज्ञप्तौ । संवादादिरूपहेत्वभावेऽपि सुखादिज्ञानप्रामाण्यग्रहणात् । बाह्यार्थज्ञानप्रामाण्यग्रहणेऽपि संवादादेरप्रामाण्यशङ्कानिरासोपक्षीणत्वेन न हेतुत्वम् । संवादादिनाऽप्रामाण्यशङ्कापगमेऽप्रामाण्येऽनुव्यवसायग्राह्यत्वस्यानुभवसिद्धत्वात् । अन्यथाऽनवस्थानात् । प्रतिबद्धानुव्यवसायेन प्रामाण्यग्रहणेन संशयोपपत्तेरप्रतिबद्धतद्ग्राह्यत्वस्यैव स्वतस्त्वशब्दार्थत्वेनोक्तत्वादित्यादिबाधकमाविष्करोति । नैयायिका इत्यनेन बौद्धपक्षेऽप्यप्रामाण्यस्य स्वतस्त्वे सर्वत्राविश्वासेन निःशङ्कव्यवहारविलोपः प्रामाण्यपरतस्त्वे चानवस्थेति दूषणं स्फुटमेवेति नोक्तम् । **अङ्गीकुर्वाणा अपीति** ॥ अनेनायमेव स्वपक्षस्तदाऽयमुपपादनमेव न सम्मतमिति सूचयति- **ज्ञातताविशेषणेनेति** ॥ प्रमाहिततज्ज्ञानमेवेत्यर्थः । अत्रापि ज्ञानातिरिक्तज्ञातताया अप्रामाणिकत्वं प्रामाण्यसिद्धौ प्रमाहिततज्ज्ञाततासिद्धिः तत्सिद्धौ चासिद्धिरित्यन्योन्याश्रयत्वं चेत्यादि बाधकं च द्रष्टव्यम् ।

प्राभाकरमते तु वृत्तिज्ञानस्य जडत्वेन स्वप्रकाशत्वानुपपत्तिः । अप्रामाण्यस्य बाधबोध्यस्यापलापायोगश्चेत्यरुचिर्द्रष्टव्या ।

पूर्वं सूचिते स्वमते तावत् प्रामाण्यस्योत्पत्तौ स्वतस्त्वमुपपादयति- **इन्द्रियादीति** ॥ **अकिञ्चित्करा** उक्तरीत्या व्यभिचारादिति भावः । अप्रामाण्यस्योत्पत्तौ परतस्त्वं स्वयमुपपादयति- **अप्रामाण्यमिति** ॥ अव्यभिचारादिति भावः । प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वं स्वयमुपपादयति- **तथेति** ॥ निरुक्तानुव्यवसाय एवास्मन्मते साक्षिरूप इति भावः । **साक्षिणैवेति** ॥ साक्षिणा ज्ञायत एवेत्यर्थः । तेनानुमित्यादिनाऽपि प्रामाण्यग्रहणेन यथाश्रुतमयुक्तमिति शङ्कानवकाशः । अप्रामाण्यस्य ज्ञप्तौ परतस्त्वमुपपादयति- **अप्रामाण्येति** ॥ अनुमेयमिति तु सम्भवादिनेति शेषः । इदं काचित्कत्वाभिप्रायेण । वस्तुतस्तु विसंवादिसापेक्ष-

साक्षिविषयत्वमप्रामाण्यस्य। नचैवं स्वतस्त्वापत्तिः। साक्षिणाऽप्रामाण्यग्रहणे नियमेन विसंवादापेक्षणात् तस्य परतस्त्वोपपत्तेः। ननु सर्वत्रानुमेयमेवाप्रामाण्यम्।

'भ्रमत्वमभ्रमत्वं च यदैवानुभवोपगम्।'

इत्याचार्योक्तेः। विसंवादिसापेक्षसाक्षिवेद्यत्वस्य टीकाकारैरेवात्र कथितत्वाच्च। आचार्या इति॥ 'प्रामाण्यं च स्वत एव परतोऽप्रामाण्यम्' इत्यादितदुक्तिरिति भावः॥

करणानां तु ज्ञानजनकत्वशक्तिरेव स्वकारणासादिता प्रामाण्यजनकत्वशक्तिः। अप्रामाण्यजनने त्वन्या शक्तिर्दोषवशादाविर्भवति। ज्ञप्तिस्तु परत एव। इन्द्रियादिस्वरूपस्य यथायथं स्वप्रमाणवेद्यत्वात्। यथार्थज्ञानसाधनत्वस्यानुमानवेद्यत्वादिति।

तदेवंभूतैः प्रमाणैः पदार्थानां नित्यानित्यत्वादिकं निश्चित्य विषयेषु विरक्तस्य शमदमादिसम्पत्तिमतो वासुदेवैकशरणस्य तद्विषयाणि श्रवणमननिदिध्यासनान्यादरनैरन्तर्याभ्यां बहुकालमनुष्ठितवतो भगवत्साक्षात्कारे सत्यत्युद्रिक्तया भक्त्या भगवत्प्रसादादशेषानिष्टनिवृत्तिविशिष्टानन्दादि-स्वरूपाविर्भावलक्षणा मुक्तिर्भवतीति।

जयतीर्थमुनीन्द्रेण बालबोधाय निर्मिता।
प्रमाणपद्धतिर्भूयात् प्रीत्यै माधवमध्वयोः॥

॥ इति श्रीमज्जयतीर्थपूज्यचरणविरचितप्रमाणपद्धतावागमपरिच्छेदः सम्पूर्णः॥

॥ ग्रन्थश्चायं सम्पूर्णः॥

(राघ.) **स्वकारणेति** ।। इन्द्रियादिकरणानां कारणेन या ज्ञानजनना शक्तिरुत्पन्ना सैव तेषां कारणेन **आसादिता** सम्पादिता प्रामाण्यशक्तिरित्यर्थः । अत्र विशेषः करणगताया यथार्थज्ञानजननशक्तेः करणगता करणहेत्वासादिता सहजा या ज्ञानजननशक्तिस्तद्वत्सहजत्वं वा तदभिन्नत्वं वेति तर्कताण्डवोक्तदिशा ध्येयः । एवं भ्रमस्थले दोषेण प्रामाण्यजननशक्तिप्रतिबन्धेऽपि न ज्ञानानुत्पत्तिशङ्का । तच्छक्तेरप्रतिबन्धात् । अभेदपक्षे तु प्रामाण्यांश एव प्रतिबन्धो न ज्ञानांश इति फलबलात् कल्प्यमिति । शक्तिभेदपक्षे द्वयोः सहजत्वान्न परतस्त्वापत्तिः । अत एवाह- **अप्रामाण्यजनने त्वित्यादि** ।। तत्र ज्ञानजननाप्रामाण्यजननशक्त्योर्भेदेऽप्यन्यस्याहितत्वेन सहजत्वाभावात् परतस्त्वमित्यर्थः । **यथायथमिति** ।। बाह्येन्द्रियस्वरूपं रूपज्ञानादिलिङ्गगम्यम् । मनस्तु साक्षिगम्यम् । लिङ्गशब्दस्वरूपं तु चक्षुःश्रोत्रादिप्रत्यक्षगम्यम् । इन्द्रियलिङ्गशब्दरूपत्रयस्यापि यथार्थज्ञानसाधनत्वरूपं प्रामाण्यं तु संवादिज्ञानजनकत्वादिलिङ्गेनानुमेयमिति स्वरूपग्राहकातिरिक्तग्राह्यतया परतस्त्वं तत्प्रामाण्यस्येत्यर्थः । तर्कताण्डवे ''या तु पद्धतौ ज्ञप्तिस्तु परत एवेत्युक्तिः सा करणस्वरूपग्राहकमात्रग्राह्यत्वं नेत्यभिप्रेत्य । 'ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य ग्राह्यत्वं स्वतस्त्वम्' इति सुधोक्त्या विवक्षाभेदेन स्वतस्त्वमपि करणानां ज्ञप्तौ ध्येयम्'' इत्युक्तम् ।

निरूपितप्रमाणस्वरूपस्योपयोगं वदन् परम-पुमर्थेन संयोगमाह - **तदेवमिति** ।। **तत्** तस्मादर्थाव्यभिचारित्वाद् **एवंभूतैः** सम्यक् परीक्षितैः प्रत्यक्षादिप्रमाणैर्नित्यानित्यत्वसारासारपरमपुरुषार्थत्वाताद्दशत्वादिकं निश्चित्यानित्यासारादिरूपविषयेषु **विरक्तस्य** निवृत्तमनस्कस्य । शमदमादीत्यादिपदेन 'शान्तो दान्त उपरतस्तितिक्षुः समाहितः' इति श्रुत्युक्तग्रहः । श्रवणं गुरूपदेशजन्यं वाक्यार्थज्ञानम् । मननं तु गुरूपदेशादवगतार्थे युक्त्यनुसन्धानम् । निदिध्यासनं

नाम श्रवणमननाभ्यामुत्पन्नतत्त्वनिश्चयजन्यसंस्कारपरिणामरूपं भगवद्विग्रहस्य मनसा निरन्तरावलोकनम्। **आदरनैरन्तर्याभ्यामिति** ।। **आदरः** स्नेहविशेषः। **नैरन्तर्यम्** अविच्छिन्नता। **ताभ्याम्**। **आनन्दादीति** ।। ज्ञानबलप्रकाशादि-रादिपदार्थः। कृतं प्रकरणमवान्तरप्रयोजनं सूचयन् भगवति गुरौ चार्पयति-**जयतीर्थेति** ।।

।। इति श्रीप्रमाणपद्धतिभावदीपे श्रीसुधीन्द्रगुरुपादशिष्यराघवेन्द्रभिक्षुकृते शब्दप्रकरणम् ।।

प्रमाणपद्धतेर्भावदीपो योऽयं विनिर्मितः।
राघवेन्द्रेण तेन स्यात् प्रीतो विष्णुस्सदा मम ।। १ ।।

कल्याणगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ।। २ ।।

।। सम्पूर्णः ।।

(वेदे.) इदानीं करणगतयाथार्थ्यं ज्ञानजनकत्वशक्तिरूपप्रामाण्यस्योत्पत्तौ स्वतस्त्वमुपपादयति- **करणानां त्विति** ।। तुशब्देनात्रत्यस्वतस्त्वविशेषं सूचयति। ज्ञानजनकशक्त्यभिन्नत्वं वा तज्जनकमात्रजन्यत्वं चोक्तरूपकरणप्रामाण्ये स्वतस्त्वमिति। करणगतायथार्थजनकत्वशक्तिरूपाप्रामाणस्य तु ज्ञानजनकत्व-शक्तिभिन्नत्वं वा तज्जनकातिरिक्तजन्यत्वं वा परतस्त्वं विवक्षितमित्यभि-प्रेत्योपपादयति- **अप्रामाण्येति** ।। **आविर्भवति** जायते। करणप्रामाण्यस्य ज्ञप्तिप्रकारमाह- **ज्ञप्तिरिति** ।। अत्र परत एवेत्युक्तिः स्वाश्रयीभूतकरणग्राहक-मात्रग्राह्यत्वरूपस्वतस्त्वं नेत्यभिप्रेत्य। वस्तुतस्त्वत्रापि ज्ञानजनकमात्र-ग्राह्यत्वरूपं स्वतस्त्वमेव विवक्षितम्। अत एव सुधायां 'करणानां ज्ञप्तौ स्वतस्त्वं

नास्त्येवेत्यादिना' इममेव पक्षमुक्त्वा। 'अथवा, ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य तदीयस्य ग्राह्यत्वं स्वतस्त्वम्' इति पक्षान्तर-मुक्तम् । **यथायथमिति** ।। इन्द्रियस्वरूपस्यानुमानेन, लिङ्गस्वरूपस्य प्रत्यक्षादिना, आगमस्वरूपस्य श्रोत्रेण वेद्यत्वादित्यर्थः । **अनुमानेनेति** ।। तदन्वयव्यतिरेकानुविधायीत्युक्तस्वरूपेत्यर्थः ।

प्रेक्षावत्प्रवृत्त्यै स्वग्रन्थस्याधिकार्यादिकं दर्शयन् मोक्षसम्बन्धमाह - **तदिति** ।। **एवम्भूतैः** आभासविविक्तैः । अत्र षष्ठ्यन्तैरधिकारिस्वरूपमुक्तम् । भगवत्प्रसादादित्यनेन भगवानेव विषय इति सूचितम् । मुक्तिस्वरूपे वादिविवादात् तत्स्वरूपनिर्धारणायाह- **अशेषेति** ।। अवशिष्टेन प्रकरणस्य मुक्तिं प्रति परम्परया साधनस्यैवोपपादनम् । अत्र सर्वत्रागमादिप्रमाणमन्यत्रोदाहृतं द्रष्टव्यमित्यशेष-मतिमङ्गलम् ।। छ ।। छ ।।

तर्कताण्डवसन्न्यायसुधादौ यः प्रपञ्चितः ।
भावो जयमुनेरत्र स एवाल्पतयेरितः ।।

यो वासवीनयनकञ्जविकासभानुरानन्दतीर्थहृदयाम्बुजसन्निविष्टः ।
कृष्णः स तुष्टिमुपयातु सदिष्टहेतुदृष्टिर्मदीयकरणात् स्वव्रतादमुष्मात् ।।

।। इति श्रीवेदेशतीर्थविरचिते श्रीमज्जयतीर्थकृतप्रमाणपद्धतेर्भावविवरणे तृतीयपरिच्छेदः समाप्तः ।।

ಪರಿಶಿಷ್ಟ

ಲಕ್ಷಣಂ

ಯೋ ಧರ್ಮೋ ಲಕ್ಷ್ಯೇ ವರ್ತತೇ ನ ವರ್ತತೇ ಚಾನ್ಯತ್ರ ಸ ಧರ್ಮೋ ಲಕ್ಷಣಮಿತ್ಯುಚ್ಯತೇ। ಪರಿಷ್ಕಾರಸ್ತು - ಲಕ್ಷ್ಯತಾವಚ್ಛೇದಕಾಭಿವ್ಯಂಗ್ಯ ಸಾದೃಶ್ಯಪ್ರತಿಯೋಗೀತರ-ಯಾವದ್‌ವೃತ್ತಿಸಾದೃಶ್ಯಾನಿರೂಪಕತ್ವೇ ಸತಿ ಲಕ್ಷ್ಯತಾವಚ್ಛೇದಕಾ-ಭಿವ್ಯಂಗ್ಯಸಾದೃಶ್ಯಪ್ರತಿಯೋಗಿಯಾವದ್‌ವೃತ್ತಿವೃತ್ತಿಸಾದೃಶ್ಯಪ್ರತಿಯೋಗಿತ್ವಂ।

ಅಲಕ್ಷಣಂ

ಅನ್ಯಥಾಭೂತಂ ತು (ಲಕ್ಷಣಭಿನ್ನಂ ತು) ಅಲಕ್ಷಣಂ

ಅಸಂಭವಿ

ಯತ್ ಲಕ್ಷ್ಯೇ ಸರ್ವಥಾ ನ ವರ್ತತೇ । ಯಥಾ ಗೋಃ ಏಕಶಫವತ್ವಂ।

ಅವ್ಯಾಪಕಂ

ಯತ್ ಲಕ್ಷ್ಯೈಕದೇಶೇ ವರ್ತಮಾನಮಪಿ ತದೇಕದೇಶೇ ನ ವರ್ತತೇ। ಯಥಾ ಗೋಃ ಶಬಲತ್ವಂ।

ಅತಿವ್ಯಾಪಕಂ

ಯತ್ ಲಕ್ಷ್ಯಾದನ್ಯತ್ರಾಪಿ ವರ್ತತೇ। ಯಥಾ ಗೋಃ ಶೃಂಗಿತ್ವಂ।

ಪ್ರಮಾಣಂ

↓

(ಯಥಾರ್ಥಂ ಪ್ರಮಾಣಂ)

(ಸಾಕ್ಷಾದ್ ವಾ ಸಾಕ್ಷಾಜ್‌ಜ್ಞೇಯವಿಷಯೀಕಾರಿಜ್ಞಾನಸಾಧನತ್ವೇನ ವಾ ಯಥಾವಸ್ಥಿತಜ್ಞೇಯವಿಷಯೀಕಾರಿತ್ವಂ)

ಕೇವಲಪ್ರಮಾಣಂ

(ಯಥಾರ್ಥಜ್ಞಾನಂ)

ಅನುಪ್ರಮಾಣಂ

(ಯಥಾರ್ಥಜ್ಞಾನಸಾಧನಂ)

- ಕೇವಲಪ್ರಮಾಣಂ (ಯಥಾರ್ಥಜ್ಞಾನಂ)
  - ಈಶ್ವರಜ್ಞಾನಂ
  - ಲಕ್ಷ್ಮೀಜ್ಞಾನಂ
  - ಯೋಗಿಜ್ಞಾನಂ
    - ಋಜುಯೋಗಿಜ್ಞಾನಂ
      - ಸ್ವರೂಪಂ
      - ಮನೋವೃತ್ತಿರೂಪಂ
    - ತಾತ್ತ್ವಿಕಯೋಗಿಜ್ಞಾನಂ
      - ಸ್ವರೂಪಂ
      - ಬಾಹ್ಯಂ (ಮನೋವೃತ್ತಿರೂಪಂ)
    - ಅತಾತ್ತ್ವಿಕಯೋಗಿಜ್ಞಾನಂ
      - ಸ್ವರೂಪಂ
      - ಬಾಹ್ಯಂ
  - ಅಯೋಗಿಜ್ಞಾನಂ
    - ಮುಕ್ತಿಯೋಗ್ಯಾಃ
      - ಸ್ವರೂಪಂ
      - ಬಾಹ್ಯಂ
    - ನಿತ್ಯಸಂಸಾರಿಣಃ
      - ಸ್ವರೂಪಂ
      - ಬಾಹ್ಯಂ
    - ತಮೋಯೋಗ್ಯಾಃ
      - ಸ್ವರೂಪಂ
      - ಬಾಹ್ಯಂ


ಅನುಪ್ರಮಾಣಂ (ಯಥಾರ್ಥಜ್ಞಾನಸಾಧನಂ)
ಪ್ರತ್ಯಕ್ಷಂ
ಅನುಮಾನಂ
ಆಗಮಃ
ಈಶ್ವರಪ್ರತ್ಯಕ್ಷಂ
ಲಕ್ಷ್ಮೀಪ್ರತ್ಯಕ್ಷಂ
ಯೋಗಿಪ್ರತ್ಯಕ್ಷಂ
ಅಯೋಗಿಪ್ರತ್ಯಕ್ಷಂ
ಪೌರುಷೇಯಃ
ಅಪೌರುಷೇಯಃ
ಸ್ವರೂಪಂ
ಬಾಹ್ಯಂ
ಸ್ವರೂಪಂ
ಬಾಹ್ಯಂ
ಉತ್ತಮಾನಾಂ
ಅಧಮಾನಾಂ
ಮಧ್ಯಮಾನಾಂ
ದೈವಂ
ಆಸುರಂ
ಮಧ್ಯಮಂ


ಅನುಮಾನಂ
ಕಾರ್ಯಾನುಮಾನಂ
ಕಾರಣಾನುಮಾನಂ
ಅಕಾರ್ಯಕಾರಣಾನುಮಾನಂ
ಸಾಧನಾನುಮಾನಂ
ದೂಷಣಾನುಮಾನಂ
ಸ್ವಾರ್ಥಂ
ಪರಾರ್ಥಂ
ದುಷ್ಟಪ್ರಮಿತಿಸಾಧನಂ
ತರ್ಕಃ

- ಅನುಮಾನದೋಷಾಃ
  - ವಿರೋಧಃ
    - ಕಥಾರೂಪಸಾಧಾರಣಃ
    - ಅನುಮಾನನಿಷ್ಠಃ
      - ಪ್ರತಿಜ್ಞಾವಿರೋಧಃ
        - ಪ್ರಮಾಣವಿರೋಧಃ
          - ಪ್ರಬಲಪ್ರಮಾಣಭೂತೈಃ ಪ್ರತ್ಯಕ್ಷಾನುಮಾನಾಗಮೈಃ ವಿರೋಧಃ
            - ಪ್ರಾಬಲ್ಯಂ ಚ
              - ಬಹುತ್ವೇನ
              - ಸ್ವಭಾವತ್ವೇನ
                - ಉಪಜೀವ್ಯತ್ವೇನ
                - ನಿರವಕಾಶತ್ವೇನ
          - ಸಮಬಲಪ್ರಮಾಣ-ಭೂತೈಃ ಪ್ರತ್ಯಕ್ಷಾನು-ಮಾನಾಗಮೈಃ ವಿರೋಧಃ
        - ಸ್ವವಚನವಿರೋಧಃ
          - ಅಪಸಿದ್ಧಾಂತಃ
          - ಜಾತಿಃ
      - ಹೇತುವಿರೋಧಃ
        - ಅಸಿದ್ಧಿಃ
        - ಅವ್ಯಾಪ್ತಿಃ
      - ದೃಷ್ಟಾಂತವಿರೋಧಃ
        - ಸಾಧ್ಯವೈಕಲ್ಯಂ
        - ಸಾಧನವೈಕಲ್ಯಂ
  - ಅಸಂಗತಿಃ
  - ಆಧಿಕ್ಯಂ
  - ನ್ಯೂನತಾ

ಹೇತ್ವಾಭಾಸಾಃ

- ಅಸಿದ್ಧಃ
  - ವ್ಯಾಪ್ಯತ್ವಾಸಿದ್ಧಃ
    1. ಸಾಧ್ಯಸಂಬಂಧರಹಿತಃ
    2. ಸೋಪಾಧಿಕಸಂಬಂಧಶ್ಚ
  - ಆಶ್ರಯಾಸಿದ್ಧಃ
    1. ಅಸದಾಶ್ರಯಃ
    2, ಸಿದ್ಧಸಾಧನಃ
  - ಪಕ್ಷಧರ್ಮತ್ವಾಸಿದ್ಧಃ
    1. ವ್ಯಧಿಕರಣಾಸಿದ್ಧಃ
    2. ವ್ಯರ್ಥವಿಶೇಷಣಾಸಿದ್ಧಃ
    3. ವ್ಯರ್ಥವಿಶೇಷ್ಯಾಸಿದ್ಧಃ
  - ಏತತ್ತ್ರಮಿತ್ಯಸಿದ್ಧಃ (ಅಜ್ಞಾನಾಸಿದ್ಧಃ)
- ವಿರುದ್ಧಃ
- ಅನೈಕಾಂತಿಕಃ
- ಅನಧ್ಯವಸಿತಃ
- ಕಾಲಾತ್ಯಯಾಪದಿಷ್ಟಃ
- ಸತ್ಪ್ರತಿಪಕ್ಷಃ
- ಪ್ರಕರಣಸಮಃ

  - ಸಪಕ್ಷವಿಪಕ್ಷರಹಿತಃ
  - ಸಪಕ್ಷವಿಪಕ್ಷೋಭಯವಾನ್
  - ಸಪಕ್ಷವಾನ್ ವಿಪಕ್ಷರಹಿತಶ್ಚ

ಪರೇಷಾಂ ಪ್ರಮಾಣಲಕ್ಷಣಾನಿ ತನ್ನಿರಾಸಶ್ಚ

ವಾದಿನಃ	ಲಕ್ಷಣಂ	ತನ್ನಿರಾಸಃ
ಪ್ರಾಭಾಕರಾಃ	ಅನುಭೂತಿಃ (ಸ್ಮೃತಿವ್ಯತಿರಿಕ್ತಂ ಜ್ಞಾನಂ) ಪ್ರಮಾಣಂ	ಸಂಶಯವಿಪರ್ಯಯೋರತಿವ್ಯಾಪ್ತತ್ವಾತ್, ಸ್ಮೃತೌ, ವೇದಾದಿಷು ಚ ಅವ್ಯಾಪ್ತತ್ವಾತ್ ಅಯುಕ್ತಂ ।
ಭಾಟ್ಟಾಃ	ಜ್ಞಾತತಾ-ಪ್ರಾಕಟ್ಯಾಪರಪರ್ಯಾಯವಾಚ್ಯಸ್ಯ ಪ್ರಮೇಯಾಶ್ರಿತಸ್ಯ ಪ್ರಕಾಶವಿಶೇಷಸ್ಯ ಸಾಧನಂ ಪ್ರಮಾಣಂ ।	ಜ್ಞಾನವ್ಯತಿರಿಕ್ತಾಯಾಂ ಜ್ಞಾತತಾಯಾಂ ಪ್ರಮಾಣಾಭಾವೇನ ಅಸಂಭಾವಿತತ್ವಾತ್, ಅತೀತಾದಿವಿಷಯಜ್ಞಾನಾನಾಂ ಆಶ್ರಯಾಭಾವೇನ ತಜ್ಜನಕತ್ವಾಯೋಗಾಚ್ಚ ತಥಾ ವೇದಾದಿಷು ಅವ್ಯಾಪ್ತೇಶ್ಚ ಅಯುಕ್ತಂ।
ಭಾಟ್ಟಾಃ	ಅನಧಿಗತ-ತಥಾಭೂತಾರ್ಥಜ್ಞಾನಂ ಪ್ರಮಾಣಂ ಇತಿ ತೇಷಾಮೇವ ಲಕ್ಷಣಾಂತರಂ ।	ಸ್ಮೃತೌ ವೇದಾದಿಷು ಚ ಅವ್ಯಾಪ್ತೇಃ ಅಯುಕ್ತಂ ।
ನೈಯಾಯಿಕಾಃ	ಸಮ್ಯಗನುಭವಸಾಧನಂ ಪ್ರಮಾಣಂ ।	ಯಥಾರ್ಥಜ್ಞಾನೇ ಅವ್ಯಾಪ್ತೇಃ ಅಯುಕ್ತಂ ।
ಉದಯನಃ	ಪ್ರಮಾವ್ಯಾಪ್ತಂ ಪ್ರಮಾಣಂ ।	ಸರ್ವಸ್ಯ ಪ್ರಮೇಯಸ್ಯ ಈಶ್ವರಪ್ರಮಾವ್ಯಾಪ್ತತ್ವೇನ ಅತಿವ್ಯಾಪ್ತತ್ವಾತ್ ಅಯುಕ್ತಂ ।
ಉದಯನಃ	ಸಾಧನಾಶ್ರಯಯೋರನ್ಯತರತ್ವೇ ಸತಿ ಪ್ರಮಾವ್ಯಾಪ್ತಂ ಪ್ರಮಾಣಂ ।	ದ್ವಿತೀಯಲಕ್ಷಣೇ ಆಶ್ರಯಗ್ರಹಣವೈಯರ್ಥ್ಯಂ । ಕರ್ತರಿ ಪ್ರಮಾಣಶಬ್ದಸ್ಯಾನನುಶಾಸನಾತ್ ಈಶ್ವರಸ್ಯ ಪ್ರಾಮಾಣ್ಯಸಿದ್ಧ್ಯರ್ಥಂ ತತ್ ಇತಿ ವಕ್ತುಂ ನ ಶಕ್ಯತೇ । ಯಥಾರ್ಥಜ್ಞಾನೇ ಅವ್ಯಾಪ್ತೇಶ್ಚ ಅಯುಕ್ತಂ ।

ವಿಪರ್ಯಯಃ

ವಾದಿನಃ	ಮತಭೇದಃ	ತನ್ನಿರಾಕರಣಂ
ಪ್ರಾಭಾಕರಾಃ	ಅಯಥಾರ್ಥಜ್ಞಾನಮೇವ ನಾಸ್ತಿ । ಇದಂ ರಜತಂ ಇತ್ಯತ್ರ ಇದಮಿತ್ಯನುಭವಃ । ರಜತಮಿತಿ ಸ್ಮರಣಂ । ಅನುಭವ-ಸ್ಮರಣಯೋಃ ಭೇದಾಜ್ಞಾನೇನ ರಜತಾರ್ಥಿನಃ ಶುಕ್ತೌ ಪ್ರವೃತ್ತಿಃ । ನ ತು ಏಕಮೇವ ಜ್ಞಾನಂ ಇತಿ ವದಂತಿ ।	ಅಯಥಾರ್ಥಜ್ಞಾನಸ್ಯ ಅನುಭವಸಿದ್ಧತ್ವಾತ್, ಏತಾವಂತಂ ಕಾಲಂ ಅಹಂ ಶುಕ್ತಿಕಾಮೇವ ರಜತತ್ವೇನ ಪ್ರತಿಪನ್ನೋಽಸ್ಮಿ ಇತ್ಯುತ್ತರಕಾಲೇ ಪರಾಮರ್ಶಾಚ್ಚ ಅಯುಕ್ತೋಽಯಂ ಪಕ್ಷಃ।
ವೈಶೇಷಿಕಾಃ	ಇದಂ ರಜತಮಿತ್ಯತ್ರ ಪ್ರತೀತಂ ರಜತಂ ದೇಶಾಂತರೇ ಸದೇವ ಇತಿ ವದಂತಿ ।	'ಅಸದೇವ ರಜತಂ ಪ್ರತ್ಯಭಾತ್' ಇತ್ಯುತ್ತರಕಾಲೀನಾನುಭವಾತ್ ಶುಕ್ತಿರೇವಾತ್ಯಂತಾಸದ್ರಜತಾತ್ಮನಾ ಪ್ರತಿಭಾತೀತಿ ಸಿದ್ಧೇಃ ಏತತ್ಪಕ್ಷಚತುಷ್ಟಯಮಪ್ಯಯುಕ್ತಂ ।
ವಿಜ್ಞಾನವಾದಿನಃ	ಇದಂ ರಜತಮಿತಿ ಜ್ಞಾನಸ್ವರೂಪಮೇವ ರಜತಮಿತಿ ವದಂತಿ ।	
ಭಾಸ್ಕರ ಆಚಾರ್ಯಾಃ	ಇದಂ ರಜತಮಿತ್ಯತ್ರ ತತ್ರೈವ ತಾತ್ಕಾಲಿಕಮುತ್ಪನ್ನಂ ರಜತಂ ಸತ್ ಇತಿ ವದಂತಿ	
ಮಾಯಾ-ವಾದಿನಃ	ಬಾಧಿತತ್ವಾತ್ ನ ಸತ್ । ಪ್ರತೀತತ್ವಾತ್ ನ ಅಸತ್ । ವಿರುದ್ಧತ್ವಾತ್ ನ ಸದಸತ್ । ಕಿಂತು ಸದಸದ್ವಿಲಕ್ಷಣಂ ಅನಿರ್ವಚನೀಯಮಿತಿ ವದಂತಿ ।	

ಅಯಥಾರ್ಥಜ್ಞಾನಾಂತರನಿರಾಕರಣಂ

ಅಯಥಾರ್ಥ-ಜ್ಞಾನಾಂತರಂ	ತನ್ನಿರೂಪಣಂ	ತೇಷಾಮಂತರ್ಭಾವಕಥನಂ
ಅನಧ್ಯವಸಾಯಃ	ಕಿಂಸಂಜ್ಞಕೋಽಯಂ ವೃಕ್ಷಃ ಇತ್ಯಾದಿ ।	ಅತ್ರ ಕೋಟೀನಾಮತಿಬಾಹುಲ್ಯಾತ್ ಅನಿರ್ದಿಷ್ಟಕೋಟಿಕಃ ಸಂಶಯ ಏವಾಯಂ । ವಟಾದಿವ್ಯಾವೃತ್ತಿಂ ಪಶ್ಯತೋಽಪಿ ಪನಸೇಯತ್ಕಿಂಚಿತ್‌ಸಂಜ್ಞಕೋಽಯಂ ವೃಕ್ಷ ಇತಿ ಜ್ಞಾನಂ ಉತ್ಪದ್ಯತೇ। ಸ ತು ಜ್ಞಾನಮೇವ ನ ಭವತಿ ಕಿಂತು ಸಂಜ್ಞಾವಿಷಯಂ ಜಿಜ್ಞಾಸಾಮಾತ್ರಂ ।
ಸ್ವಪ್ನಃ	ಅಯಂ ಗಜಃ ಇತ್ಯಾದಿಜ್ಞಾನಂ	ಸ್ವಪ್ನೇಽಪಿ ಗಜಾದಿದರ್ಶನಂ ಚೇತ್ ಯಥಾರ್ಥಮೇವ ಗಜಾದೀನಾಂ ಮಾನಸವಾಸನಾಜನ್ಯತ್ವಾತ್ । ತೇಷು ಯತ್ ಬಾಹ್ಯತ್ವಜ್ಞಾನಂ ಸಃ ವಿಪರ್ಯಯ ಏವ ।
ಸಂಭಾವನಾ	ಬಾಹ್ಯಾಲೀಪ್ರದೇಶೇ ಪುರುಷೇಣಾನೇನ ಭವಿತವ್ಯಂ ಇತಿ ಊಹಾಪರನಾಮಕಂ ಜ್ಞಾನಂ ।	ಸಂಭಾವನಾಜ್ಞಾನಮಪಿ ಅನ್ಯತರಕೋಟಿಪ್ರಾಪಕಪ್ರಾಚುರ್ಯ-ನಿಮಿತ್ತಃ ಅನ್ಯತರಕೋಟಿಪ್ರಧಾನಃ ಸಂಶಯ ಏವ ।
ತರ್ಕಃ	ಕಸ್ಯಚಿದ್ಧರ್ಮಸ್ಯಾಂಗೀಕಾರೇ ಅರ್ಥಾಂತರಸ್ಯಾಪಾದನಂ । ಯಥಾ ಪರ್ವತೇ ಯದಿ ವಹ್ನಿರ್ನ ಸ್ಯಾತ್ ತರ್ಹಿ ಧೂಮಾಭಾವೋಽಪಿ ಸ್ಯಾದಿತ್ಯಾಪಾದನಂ ।	ತರ್ಕಃ ಅನುಮಾನೇ ಅಂತರ್ಭವತಿ । ಅತಃ ಸಃ ಯಥಾರ್ಥಶ್ಚೇತ್ ನ ವ್ಯಾವರ್ತ್ಯಃ । ಅಯಥಾರ್ಥಶ್ಚೇತ್ ಭ್ರಮಾನುಮಿತಿವತ್ ಸಂಗೃಹೀತ ಏವ । ನ ಅಯಥಾರ್ಥಾಂತರಂ ।

ವ್ಯಾಪ್ತಿವಿಚಾರಃ

ವ್ಯಾಪ್ತಿಗ್ರಾಹಕಾಣಿ ಪ್ರಮಾಣಾನಿ	ವ್ಯಾಪ್ತಿಃ= ಯದ್ದೇಶಕಾಲಸಂಬದ್ಧಸ್ಯ ಯಸ್ಯ ಯದ್ದೇಶಕಾಲಸಂಬದ್ಧೇನ ವಿನಾ ಯಾ ಅನುಪಪತ್ತಿಃ (ಸಾ ಅನುಪಪತ್ತಿರೇವ) ತದ್ದೇಶಕಾಲಸಂಬದ್ಧಸ್ಯ ತಸ್ಯ ತದ್ದೇಶಕಾಲಸಂಬದ್ಧೇನ ತೇನ ವ್ಯಾಪ್ತಿಃ ।	
ಪ್ರತ್ಯಕ್ಷಂ	ಭೂಯೋದರ್ಶನ-ವ್ಯಭಿಚಾರಾದರ್ಶನ-ಉಪಾಧ್ಯಭಾವಸಹಕೃತೇನ ಪ್ರತ್ಯಕ್ಷೇಣ	ಧೂಮಾಗ್ನ್ಯೋಃ ವ್ಯಾಪ್ತಿಜ್ಞಾನಂ ಜಾಯತೇ ।
ಅನುಮಾನಂ	ಪ್ರಾಣಾದಿಮತ್ತ್ವಂ ಸಾತ್ಮಕತ್ವವ್ಯಾಪ್ತಂ ಸಾತ್ಮಕತ್ವಾಭಾವ-ವ್ಯಾಪಕೀಭೂತಾಭಾವಪ್ರತಿಯೋಗಿತ್ವಾತ್ ಇತ್ಯನುಮಾನೇನ	ಪ್ರಾಣಾದಿಮತ್ತ್ವಸಾತ್ಮಕತ್ವಯೋರ್ವ್ಯಾಪ್ತಿಜ್ಞಾನಂ ಜಾಯತೇ।
ಆಗಮಃ	'ಬ್ರಾಹ್ಮಣೋ ನ ಹಂತವ್ಯಃ', 'ಗೌಃ ನ ಪದಾ ಸ್ಪ್ರಷ್ಟವ್ಯಾ' ಇತ್ಯಾದ್ಯಾಗಮೇನ	'ಬ್ರಾಹ್ಮಣತ್ವ-ಹಂತವ್ಯತ್ವಾಭಾವಯೋಃ' 'ಗೋತ್ವ-ಪದಾ ಸ್ಪ್ರಷ್ಟವ್ಯತ್ವಾಭಾವಯೋಃ' ವ್ಯಾಪ್ತಿಜ್ಞಾನಂ ಭವತಿ।

ಚತುಷ್ಟಯೀ ಖಲು ಧರ್ಮಾಣಾಂ ಗತಿಃ	ಉದಾಹರಣಾನಿ	ವ್ಯಾಪ್ತಿಃ
ಕೇಚಿತ್ ಸಮವೃತ್ತಯಃ	ನಿಷಿದ್ಧತ್ವ ಪಾಪಸಾಧನತ್ವೇ	ಪರಸ್ಪರಂ ವ್ಯಾಪ್ಯವ್ಯಾಪಕಭಾವವತೀ।
ಕೇಚಿತ್ ನ್ಯೂನಾಧಿಕವೃತ್ತಯಃ	ಧೂಮವತ್ತ್ವಾಗ್ನಿಮತ್ತ್ವೇ	ನ್ಯೂನವೃತ್ತಿ ವ್ಯಾಪ್ಯಮೇವ । ಅಧಿಕವೃತ್ತಿ ವ್ಯಾಪಕಮೇವ ।
ಕೇಚಿತ್ ಪರಸ್ಪರಂ ಪರಿಹಾರೇಣೈವ ವರ್ತಮಾನಾಃ	ಗೋತ್ವಾಶ್ವತ್ವೇ	ನ ಅನ್ಯೋನ್ಯಂ ವ್ಯಾಪ್ಯವ್ಯಾಪಕಭಾವವತೀ । (ಸಂಬಂಧಸ್ಯೈವಾಭಾವಾತ್)
ಕೇಚಿತ್ ಕ್ವಚಿತ್ ಸಮಾವಿಷ್ಟಾಃ ಅಪಿ ಕ್ವಚಿತ್ ಪರಸ್ಪರಪರಿಹಾರೇಣೈವ ವರ್ತಮಾನಾಃ	ಪಾಚಕತ್ವಪುರುಷತ್ವೇ	ನ ಅನ್ಯೋನ್ಯಂ ವ್ಯಾಪ್ಯವ್ಯಾಪಕಭಾವವತೀ । (ಸಂಬಂಧಸತ್ತ್ವೇಽಪಿ ವ್ಯಭಿಚಾರಾತ್)

ವ್ಯಾಪ್ತಿಪ್ರಕಾರಾಃ	ಉದಾಹರಣಾನಿ
ಕಯೋಶ್ಚಿತ್ ಸಮಾನದೇಶಕಾಲಯೋರ್ವ್ಯಾಪ್ತಿಃ	ಯಥಾ ರಸಸ್ಯ ರೂಪೇಣ ।
ಕಯೋಶ್ಚಿತ್ ಸಮಾನದೇಶತ್ವೇಽಪಿ ಭಿನ್ನಕಾಲಯೋರ್ವ್ಯಾಪ್ತಿಃ	ಯಥಾ ಧೂಮಸ್ಯ ಅಗ್ನಿನಾ ।
ಕಯೋಶ್ಚಿತ್ ಭಿನ್ನದೇಶಕಾಲಯೋಃ	ಯಥಾ ಅಧೋದೇಶೇ ನದೀಪೂರಸ್ಯ ಊರ್ಧ್ವದೇಶವೃಷ್ಟ್ಯಾ ।
ಕಯೋಶ್ಚಿತ್ ಸಮಾನಕಾಲತ್ವೇಽಪಿ ಭಿನ್ನದೇಶಯೋಃ	ಯಥಾ ಕೃತ್ತಿಕೋದಯಸ್ಯ ರೋಹಿಣ್ಯುದಯಸಾಮಗ್ರೀಸಮ್ಮೇಲನೇನ ।
ಕಸ್ಯಚಿತ್ಕಾದಾಚಿತ್ಕಸ್ಯ ಸಮಾನದೇಶತ್ವೇಽಪಿ ಸಾರ್ವಕಾಲೀನೇನ	ಯಥಾ ಪತನಸ್ಯ ಗುರುತ್ವೇನ ।
ಕಸ್ಯಚಿತ್ ಸಾರ್ವಕಾಲಿಕಸ್ಯ ಸಮಾನದೇಶತ್ವೇಽಪಿ ಕಾದಾಚಿತ್ಕೇನ	ಯಥಾ ಶರೀರತ್ವಸ್ಯ ವಿನಾಶೇನ ।
ಕಸ್ಯಚಿತ್ ಪ್ರದೇಶವರ್ತಿನಃ ವ್ಯಾಪ್ಯವರ್ತಿನಾ	ಯಥಾ ಸಂಯೋಗಸ್ಯ ದ್ರವ್ಯತ್ವೇನ ।
ಕಸ್ಯಚಿತ್ ವ್ಯಾಪ್ಯವರ್ತಿನಃ ಪ್ರದೇಶವರ್ತಿನಾ	ಯಥಾ ರೂಪಸ್ಯ ಸಂಯೋಗೇನ ।
ಕಯೋಶ್ಚಿತ್ ಏಕಾವಯವಿವರ್ತಿನೋರಪಿ ಅವಯವಭೇದೇನ । (ಅವಯವಭೇದೇನ ಏಕೈಕಾವಯವವರ್ತಿನೋರಪಿ ಪರಸ್ಪರಂ ವ್ಯಾಪ್ತಿಃ)	ಯಥಾ ತುಲೋನ್ನಮನಾವನಮನಯೋಃ । ತುಲಾಯಾಃ ಏಕಾವಯವೇ ಊರ್ಧ್ವಗಮನಸ್ಯ ಅವಯವಾಂತರೇ ಅಧೋಗಮನೇನ
ತಥಾ ಚ - ವ್ಯಾಪ್ತಿಜ್ಞಾನ-ತತ್ಸ್ಮರಣಸಹಿತಲಿಂಗಸ್ಯ ಸಮ್ಯಗ್ಜ್ಞಾನಂ (ಸಮ್ಯಗ್ಜ್ಞಾತಂ ವಾ ಲಿಂಗಂ) ವ್ಯಾಪ್ತಿಪ್ರಕಾರಾನುಸಾರೇಣ ಸಮುಚಿತ-ದೇಶಾದೌ ಲಿಂಗಿಪ್ರಮಾಂ ಜನಯನ್ ಅನುಮಾನಮಿತ್ಯುಚ್ಯತೇ ।	ತಥಾ ಚ - ಅನುಮಾನಸ್ಯ ದ್ವಯಂ ಸಾಮರ್ಥ್ಯಂ - 1. ವ್ಯಾಪ್ತಿಃ 2. ಸಮುಚಿತದೇಶಾದೌ ಸಿದ್ಧಿಶ್ಚ ।

ಪ್ರಮಾಣಾಂತರಾಣಾಮಂತರ್ಭಾವಃ

ಪ್ರಮಾಣಾಂತರತ್ವೇನ ಪರಿಗೃಹೀತಾನಿ	ಕರಣಂ	ಕಾರ್ಯಂ (ಫಲಂ)	ಪ್ರತ್ಯಕ್ಷಾನುಮಾನಾಗಮೇಷ್ವೇವಾಂತರ್ಭಾವಕಥನಂ
ಅರ್ಥಾಪತ್ತಿಃ	ಅನುಪಪದ್ಯಮಾನಾರ್ಥ-ದರ್ಶನಂ ಯಥಾ- ಜೀವನ್ ಚೈತ್ರಃ ಗೃಹೇ ನಾಸ್ತೀತಿ ಜ್ಞಾನಂ।	ತದುಪಪಾದಕೇ ಬುದ್ಧಿಃ ಚೈತ್ರಃ ಬಹಿಃ ಅಸ್ತಿ ಇತಿ ಜ್ಞಾನಂ	ಇಯಂ ಅನುಮಾನೇಽಂತರ್ಭವತಿ। ತಥಾ ಹಿ- ಚೈತ್ರಃ ಬಹಿಃ ಅಸ್ತಿ ಜೀವನವತ್ತ್ವೇ ಸತಿ ಗೃಹೇ ಅಸತ್ತ್ವಾತ್ । ಯೋ ಜೀವನ್ ಯತ್ರ ನಾಸ್ತಿ ಸಃ ತತೋಽನ್ಯತ್ರಾಸ್ತಿ ಇತಿ ವ್ಯಾಪ್ತೇಃ।
ಉಪಮಾನಂ	ಸಾದೃಶ್ಯಜ್ಞಾನಂ		
	1. ಚಕ್ಷುರಾದೀಂದ್ರಿಯಜಂ	ಅಯಂ ತೇನ ಸದೃಶಃ, ಇಮೌ ಸದಶೌ ಇತಿ ಜ್ಞಾನಂ	ಪ್ರತ್ಯಕ್ಷೇಽಂತರ್ಭವತಿ।
	2. ಗೋಗವಯೌ ಸದೃಶೌ ಇತಿ ವಾಕ್ಯಜಂ	ಗೋಗವಯೌ ಸದೃಶೌ	ಆಗಮೇಽಂತರ್ಭವತಿ।
	3. ಗೃಹ್ಯಮಾಣೇ ಸ್ಮರ್ಯ-ಮಾಣಸಾದೃಶ್ಯಜ್ಞಾನಂ	ಸ್ಮರ್ಯಮಾಣೇ ಗೃಹ್ಯಮಾಣಸಾದೃಶ್ಯ-ಜ್ಞಾನಂ	ಅನುಮಾನೇಽಂತರ್ಭವತಿ। ತಥಾ ಹಿ – ಸಃ ಗೌಃ ಏತದ್ಗವಯಸದೃಶಃ। ಅಸ್ಯ ಗವಯಸ್ಯ ತದ್ಗೋಸಾದೃಶ್ಯಾತ್ । ಯೋ ಯತ್ಸದೃಶಃ ಸಃ ತತ್ಸದೃಶಃ। ಯಥಾ ಯಮೋ ಯಮಾಂತರೇಣ । (ಅತ್ರ ವ್ಯಾಪ್ತಿಸದ್ಭಾವೇನ ವೈಯಧಿಕರಣ್ಯಸ್ಯಾದೋಷತ್ವಾತ್।) ಅಥವಾ ಗವಯಗತಸಾದೃಶ್ಯ-ಪ್ರತಿಯೋಗಿತ್ವಾದಿತಿ ಹೇತೌ ಸಾಮಾನಾಧಿಕರಣ್ಯಮಪಿ ಸಂಭವತಿ ।
	4. ಗೋ ಸದೃಶಃ ಗವಯಃ ಇತಿ ಜ್ಞಾನಂ।	ಅಯಂ ಗವಯಪದವಾಚ್ಯಃ ಇತಿ ವಾಚ್ಯತ್ವಜ್ಞಾನಂ।	ಇದಮಪ್ಯನುಮಾನೇಽಂತರ್ಭವತಿ – 'ಅಯಂ ಗವಯಪದವಾಚ್ಯಃ ಗೋಸದೃಶತ್ವಾತ್' ಇತಿ। (ಅಗೋತ್ವೇ ಸತಿ ಗೋಸದೃಶತ್ವಾತ್ ।)

ಪ್ರಮಾಣಾಂತರತ್ವೇನ ಪರಿಗೃಹೀತಾನಿ	ಕರಣಂ	ಕಾರ್ಯಂ (ಫಲಂ)	ಪ್ರತ್ಯಕ್ಷಾನುಮಾನಾಗಮೇಷ್ವೇವಾಂತರ್ಭಾವಕಥನಂ
ಅಭಾವಃ	ಅಭಾವಜ್ಞಾನಕರಣಂ	ಅಭಾವಜ್ಞಾನಂ	
	1. ಭಾರತಾದ್ಯಾಗಮಾಃ	ಕೌರವಾದ್ಯಭಾವಜ್ಞಾನಂ	ಆಗಮೇಽಂತರ್ಭವತಿ । ಆಗಮಜನ್ಯತ್ವಾತ್ ।
	2. ರೂಪಾದಿಜ್ಞಾನಾಭಾವಃ	ಚಕ್ಷುರಾದ್ಯಭಾವಜ್ಞಾನಂ	ಅನುಮಾನೇಽಂತರ್ಭವತಿ । ಚೈತ್ರಃ ಚಕ್ಷುರಭಾವವಾನ್ ರೂಪಾದಿಜ್ಞಾನಾಭಾವಾತ್ ಇತಿ ।
	3. ಇಂದ್ರಿಯಸನ್ನಿಕರ್ಷಃ	ಝಟಿತಿ ಜಾಯಮಾನಂ ಘಟಾಭಾವಜ್ಞಾನಂ ।	ಇಂದ್ರಿಯಜನ್ಯತ್ವಾತ್ ಪ್ರತ್ಯಕ್ಷೇಽಂತರ್ಭವತಿ । ಅನುಪಲಬ್ಧಿಸ್ತು ಅವರ್ಜನೀಯಸನ್ನಿಧಿರೇವ ।
	4. ಅಂಧಕಾರೇ ಹಸ್ತಪ್ರಸಾ-ರಣಾದಿಪರಾಮರ್ಶಃ	ತತಃ ಜಾಯಮಾನಂ ಅತ್ರ ಘಟೋ ನಾಸ್ತೀತ್ಯಭಾವ-ಜ್ಞಾನಂ	ಅನುಮಾನೇಽಂತರ್ಭವತಿ – ಅತ್ರ ಘಟೋ ನಾಸ್ತಿ ಯೋಗ್ಯತ್ವೇ ಸತಿ ಅನುಪಲಭ್ಯಮಾನತ್ವಾತ್, ಇತಿ ।
	5. ಪ್ರಾತಃ ಗಜಾನುಪಲಬ್ಧಿಃ	ಸಾಯಂ, ಪ್ರಾತರತ್ರ ಗಜೋ ನಾಸೀತ್ ಇತ್ಯಭಾವಜ್ಞಾನಂ	ಅನುಪಲಬ್ಧಿರೂಪಲಿಂಗಗಮ್ಯತ್ವಾದನುಮಾನೇಽಂತರ್ಭವತಿ । ತಥಾ ಹಿ– ಪ್ರಾತಃ ಅತ್ರ, ಗಜೋ ನಾಸೀತ್ ಯೋಗ್ಯತ್ವೇ ಸತ್ಯನುಪಲಬ್ಧತ್ವಾತ್, ಇತಿ ।
ಸಂಭವಃ	ಬಹುಲಜ್ಞಾನಂ- ಶತಮಸ್ತೀತಿ ಜ್ಞಾನಂ	ಅಲ್ಪಜ್ಞಾನಂ ಪಂಚಾಶಜ್‌ಜ್ಞಾನಂ	ಅನುಮಾನೇಽಂತರ್ಭವತಿ – ಚೈತ್ರಃ ಪಂಚಾಶದ್ವಾನ್ ಶತವತ್ವಾತ್ ಇತ್ಯನುಮಾನಜನ್ಯತ್ವಾತ್ ।
ಪರಿಶೇಷಃ	ಪ್ರಸಕ್ತಪ್ರತಿಷೇಧಃ- ಇಮೌ ದೇವದತ್ತ-ಯಜ್ಞದತ್ತೌ	ಪರಿಶಿಷ್ಯಮಾಣೇ ಬುದ್ಧಿಃ- ಅಯಂ ದೇವದತ್ತಃ ಇತಿ ಬುದ್ಧಿಃ	ಅಯಮಪ್ಯನುಮಾನೇಽಂತರ್ಭವತಿ । ತಥಾ ಹಿ– ಅಯಂ ದೇವದತ್ತಃ ದೇವದತ್ತಯಜ್ಞದತ್ತಯೋರನ್ಯತರತ್ವೇ ಸತ್ಯಯಜ್ಞದತ್ತತ್ವಾತ್ । ವ್ಯತಿರೇಕೇಣ ಯಜ್ಞದತ್ತವತ್ ಇತ್ಯನುಮಾನಜನ್ಯತ್ವಾತ್ ।

ಪ್ರಮಾಣಾಂತರತ್ವೇನ ಪರಿಗೃಹೀತಾನಿ	ಕರಣಂ	ಕಾರ್ಯಂ (ಫಲಂ)	ಪ್ರತ್ಯಕ್ಷಾನುಮಾನಾಗಮೇಷ್ವೇವಾಂತರ್ಭಾವಕಥನಂ
ಐತಿಹ್ಯಂ	ಅನಿರ್ದಿಷ್ಟಪ್ರವಕ್ತೃಕಂ ಪ್ರವಾದಪಾರಂಪರ್ಯಂ- ಅತ್ರ ವಟೇ ವೈಶ್ರವಣಃ ಅಸ್ತೀತಿ ವಾಕ್ಯಂ।	ಅತ್ರ ಯತ್ಕಿಂಚಿದಸ್ತೀತಿ ಜ್ಞಾನಂ। ಅತ್ರ ವಟೇ ವೈಶ್ರವಣಃ ಅಸ್ತೀತಿ ಜ್ಞಾನಂ।	ಆಗಮೇಽಂತರ್ಭವತಿ। ಆಗಮಜನ್ಯತ್ವಾತ್। ತಥಾ ಹಿ - 1. ವಟೇ ವಟೇ ವೈಶ್ರವಣಃ (ಕುಬೇರಃ)। 2. ಚತ್ವರೇ ಚತ್ವರೇ ಶಿವಃ। 3. ಪರ್ವತೇ ಪರ್ವತೇ ರಾಮಃ। ಸರ್ವತ್ರ ಮಧುಸೂದನಃ। ಇತ್ಯಾದ್ಯಾಗಮಾಃ।
ಉಪಕ್ರಮಾದೀನಿ ಶ್ರುತ್ಯಾದೀನಿ ಚ	ಉಪಕ್ರಮೋಪಸಂಹಾರಾ- ಭ್ಯಾಸಾಪೂರ್ವತಾಫಲಾರ್ಥ- ವಾದಾಃ। ಶ್ರುತಿಲಿಂಗವಾಕ್ಯ- ಪ್ರಕರಣಸ್ಥಾನಸಮಾಖ್ಯಾಶ್ಚ।	ಇದಂ ವಾಕ್ಯಂ ಏತದರ್ಥ- ಪರಂ ಇತಿ ಜ್ಞಾನಂ।	ಏತಾನಿ ಅನುಮಾನೇಽಂತರ್ಭವಂತಿ। ತಥಾ ಹಿ - ಇದಂ ವಾಕ್ಯಂ ಏತದರ್ಥಪರಂ, ಏತದರ್ಥಕ ಉಪಕ್ರಮವತ್ತ್ವಾತ್, ಯತ್ ಯದುಪಕ್ರಮಂ ತತ್ ತತ್ಪರಂ। ಯಥಾ ಸಮ್ಮತಂ ಇತ್ಯಾದ್ಯಾನುಮಾನಜನ್ಯತ್ವಾತ್।
ಏವಮನ್ಯಾನ್ಯಪಿ	1. ನಯನಾಂಗುಲ್ಯಾದಿ ಚೇಷ್ಟಾ 2. ವರ್ಣಜ್ಞಾಪಕರೇಖಾದಿ- ಜ್ಞಾನಂ 3. ಶಾಕುನಾಪಶಾಕುನಜ್ಞಾನಂ	ಗಮನಾಗಮನಾದಿ ಜ್ಞಾನಂ ವರ್ಣಾದಿಜ್ಞಾನಂ ಶುಭಾಶುಭಜ್ಞಾನಂ	ವಿವಕ್ಷಾಭೇದೇನ ಪ್ರತ್ಯಕ್ಷೇ ವಾ ಅನುಮಾನೇ ವಾ ಅಂತರ್ಭವತಿ ವಿವಕ್ಷಾಭೇದೇನ ಪ್ರತ್ಯಕ್ಷೇ ವಾ ಅನುಮಾನೇ ವಾ ಅಂತರ್ಭವತಿ ಅನುಮಾನೇಽಂತರ್ಭವತಿ। ಶಾಕುನಾದಿಲಿಂಗಗಮ್ಯತ್ವಾತ್ ಇತ್ಯಾದೀನಿ ಯಥಾಯೋಗ್ಯಂ ಪ್ರತ್ಯಕ್ಷಾದಿಷ್ವಂತರ್ಭಾವನೀಯಾನಿ।

ಮತಭೇದಃ ಪ್ರಾಮಾಣ್ಯೇಅಪ್ರಾಮಾಣ್ಯೇ ಚ	ಜ್ಞಪ್ತೌ ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ ಪರತಸ್ತ್ವಂ	ತತ್ಸ್ವರೂಪಂ
ಮಧ್ವಾಚಾರ್ಯಾಃ			
ಜ್ಞಾನಗತಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಗ್ರಾಹಕಸಾಕ್ಷಿಮಾತ್ರಗ್ರಾಹ್ಯತ್ವಾತ್ ।
ಜ್ಞಾನಗತಪ್ರಾಮಾಣ್ಯೇ	ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಜನಕಮಾತ್ರಜನ್ಯತ್ವಂ ।
ಕರಣಗತಪ್ರಾಮಾಣ್ಯೇ	ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಜನನಶಕ್ತ್ಯಭಿನ್ನಪ್ರಾಮಾಣ್ಯಜನನಶಕ್ತಿಮತ್ವಂ ।
ಕರಣಗತಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ	ಪರತಸ್ತ್ವಂ	(ಕರಣಗ್ರಾಹಕಮಾತ್ರಗ್ರಾಹ್ಯತ್ವಂ ಸ್ವತಸ್ತ್ವಂ ಇತಿ ವಿವಕ್ಷಾಯಾಂ) ಕರಣಗ್ರಾಹಕಾತಿರಿಕ್ತಾನುಮಾನಗ್ರಾಹ್ಯತ್ವಾತ್ ।
	(ವಿವಕ್ಷಾಭೇದೇನ)	ಸ್ವತಸ್ತ್ವಂ ಚ	(ಕರಣೇ ಜ್ಞಾನಜನಕತ್ವಗ್ರಾಹಕಮಾತ್ರಗ್ರಾಹ್ಯತ್ವಂ ಸ್ವತಸ್ತ್ವಂ ಇತಿ ವಿವಕ್ಷಾಯಾಂ)
ಜ್ಞಾನಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ	ಪರತಸ್ತ್ವಂ	ಜ್ಞಾನಗ್ರಾಹಕಾತಿರಿಕ್ತಬಾಧಜ್ಞಾನಗ್ರಾಹ್ಯತ್ವಂ
ಜ್ಞಾನಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಉತ್ಪತ್ತೌ	ಪರತಸ್ತ್ವಂ	ಜ್ಞಾನಜನಕಾತಿರಿಕ್ತದೋಷಜನ್ಯತ್ವಂ ।
ಕರಣಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ	ಪರತಸ್ತ್ವಂ	ಕರಣಗ್ರಾಹಕಾತಿರಿಕ್ತಬಾಧಕಪ್ರಮಾಣಗ್ರಾಹ್ಯತ್ವಂ ।
ಕರಣಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಉತ್ಪತ್ತೌ	ಪರತಸ್ತ್ವಂ	ಕರಣಗತಶಕ್ತಿಭಿನ್ನದೋಷಜನ್ಯತ್ವಂ ।
ಸಾಂಖ್ಯಾಃ			
ಜ್ಞಾನಗತಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಜ್ಞಾಪಕಾತಿರಿಕ್ತಜ್ಞಾಪಕಾನಪೇಕ್ಷತ್ವಂ ।
ಜ್ಞಾನಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಜನಕಾತಿರಿಕ್ತಜನಕಾನಪೇಕ್ಷತ್ವಂ ।

ಮತಭೇದಃ ಪ್ರಾಮಾಣ್ಯೇ ಅಪ್ರಾಮಾಣ್ಯೇ ಚ	ಜ್ಞಪ್ತೌ ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ ಪರತಸ್ತ್ವಂ	ತತ್ಸ್ವರೂಪಂ
ನೈಯಾಯಿಕಾದಯಃ			
ಜ್ಞಾನಗತಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಪರತಸ್ತ್ವಂ	ಜ್ಞಾನಜ್ಞಾಪಕಾತಿರಿಕ್ತಪ್ರಮಾಣಗಮ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕಾತಿರಿಕ್ತಗುಣಜನ್ಯತ್ವಂ।
ಜ್ಞಾನಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಪರತಸ್ತ್ವಂ	ಜ್ಞಾನಜ್ಞಾಪಕಾತಿರಿಕ್ತವಿಸಂವಾದಲಿಂಗಗಮ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕಾತಿರಿಕ್ತದೋಷರೂಪಕಾರಣಜನ್ಯತ್ವಂ।
ಬೌದ್ಧಾಃ			
ಜ್ಞಾನಗತಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಪರತಸ್ತ್ವಂ	ಜ್ಞಾನಜ್ಞಾಪಕಾತಿರಿಕ್ತಪ್ರಮಾಣಗಮ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕಾತಿರಿಕ್ತಗುಣಜನ್ಯತ್ವಂ।
ಜ್ಞಾನಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಗ್ರಾಹಕಮಾತ್ರಗ್ರಾಹ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕಮಾತ್ರಜನ್ಯತ್ವಂ।
ಭಾಟ್ಟಾಃ			
ಜ್ಞಾನಗತಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಗ್ರಾಹಕಜ್ಞಾತತಾವಿಶೇಷರೂಪಾನುಮಾನಗಮ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕಮಾತ್ರಜನ್ಯತ್ವಂ।
ಜ್ಞಾನಗತಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಪರತಸ್ತ್ವಂ	ಜ್ಞಾನಗ್ರಾಹಕಾತಿರಿಕ್ತವಿಸಂವಾದಾದ್ಯನುಮಾನಾಂತರವೇದ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕಾತಿರಿಕ್ತದೋಷಜನ್ಯತ್ವಂ।
ಪ್ರಾಭಾಕರಾಃ			
ಜ್ಞಾನಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ	ಸ್ವತಸ್ತ್ವಂ	ಜ್ಞಾನಗ್ರಾಹಕ-ಸ್ವಪ್ರಕಾಶಜ್ಞಾನಮಾತ್ರಗ್ರಾಹ್ಯತ್ವಂ। ಜ್ಞಾನಜನಕೇಂದ್ರಿಯಾದಿಮಾತ್ರಜನ್ಯತ್ವಂ।
ಜ್ಞಾನಾಪ್ರಾಮಾಣ್ಯೇ	ಜ್ಞಪ್ತೌ, ಉತ್ಪತ್ತೌ		ಅಯಥಾರ್ಥಜ್ಞಾನರೂಪಧರ್ಮಿಣ ಏವ ಅಭಾವಾತ್ ತತ್ರ ಅಪ್ರಾಮಾಣ್ಯಂ ನಾಸ್ತ್ಯೇವ। ಅಪ್ರಾಮಾಣ್ಯಸ್ಯಾಭಾವೇ ಸ್ವತಸ್ತ್ವಪರತಸ್ತ್ವೇ ಕ್ವ ಸಂಭವತಃ?

7। [illegible]